न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

माणिकचन्द-दिगम्बर-जैन-
ग्रन्थमाला।

पुरुदेवचम्पू।

श्रीमाणिक्यचंद्रदिगंबरजैनग्रंथमालाया सप्तविंशतितमो ग्रन्थः ।

श्रीमदर्हद्दासमहाकविविरचिता

पुरुदेवचंपूः ।

श्रीजिनदासशास्त्रिणा टिप्पणादिभिः संयोज्य
संपादिता संशोधिता च ।

प्रकाशिका—

श्रीमाणिक्यचंद्रदिगंबरजैनग्रंथमालासमितिः ।

ज्येष्ठ, वीरनिर्वाण संवत् २४५४ ।

विक्रम संवत् १९८५ ।

प्रथमावृत्तिः ।] [मूल्यं द्वादशाणकाः ।

पुरुदेवचम्पूप्रबन्धोऽर्हद्दासकविश्च ।

अस्मिन्पुरुदेवचंपूप्रबंधे श्रीपुरुदेवस्य-आदिब्रह्मणो वृषभजिनपते-श्चरित्रं तत्पूर्वभवप्रसंगघटितकथोपेतं गद्यपद्योभयरूपतामाश्रित्य महाकविना भक्तिप्रसन्नमनसा श्रीमदर्हद्दासेन शब्दार्थलालित्योपेतं संवर्णितम् । अस्मिन्प्रबंधे पदानां लालित्यं, श्राव्यः शब्दसंनिवेषः, श्लेषविरोधाभासालंकृती आश्रित्य बहुषु स्थलेषु चेतोहरतयावर्णनं, चित्तविस्मापिकाः कल्पनाः, चेतःप्रसादजनको धर्मोपदेशः इति विशिष्टा गुणा विलसन्ति ।

भगवतः पुरुदेवस्य कथैव तावत्परमरमणीया कथाकथकोऽयं महाकविरर्हद्दासश्च तन्निरूपणे नैजं सकलमपि बुद्धिपाटवं व्ययीकृत-वानतोऽयं चंपूप्रबंधः सकलविद्वच्चित्तचकोराह्लादने विधूयते इति निरारेकं वक्तुं प्रभवामः ।

महाकविश्रीहरिचंद्रविरचितजीवंधरचम्पूतोऽप्यस्मिन्प्रबंधे कथा-या रोचकतया सरसता चित्ताकर्षकता च विशेषतः स्फुरन्ती विदु-षामनुभवपथमायास्यत्यस्य पठनादित्यस्मन्मतम् ।

अस्मिन्प्रबंधे बहुषु स्थलेषु टिप्पण्यः, समानार्थकश्लोकाः, कठिन-श्लोकानां स्पष्टीकरणं, कोषप्रामाण्यं च स्वयमस्माभिर्योजयित्वा यथाशक्ति ग्रन्थकर्तुराशयः विशदीकृतः । पाठकानामस्य पठनसमये तेन सुगमता भवेदिति ।

अस्य चंपूप्रबंधस्य रचयिता महाकविरर्हद्दासः इति उपर्युक्तमेवा-स्माभिः । कविरयं आचार्यकल्पस्य श्रीमदाशाधरपंडितस्य शिष्य आसीदिति तत्कथनादवगम्यते—इत्थं तत्प्रमाणानि—अस्यैव प्रबंधस्य अन्ते एवं तेनाभिहितम्—

मिथ्यात्वपंककलुषे मम मानसेस्मिन्
आशाधरोक्तिकतकप्रसरैः प्रसन्ने ।
उल्लासितेन शरदा पुरुदेवभक्त्या
तच्चंपुदंभजलजेन समुज्जजृंभे ॥

श्रीमुनिसुव्रतकाव्ये अपरनाम काव्यरत्ने अन्तिमः श्लोक इत्थं—

मिथ्यात्वकर्मपटलैश्चिरमावृते मे
युग्मे दृशोः कुपथयाननिदानभूते ॥
आशाधरोक्तिलसदंजनसंप्रयोगैः
स्वच्छीकृते पृथुलसत्पथमाश्रितोस्मि ॥ ६५ ॥

भव्यंकठाभरणे चैवं समुल्लेखः समुपलभ्यतेऽन्ते—

सूक्त्यैव तेषां भवभीरवो ये गृहाश्रमस्थाश्चरितात्मधर्माः ।
त एव शेषाश्रमिणां सहायधन्याः स्युराशाधरसूरिवर्याः ॥

एतैः प्रमाणैरस्याशाधरशिष्यत्वं सुष्ठु प्रतीयते। श्रीमदाशाधरसूरिवर्यस्य विक्रमनृपस्य त्रयोदशशताब्दी समुत्पादो व्यक्तं निर्णीत एवातोऽस्य कवेरपि स एव समुत्पत्तिकाल इति निर्विवादप्रायमेवेति विदांकुर्वन्तु सज्जनाः पाठकाः।

कविवरस्यास्य पुरुदेवचंपूप्रबंधवत् मुनिसुव्रतकाव्यं, भव्यजनकंठाभरणमित्यपरं कृतिद्वयं च समुपलभ्यते। मुनिसुव्रतकाव्ये विंशतितमतीर्थंकरस्य चरितं पंचशतश्लोकैर्नितरां मनोरमं वर्णितं। एतत्काव्यं चंद्रप्रभचरितततोपि सुरसतरं वर्तते। अस्य मुद्रणे च साहित्यप्रकाशनपरैः दत्तचित्तैर्भवितव्यम्। भव्यजनकंठाभरणे च देवशास्त्रगुरूणां तौलनिकपद्धत्या विमर्शं कृत्वा परमार्थत्वं जैनमत एव तेषां भवितुमर्हतीति विवेचितं। मद्यमांसमधूना हेयता युक्तियुक्तवचनैर्निर्दिश्य सम्यग्दर्शनस्य अष्टांगवर्णनं तदुदाहरणोपेतं सम्यक्प्रकीर्तितं कविना। इति ग्रंथत्रयमस्माकं दृष्टिपथमद्यावधिसमागतं तेन अस्य कवेः कवित्वं विद्वच्चेतश्चमत्कारीति निर्णीयतेऽस्माभिः। जैनशास्त्रमुद्रणाभिलाषवद्भिरिमौ द्वावपि ग्रंथौ प्रकाशयित्वा जैन साहित्यप्रभावनां क्रियतामिति विज्ञप्तिं कृत्वा विरम्यते भूमिका लेखनात् इति शम्।

वीरसंवत् २४५४ चैत्रकृष्णाप्रतिपत्	भवदीयवशंवदो फडकुलेत्युपाह्वः पार्श्वनाथतनयो जिनदासः

श्रीः

महाकविश्रीमदर्हद्दासविरचिता

पुरुदेवचंपूः ।

क्रियाद्वः कल्याणं भ्रमरहितसामोदसुमनः-
समासेव्यः श्रीमान्वृषभ इति विद्वत्सु विदितः ॥
ददानः कल्पद्रुः श्रितजनततेरुत्तमफलं
समासीनो दिव्यध्वनिमृदुलतालंकृतमुखः ॥१॥

जीयादादिजिनेन्द्रवासरमणिः सच्चक्रसंतोषकः ।
राजच्छोभनखाश्रयप्रविलसत्पादस्तमोनाशनः ॥
श्रीमान्वासवशोभितामरसभाहर्षप्रकर्षप्रदो ।
भ्राजत्केवलबोधवासररुचिर्निस्सीमसौख्योदयः ॥२॥

---

१ प्रथमतीर्थंकरपक्षे 'भ्रम–रहितसामोदसुमनःसमासेव्यः' विपर्ययज्ञानरहितसहर्षदेवैर्विद्वद्भिः—गणधरादिमुनिभिश्च सेवनीयः। कल्पतरुपक्षे भृंगाहितैः सुगंधिपुष्पैः समासेव्यः। 'सुगंधिमुदि वाऽमोदः' 'सुमनाः पुष्पमालत्योः स्त्रियां धीरे सुरे पुमान्' इति विश्वलोचनः। आदितीर्थंकरो 'दिव्यध्वनिमृदुलतालंकृतमुखः' दिव्यध्वनेः कोमलतया भूषितमुखः। कल्पतरुश्च 'दिव्यध्वनिमृदु–लतालंकृतमुखः' दिवि–स्वर्गे अध्वनि–मार्गे इत्यर्थः, कोमलवल्ल्या भूषिताग्रः। २ मोक्षफलं, जनेप्सितभाजनवस्त्रभूषणादिकं च। ३ जिनेशपक्षे सतां चक्रः समूहः सज्जनसमुदायः। सूर्यपक्षे चक्रवाकपक्षिणां हर्षप्रदः। 'अथ पुंस्येव चक्रः स्याच्चक्रवाकसमूहयोः। इति विश्वलोचनः। ४ जिनपक्षे दीप्तिसौंदर्याभ्यां युतानां नखानामाश्रयेण शोभमानचरणः। सूर्यपक्षे दीप्तिसौंदर्यवतः खस्य आकाशस्य अवलंबनेन विलसत्किरणः; 'पादा रश्म्यंघ्रितुर्यांशाः' इत्यमरः। ५ जिनपक्षे इंद्रशोभितदेवसमूहहर्षप्रकर्षप्रदः। सूर्यपक्षे आसवशोभि–तामरस–भा हर्षप्रकर्षप्रदः मकरंदशोभिकमलकान्तिविकासप्रदः।

जीवं[1] जीवं प्रति कलयितुं नित्यसौख्यं प्रवृत्तः ॥
श्रीमानाद्यो जिनपतिशशी संगतानंतसौख्यः
भव्योल्हासं वितरतु सभोल्लासकृत्सुप्रतिष्ठः
प्रौढध्वांतस्फुरणहरणः सत्पथे सन्निविष्टः ॥३॥
विशा नितकुशासनं विविधबंधविच्छेदनं
जिनाधिपतिशासनं जयति भव्यसंमाननम् ॥
कुतीर्थकरवासनाकुलितचित्तसंत्रासनं
सतां सुगुणशासनं सकलमंगलाशंसिनम् ॥ ४ ॥
रत्नत्रयं राजति जैत्रमत्राचिंत्यादिव्याद्भुतशक्तियुक्तं ॥
मोहक्ष्माभृत्परिगुप्तसेनां जिगाय तां येन जिनाधिराजः॥५॥
वाणीं मे प्रथयन्तु ते गणधराः सज्ज्ञानवारांकराः
येषां निर्मलमानसे श्रुतमयी हंसी सदा खेलति ॥
स्याद्वादोत्तमपक्षयुग्जिनपतेर्वक्त्रांबुजान्निर्गता
मिथ्यैकान्तमृणालकांडनिचयं द्राक् खंडशः कुर्वती ॥ ६ ॥

---

१ जिनपक्षे प्राणिन प्राणिनं प्रति । चंद्रपक्षे चकोरं प्रति ' जीवजीव-चकोरकः ' इत्यमरः । २ ध्वांतं तमः अज्ञानं च ३ सज्जनानां मार्गे । चंद्रपक्षे सतां शोभनानां पंथाः मार्गः अर्थात् नक्षत्रमार्गो नभसीत्यर्थः । ४ निरस्तमिथ्यामतं । ५ सम्यग्दर्शनादिशोभनगुणानामुपदेष्टृ । ६ सकलमंगलसंपादकम् । ७ जयशीलं । ८ मोहनृपतिपरिपालितां कर्मसेनां । ९ ज्ञानसमुद्राः । १० निर्मलचित्ते, मान-सरोवरे च । ११ द्वादशांगरूपा । १२ इय द्वादशांगरूपा हंसी स्याद्वादरूप पक्षसंयुक्ता जिनवदनकमलनिर्गता सती सर्वथैकान्तकमलनालं शीघ्रं खंडयति । येषां चतुर्ज्ञानजलधीनां गणधराणां मानससरसि इयं हंसी अनिशं क्रीडति ते मम वाणीं वर्धयन्तु इति श्लोकाभिप्रायः ।

श्रुतस्कंधोद्यंचततरुमधिकशाखालिसितं ।
स्तुमो यस्य स्थानं जिनपवदनोद्यानमनघं ॥
दृगंभोजोपेतं स्मितमधुरहंसाढ्यमधर-।
प्रवालं नीलभ्रूमरुकमुदयद्रूपकलितं ॥ ७ ॥
कल्याणं कलयन्तु पूर्वकवयः पीयूषकल्लोलिनी-
सल्लापिप्रथमानकोमलवचोगाराः स्फुरत्कीर्तयः ॥
यैरादीश्वरसत्कथामृतझरी नीता प्रकाशं परं
संसारोद्भवतापमप्रतिहतं लोपं नयंत्यंततः ॥ ८ ॥
आदीश्वरोदारकथारसज्ञा स्तुतिं गुरूणां तनुतां रसज्ञा ॥
येषां कटाक्षामृतसेचनेन सुपुष्पिताऽभून्मम सूक्तिवल्ली ॥९।
– जयंतु श्रीमंतः प्रथितजिनसेनार्यगुरवः
प्रवादिप्रागल्भ्योद्धुरशिखरदंभोलिपटवः ॥
दलन्मल्लीवल्लीकुसुमरससौरभ्यलहरी-
मुचा वाचा मोचाफलमधुरचौर्यैकचतुराः ॥ १० ॥
श्रीमद्गौतमनामधेयगणभृत्प्रोवाच यां निर्मलां ॥
ख्यातश्रेणिकभूभृते जिनपतेराद्यस्य रम्यां कथां ।

---

१ अयं श्रुतस्कंधरूपो महांस्तरुर्द्वादशांगचतुर्दशपूर्वशाखाभिर्युतोऽस्माभिः स्तूयते । अस्य तरोरुत्पत्तिर्दोषरहिताज्जिनमुखोपवनाज्जाता जिननेत्रयोः कमलरूपत्वात्, तत्स्मितस्य कलहंसत्वात्, तदधरोष्ठस्य, किसलयत्वात्, तन्नीलभ्रूयुग्मस्य मरुकत्वात् (मरवा इति महाराष्ट्रभाषायां) जिनपवदनमिदं उद्यानमेवेति रूपकालंकारः । २ कुर्वन्तु । ३ अमृतस्य नदी। ४ जिह्वा 'रसज्ञा रसना जिह्वा इत्यमरः । ५ दंभोलिर्वज्रं । ६ रंभाफलं 'कदली वारणबुसा रंभा मोचांशुमत्फलेत्यमरः' ।

तां भक्त्यैव चिकीर्षतो मम कृतिश्चंपूप्रबंधात्मिका ।
वेलातीतकुतूहलाय विदुषामाकल्पमाकल्पताम् ॥ ११ ॥
जातेयं कवितालता भगवतो भक्त्याख्यबीजेन मे
चंचत्कोमलचारुशब्दनिचयैः पत्रैः प्रकामोज्ज्वला ॥
वृत्तैः पल्लविता ततः कुसुमितालंकारविच्छित्तिभिः ॥
संप्राप्ता वृषभेशकल्पकतरुं व्यंग्यश्रिया वर्धते ॥ १२ ॥

अथ विशालवीचिमालाविक्षिप्तविविधमौक्तिकपुंजसंजातमरालिकाभ्रमसमागतहंसालिंगनमंगलतरंगितकौतुकमराललोकविराजिततीरेण लवणाकरेण परिवृते, अधःस्थितकुंडलींद्रमृणालदंडमंडितनया, घननीलगगनतलोलंबचुंबितकांचनगिरिकर्णिकतया च लक्ष्मीनिवासभूतलवणोदधिमध्यसंजातमंजुलकंजसंभावनासंपादके जंबुद्वीपे विराजमानस्य लवणतरंगिणीरमणपयोमयस्नेहपरीतजंबूद्वीपभाजनमध्यप्ररूढदीपकलिकाशंकाकरस्य धराधरस्य प्रत्यग्दिशाश्रिते, फलशालिशालिवनोपांतमनुपतंतीभिस्तद्विषयवास्तव्यनानानोकहशाखाशिखासमुद्भूतसमीरसमाकृष्टसुरापगागलितशैवालमालाभिरिव, समुन्नततरुतरुणसमालिंगितनभोलक्ष्मीवक्षःस्थलतृटितोज्झितमरकतमयमालामणिश्रेणीभिरिव, तद्देशमध्यस्थलालंकारभूतविजयार्धशिखरिसुरदान्तिसमुदस्ततुंगतमशृंगहस्त-

---

१ मर्यादातीतकौतुकाय । २ कल्पान्तकालपर्यंतमित्यर्थः । ३ वृषभतीर्थंकरस्य । ४ अतिशयेन उज्ज्वला कान्त्याख्येन काव्यगुणेन सहिता । ५ वृतैः वसंततिलकादिछंदोभिः । ६ हंसी । ७ कुंडलिनां सर्पाणां इंद्रः अधिपतिः शेष इत्यर्थः । ८ के वारिणि जायते इति कंजं कमलमित्यर्थः। क्षेत्रच्छदैः पूर्वविदेहमुख्यैरधःस्थितस्फारफणीन्द्रदंडः । चकास्ति रुक्माचलकर्णिको यः स श्रियः पद्म इवाब्धिमध्ये ॥ इति धर्मशर्माभ्युदयस्य श्लोकच्छायामनुसरति गद्यमिदं । ९ समुद्रः । १० पश्चिमदिगाश्रिते ११ अनोकुहो वृक्षः। १२ देवगंगा ।

निर्मूलितांतरिक्षाकूपारपद्मिनीहरितपत्रमालाभिरिव शुकपंक्तिभिः सदानीतवंदनमाले, सकलगीर्वाणपरिषन्नयनपरितोषमूले, आलेख्यालिखितैरिव निश्चलांगैः कुरंगैः संततसंश्रूयमाणगानकलाप्रवीणसस्यस्थलीपालकबालस्त्रैणनिराकृताभिः, पुनस्तदीयनयनमीनभ्रान्त्या प्रतिनिवृत्ताभिर्गगनकाननच्युतपुष्पमंजरीभिरिव समापतंतीभिर्बकावलीभिःप्रकल्पकेतनजाले, निरालंबतया नभोंगणनिपातितस्वर्गैकगंडसंदेहविषये बांधिलविषये, बाभासमानस्यानेकप्रस्थकलितस्याप्यतीतमानस्य, प्रसूतानेकपादस्यापि नगेंद्रस्य, विचित्रवनराजिविराजितस्यापि समाश्रितविद्याधरवनितानामवनस्य रविं दधानस्याप्यरविंदधानस्य, सुरभिवनकुसुमविसरविसृतरजोभरपरिमलितस्यापि अत्युज्ज्वलस्य, महीमहिलाविधृतदुकूलचेलस्येव, भगवदर्हद्विमलकीर्तिपुंजस्येव, व्योमचरवनितावदनविधुविलीनचंद्रकांताशिलात-

---

१ नभःसमुद्रः। २ अयं गद्यांशः ‘ सस्यस्थलीपालकबालिकानामुल्लोकगीतश्रुतिनिश्चलांगं ॥ यत्रैणयूथं पथि पांथसार्थाः सलेप्यलीलामयमामनंति ॥ धर्मशर्माभ्युदयस्यामिमं श्लोकभावं अनुसरति । ३ ध्वजसमूहे । ४ धान्यादेः परिमाणविशेषैः युक्तस्यापि तद्रहितस्येति विरोधः । तत्परिहारस्तु-प्रस्थैः शिखरैर्युक्तस्य तथा अत्युच्चत्वात्प्रमाणरहितस्य । ५ प्रादुर्भूतानेकचरणस्यापि नगेंद्रस्य न गच्छतां इंद्रस्येति विरोधः। परिहारस्त्वेवं प्रसूतानेकप्रत्यन्तपर्वतस्य तथा पर्वतश्रेष्ठस्य ‘ पादाः प्रत्यन्तपर्वताः ’ । ६ वनराजिविराजितस्यापि अवनस्येति विरोधः। तत्परिहारस्त्वेवं अवनस्य रक्षकस्येत्यर्थः। ७ रविं दधानस्यापि अरविंदधानस्येति विरोधः परिहारस्त्वेवं रविं सूर्यं धारयतस्तथा अरविंदधानस्य अरविंदानां कमलानां धाति इति अरविंदधानस्तस्य । ८ रजोभरपरिमलितस्यापि अत्युज्ज्वलस्येति विरोधपरिहारस्त्वेवं परागभरयुक्तस्य तथा अतिशयेन प्रकाशमानस्य । अयं विरोधाभासरूपो गद्यांशः ‘ प्रस्थैरुदस्यैः कलितोऽप्यमानः पादैरमंदैः प्रसृतोऽप्यगेंद्रः युक्तो वनैरप्यवनः श्रितानां यः प्राणिनां सत्यमगम्यरूपः ॥’ इमं धर्मशर्माभ्युदयस्यश्लोकमनुसरति ।

लविगलद्वारिधाराभिर्भेदगंधवहकंदलस्पंदनांदोलितमाकंदतरुसंदोहशिख-रच्युतपक्कफलप्रसृतरसधोरणीभिः पंफुल्यमानमल्लिकातल्लजमंजरीसंजरी-जृंभमाणमकरंदझरीभिर्गगनचरललनाजनकुलकलितकलगानकलाकालवि-घृतमाणिशिलातलविसृतस्रवंतीभिश्च निरंतरपत्यकाभागस्य नैजकांतिक-ल्लोलपरिहसितकुलाचलस्य रजताचलस्योत्तरश्रेण्यामलकाभिधाना पुरी परिवर्तिता ॥

मदीयरत्नप्रचयं महार्घमाहृत्य सर्वे क नु गच्छसीति ॥
रुषा पयोराशिरिवावृतोऽद्य यस्याः समीपे परिखा समिच्छे। १३

यदीयकनकोज्ज्वलप्रथितसालमालाभितो
विभाति नगराश्रिया विधृतकांचनक्षौमवत् ॥
नभश्चरवसुंधरारमणराज्यलक्ष्म्याः पुनः
परीतनवहाटकप्रचुरकांडवस्त्रालिवत् ॥ १४ ॥

यस्याः शारदनीरदामलमहाहर्म्यावलिप्रोल्लसन्-
प्रख्याताम्बुजरागरत्नखचितैर्वातायनैर्विस्तृतैः ॥
मार्तंडाधिकक्रांतिभिर्धुतटिनीपाथोजचक्रांगनाः
रात्रौ मेलनाविप्रयोगाविषयव्युत्पत्तिशून्याःकृताः॥१५॥

यत्र च पूजोत्सवमंगलतरंगितदुंदुभिमंदतमनिध्वाननिर्भरेण, पिकनायकमदनिर्मूलननिदानललनाजनकलगीनकलाकल्लोलपल्लवितवल्ल-कीक्वणितकमनीयेन, विद्याधरजनकलितलास्यवेलाचालितरसनादाममंजु-मंजीररवमेदुरेण, तत्समाकर्णनवेलादोलायमानसंगीतविद्यापारीणविद्या-धरमुकुटतटघटितमालाजालोच्चालितचंचरीकसंचयझंकारितझंकारमनोह-रेण उत्सवकोलाहलेन जागरूकेव लक्ष्मीरालक्ष्यते ॥

---

१ अहं एवं तर्कयामीत्यर्थः । २ पद्मरागमणिः । ३ मेखला, कटि-भूषणं । ४ नूपुरं । ५ भ्रमरः ।

द्विविधाः सुदृशो भांति यत्र मुक्तोपमाः स्थिताः ॥
राजहंसाश्च सरसां तरंगविभवाश्रिताः ॥१६॥

या खलु घनश्रीसंपन्ना निभृतसामोदसुमनोभिरामा सकलसुदृग्भिः शिरसा श्लाघ्यमानमहिममहिता विविधविचित्रदिशोभितमालाढ्या अलकाभिधानमर्हति ॥

अलकाभिरुपर्यथा जुष्टा विकचाब्जसरोमुखी ॥
निस्तमस्काऽपि या चित्रमुत्तमस्फुरणोज्ज्वला ॥१७॥
शास्ता तस्याः सकलखचरक्ष्मापकोटीरकोटी–
खेलन्मालासदृशविलसच्छासनः संबभूव ॥
धीरः श्रीमानातिबल इति ख्यातनामा खगेंद्रः
प्रख्यातश्रीर्निजकुलमहामेरुमंदारशाखी ॥ १८ ॥
गंगीयंति सदा समस्तसरितो रौप्याचलंत्यद्रयो

---

१ सुष्टु दृशो यासां ताः सुदृशः ललनाः। सुष्टु दृग्दर्शनं येषां ते सुदृशः सम्यग्दर्शनसंपन्नाः । २ अनुपमाः मौक्तिकोपमाश्च । ३ कलहंसाः, नृपोत्तमाश्च । 'राजहंसस्तु कादंबे कलहंसे नृपोत्तमे' इति विश्वलोचनः । ४ सरसां तरंगविभवाश्रिताः। नृपश्रेष्ठाः सस्नेहमनसो वैभवयुक्ताः कलहंसाश्च सरोवराणां लहरीवैभवसंयुक्ताः। ५ विपुलसंपदापेता, मेघकान्तिसंपन्नाश्च । ६ सानंदैर्विद्वद्भी रमणीया, सुगंधिपुष्पै रमणीयाश्च । ७ विविधैर्विचित्रैर्विभिः पक्षिभिः शोभिता ये तमालतरवः तैराढ्या, केशपक्षे विविधविचित्रविशोभितपुष्पहारसंपन्नाः । ८ कमलसरोवदना या नगरी अलका [अलकाश्चूर्णकुन्तलाः] इति नाम्ना युक्तापि विकचा केशरहिता इति विरोधः, परिहारस्तु अलका इति नामधारिणी या पुरी प्रोत्फुल्लकमलयुक्तसरोमुखी विराजते । तथा तमोरहितापि यालका नगरी उत्कृष्टतमोबाहुल्येन प्रकाशसंयुक्तेति चित्रं, परिहारस्त्वेवं तमोरहिता या नगरी उद्गतं तमसः स्फुरणं यस्याः एतादृशी अस्ति । ९ पृथ्वीपतिः ।

नीलाब्जानि सिताम्बुजंति गजता जंभारिकुंभीयति ॥
चंद्रत्यंबुजबांधवः पिककुलं लीलामरालायते ॥
कर्पूरंति च कज्जलानि विलसद्यत्कीर्तिसंघट्टतः ॥ १९ ॥
यदीयकीर्तिकल्लोलैर्विश्वास्मिन्विशदीकृते ॥
वैरिस्त्रीवदनाब्जानि मलिनानि बताभवन् ॥ २० ॥
यस्य प्रतापतपनेन विलीयमाने
लेखाचले रजतालिप्तधराधरे च ॥
यत्कीर्तिशीतलसुपर्वनदीतरंगे
रंगीकृतौ सपदि तौ स्थिरतामयाताम् ॥ २१ ॥
रामा मनोहरानामा बभूव वसुधापतेः
सौंदर्यसिंधुलहरीमदानिर्भ्रममंजरी ॥ २२ ॥

यस्याः किल मृदुलपदयुगलं गमनकलाविलासातिरस्कृतहंसकमपि विश्वस्तलालितहंसकं, विद्रुमशोभांचितमपि पल्लविताशोकद्रुमशोभांचितं, जंघायुगं च जंघालताविरहितमपि जंघालताविख्यातं,

---

१ गजानां समूहो गजता । २ जंभारिरिंद्रस्तस्य कुंभी करी ऐरावणः । ३ अंबुजबांधवः सूर्यः । ४ लेखानां देवानामचलो गिरिः मेरुरित्यर्थः । ५ देवनदी ' सुपर्वाणः सुमनसः ' इत्यमरः । ७ गद्येऽस्मिन्सर्वत्र विरोधाभासालंकारः । गतिविलासपराजितहंसकमपि मनोहरायाः पादयुग्मं लालितहंसकमिति विरोधः । परिहारोऽस्य तया गत्या हंसपक्षिणो पराभूतिं नीत्वा स्वपादयोः हंसकं मणिनूपुरं धृतमिति । ८ वृक्षाभावः पक्षे विद्रुमः प्रवालं ' विद्रुमः पुंसि प्रवालं पुंनपुंसकम् ' इत्यमरः । ९ जंघा-युगं तु प्रसृतायुगं तु ' जंघा तु प्रसृता ' इत्यमरः (पोटरी इति महाराष्ट्र भाषायां) जंघालताविरहितमपि जंघालताविख्यातं इति विरोधः, तत्प-रिहारस्त्वेवं तस्या जंघायुगं शीघ्रगामित्वेन रहितं तथा लतावत्कोमलत्वात् जंघालतात्वेन प्रसिद्धं (जंघा लतेवेति जंघालता)।

ऊरुद्वयं तु रंभासमानमप्यरं भासमान, मध्यं पुनस्तनुसंगतमपि अतनुसंगतं, स्तनमंडलं तु विवेकवार्तापरिहीनमपि क्षमाधरकलिताविद्वेषमपि सुवृत्तशोभितं, न मत्सरमपि कुंभीन्द्रकुंभयुग्मे समत्सरं, कंठतलं च धूतदरमपि कांतमहादरविराजितं, कोमलाधरबिंबं पुनर्बहुरागरंजितमपि तिरस्कृतपल्लवं. नवसुधारसोज्ज्वलमपि वसुधारसोज्ज्वलम्, विशालनयनद्वंद्वं कर्णप्रणयपरीतमपि कृष्णार्जुनरुचिमेदुरं, मुखकमलं

---

१ ऊर्वोर्युगं सक्थ्योर्युगं रंभासमानमपि कदलीस्तंभसदृशमपि तथा नेति विरोधः। परिहारस्त्वेवं कदलीस्तंभसममपि ततोऽपि अधिकं भासमानं। २ तनुसंगतमपि शरीरसंगतमपि तथा नेति विरोधस्तत्परिहारस्त्वेवं, अतनुर्मदनः तेन संगतम्। ३ स्तनमंडलं विवेकवार्ताविहीनमपि विचाररहितमपि क्षमाधरेण सह कृतद्वेषमपि सुवृत्तशोभितं सदाचरणशोभितमिति विरोधः। तत्परिहारस्त्वेवं, अतिपीनत्वात्परस्परसंसक्त अत्युच्चत्वात्क्षमाधरमपि गिरिमपि अतिशायि, तत्स्तनमंडलं वर्तुलत्वेन शोभितं॥ 'वृत्तस्तु वर्तुलेऽतीते मृते ख्याते दृढे वृते। त्रिषु वृत्तं तु चरिते वृत्तं छंदसि वर्तते' इति विश्वलोचनः॥ ४ यस्स्तनद्वंद्वं करिकुंभयुग्मे न मत्सरमपि समत्सरमिति विरुद्धं, तत्परिहारः नमत्सरो हारः यत्र इत्यभिप्रायेण भवति। करिकुंभयुग्मतोऽपि नयनमनोहरत्वादुच्चैस्त्वाच्च समत्सरमिति भावः। ५ धूतदरमपि तिरस्कृतशंखमपि कंठतलं कांतमहादरविराजितं शोभनमहाशंखसुंदरमिति विरोधः। परिहारस्त्वेवं तस्याः कंठतलं तिरस्कृतशंखं निजपतिमहानुरागविराजितं चेति विरोधपरिहारः। ६ अधरस्तु बहुलौहित्येन युक्तोऽतः तिरस्कृतकोमलकिसलयकान्तिरथवा तिरस्कृतालक्तकरागः॥ 'पल्लवो विस्तरे खड्गे शृंगारालक्तकरागयोः'॥ इति विश्वलोचनः। १७ विशालनयनद्वंद्वं कर्णस्नेहयुक्तं सदपि वासुदेवार्जुनप्रीतियुक्तमिति विरोधः एवं परिन्हियते। अस्या नेत्रौ श्रोत्रस्नेहपरायणौ आकर्णदीर्घौ तथा श्यामश्वेतकांतिव्याप्तौ। 'कर्णः श्रोत्रे पृथासुते' इति विश्वलो०।

पुनः कृत[1]राजविद्वेषमपि राजोल्लासमादधानं, भोगहितमपि नैभोग[2]हितं विरराज ॥

महाबलख्यातसुतस्तयोरभून्महोदयः सर्वकलासु कोविदः।
सुतेषु भिन्नेष्वपि सत्सु यन्मयी प्रमोदवल्ली ववृधे महीशितुः ॥२३॥

कलासरणिलासिकां[3]विविधलास्यरंगस्थली-
निकाशरसनांचलो[4] निखिलकोविदोल्लासकः[5] ॥
यशःकुसुममाधुरीमुदितामरी[6]वं[7]भरी-
स्वरप्रसरपूरितात्रिभुवनः कुमारो बभौ ॥ २४ ॥

कलाविलासदनं कांतिकेलिनिकेतनं ।
महाबल इति ख्यातं मूर्तं तेजो व्यजृंभत ॥ २५ ॥

नभश्चरधरापतिस्तदनु यौवराज्ये पदे
कुमारमिममादिशत्कमलबंधुकल्पप्रभं ।
नृपे नृपसुते तदा पृथगवस्थिता श्रीर्बभौ ।
हिमाद्रिकटके पयोनिधिजले च गंगा यथा ॥ २६ ॥

अथ कदाचन व्योमचरवसुधाधिपतिः संसारविषयसंजातनिर्वेगः प्रस्थितानादिकर्मबीजप्ररोहप्ररूढकांडां, जननादिकुसुमकोरकितां, व्यसनफलविलसितामसुभृत्कदं[8]बकलोलंबचुंबितां संसारवल्लरीं ध्यानकुठारेण निर्मूलयितुकामः, कामपि चिंतां मनसा गाहमानः, तत्क्षणमेव महामंत्रि-

---

१ चंद्रेण विद्वेषं तनुते तथापि चंद्रमानंदयति इति विरोधे परिहारः एवं, चंद्रादपि अधिककांतिसंपन्नं तथा राज्ञः अतिबलनृपतेः आनंदकरमिति।
२ नभसा गच्छति इति नभोगः अतिबलो विद्याधरनृपतिस्तस्य हितकरं ।
३ नर्तकी। ४ जिव्हाप्रांतः। ५ विद्वन्मोदकः ६ भ्रमरी । ७ वाणी
८ समूहः। ९ भ्रमरः

मंडलसामंतसंदोहशुद्धांतपुरुषजनेभ्यो निवेदितनिजोदन्तः, समस्तदिगंतविकासितललितयशोविलसितलतांताय[1], प्रकृतिजनमनःकुमुदकुमुदिनीकांताय[2], सकललोकलोचनानंदाय महाबलाय अभिषेकपुरःसरं प्रतिपादितराज्यभारो व्यपेतबंधन इव गंधसिंधुरः क्रमेण निजमंदिरान्निर्गत्य, विद्याधरवसुमतीवल्लभैरनुगम्यमानः[3] संसारदुःखशमनदक्षां जैनीं दीक्षामासाद्य सुचिरं तपश्चचार॥

ततो धीरोदारः[4] सकलखगभूमीशमकुटी-
तटीशोभद्रत्नप्रतिफलितपादांबुजयुगः।
दधे दोष्णा[5] राज्यश्रियमतिबलस्यात्मजवर
प्रजारक्षादक्षः सकलगुणसंकेतसदनं ॥ २७ ॥

यस्मिन्महीपाले महीलोकलोकोत्तरप्रसादशातकुंभमयस्तंभायमानेन[6] निजभुजेन धरणीमंगदनिर्विशेषमाबिभ्राणे[7], बंधनस्थितिः[8] कुसुमेषु चित्रकाव्येषु च, अलंकाराश्रायता[9] महाकाविकाव्येषु कामिनीजनेषु च, घनमलिनांबरता[10] प्रावृषेण्यदिवसेषु कृष्णपक्षनिशासु च, परमोहप्रतिपादनं[11]

---

१ लतांतं कुसुमं। २ चंद्राय। ३ पृथ्वीपतिभिः। ४ धीरश्चासौ उदारश्च पंडितो दाता च। ५ दोष्णा भुजेन 'भुजबाहू प्रवेष्टो दोः' इत्यमरः। ६ सुवर्णनिर्मितस्तंभसदृशेन। ७ केयूरं। ८ वृन्तस्थितिः पुष्पेषु, चक्रबन्धादिबंधनं चित्रकाव्येषु. न तु तत्रत्यजनानां रज्ज्वादिबंधनं। ९ उपमाद्यलंकाराणां, केयूरादिभूषणानां च। तत्रत्यजनानां अलं अतिशयेन कारागृहे कदर्थनादिकं नेति भावः। १० मेघश्यामाकाशत्वं वर्षाकाले निबिडतमोयुक्ताकाशत्वं च कृष्णपक्षयामिनीषु। न तत्रत्या जनाः मलिनवस्त्रधारिणः। 'अम्बरं व्योम्नि वाससि' इत्यमरः'। ११ प्रमाणशास्त्रेषु न्यायशास्त्रेषु परम-ऊहप्रतिपादनं अतिशयेन तर्कस्वरूपवर्णनं. ललनाजनगात्रेषु च पर-मोहोत्पादनधर्म आसीत्।

प्रमाणशास्त्रेषु युवतिजनमनोहरांगेषु च, शुभकरवालशून्यता कोदंडधारिषु कच्छपेषु च परं व्यवतिष्ठत ॥

येन पाणौ गृहीतापि समरे समरोत्सिका ॥
परेषामादधे चित्रं कर्णालिंगनमंगलम् ॥ २८ ॥
नृतंत्यां यस्य हस्ताब्दे समरे खड्गविद्युति ॥
शत्रुस्त्रीनयनांतेषु चित्रं वृष्टिरजायत ॥ २९ ॥

तदनु सकलदिक्सुंदरीसंदोहमणिमुकुरायमाणप्रतापदिनकरोदयपूर्वशिखरिशिखरायमाणभुजदंडस्य बलोद्दंडस्य महाबलमहीपालप्रकांडस्य पीयूषरस इव सागरस्य, चंद्रोदय इव प्रदोषस्य, वसंतसमय इव कुसुमारामस्य, सुरचापोद्गम इव जलधरसमयस्य, कुसुमप्रसव इव कल्पपादपस्य, सूर्योदय इव सारसवनस्य, कलाप इव कलापितरुणस्य, यौवनारंभः प्रादुरास ॥

---

१ धनुर्धारिषु खड्गशून्यता, कच्छपेषु कूर्मेषु बालशून्यता रोमराहित्यं। तत्रत्य जनानां शुभकरयोः अभयशून्यता नासीत् । २ येन महाबलनृपेण पाणौ गृहीता करे धृता पक्षे विवाहिता समरोत्सिका खड्गः समरे युद्धे परेषां शत्रूणां कर्णालिंगनमंगलं कर्णालिंगनसुखं जनयति इति आश्चर्यं । महाबलेन राज्ञा ऊढा अन्येभ्यः आलिंगनसुखं विदधाति इति आश्चर्यं, विरोधपरिहारस्त्वेवं, अनेन राज्ञा धृतः खड्गः समरे शत्रूणां कर्णमालिंगति अर्थात् तेषां कंठप्रदेशे पतित्वा तान्व्यापादयति इत्यर्थः । ३ युद्धे यस्य नृपतेः करकमले मेघे खड्गरूपायां शंपायां नृत्यमातन्वत्यां सत्यां शत्रुललनानेत्रसमीपप्रदेशेषु वृष्टिरजायतेति आश्चर्यं यत्र विद्युद्द्योतते तत्र वृष्टिभवनं उचितं परमन्यत्र वृष्टिभवनं आश्चर्यावहं । भावस्त्वयं अनेन नरेंद्रेण खड्गेन रिपवो मारिता अतो हेतो रिपुस्त्रियो रोदनं कुर्वन्ति । ४ प्रदोषो रजनीमुखं । ५ कमलवनस्य ।

तदा तादृग्रूपं प्रकटमभवत्खेचरपतेः
यदालोक्य व्रीलत्तनुमसमबाणोऽपि विजहौ ।
नभोगस्त्रीनेत्रभ्रमरनिकराकर्षणकला-
धुरीणं यत्प्रोद्यत्तरुणिमसुमामोदसुरभि ॥ ३० ॥
खेचरीचित्तलोहानामयस्कांतशलाकिका ।
तस्य प्रजाभागधेयं रूपधैर्यमजृंभत ॥ ३१ ॥

तस्य च राज्ञो निखिलकलावगाहगंभीरबुद्धयो नीतिशास्त्रपारावार दृश्वानः, सकलभुवनराज्यभारार्णवकर्णधाराः, कृच्छ्रेष्वपि कार्यसंकटेषु प्रसन्नमतिविभवाः धामानि धैर्यस्य, स्थानानि स्थैर्यस्य, सेतवः सत्यस्य, प्रवाहाः करुणारसस्य, विहारसदनानि राजभक्तेः, सागराः प्रजासंतोषामृतस्य, निर्भरमुपरूढप्रेमरसा महामति--संभिन्नमति--शतमति--स्वयंबुद्धनामानश्चत्वारः सचिवाः सबभूवुः ॥

समस्तशास्त्ररत्नानां निस्तुल्यनिकषोपलः ॥
स्वयंबुद्धोऽभवत्तेषु सम्यग्दर्शनशुद्धधीः ॥ ३४ ॥
खगानां राजापि प्रशमितविपक्षव्रजतया
गताशंकातंकः सकलखचरश्लाघ्यमहिमा ॥
अमात्येषु न्यस्तक्षितिवलयभारोऽनुबुभुजे ॥
निजस्त्रीभिः सार्कं खगसमुचितान्भोगविभवान् ॥३५॥

---

१ मदनः । २ विद्याधरललनाः ३ लोहचुंबकसूची । ४ सौंदर्ये । ५ अयं महाबलो भूपालः खगानां पक्षिणां राजापि भूत्वा गरुडोऽपि भूत्वा प्रशमितविपक्षव्रजतया गताशंकातंकः प्रणाशितपक्षिपक्षसमूहतया भयव्यथारहितोऽभवदिति विरोधः । परिहारस्त्वेवं खेचराणां अधिपो भूत्वा प्रशमितारिसमूहः सन्भयव्यथाहीनोऽभूत् ।

अबलौघोऽपि भूपालो दिक्षु ख्यातमहाबलः ॥
नभोगोऽपि स्वयं भोगान्विविधान्बुभुजे चिरं ॥ ३६ ॥

तथाहि कदाचिदसौ महाबलमहीपालो मेदुतरमंदारवनवाटीपर्यटनसुरभिलमंदानिलचालितस्तनकोटीनां वधूटीनां चंदनरसच्छटाभिरिव स्मितसुधाकान्तिझरीभिरभिषिच्यमानः, कर्णपूरीकृतनीलोत्पलैरिव नयननिर्गलद्रोचिर्वीचिभिस्ताड्यमानः, कुंकुमवासधूलिभिरिव मणिभूषणगणकमनीयकांतिकल्लोलैः पल्लवितांगः, कोमलकुसुमकुलैरिव नखमयूखजालकैरवकीर्यमाणः, चंपकदामभिरिव भुजलताभिरावध्यमानश्चिरं रजतमहीधरे महारंजतमहीध्र इवामर्त्यपतिर्विजहार ॥

विचित्रनानावाद्दित्रनादनादितदिक्तटः ॥
जातुचित्तस्य ववृधे वर्षवृद्धिमहोत्सवः ॥ ३५ ॥

तदानीं खलु निखिलगगनचरमणिमकुटमकरिकानिकर्षणरेखाविलसितपदकमलयुगलं, अनेकरत्नाभरणकिरणजालकांतैरितावयवं, इंद्रायुधसहस्रसंछादितमिव कनकशिखरिणं, धैर्यगुणविजिते सेवार्थमागत इव हेमाचलशृंगे तुंगतममंगलसिंहासने समासीनं, निजवदनविजितविजयपराभवप्रणत इव शशिबिंबे स्फटिकमणिपीठे विन्यस्तवामपादं, मंवरचरांगनाकरपल्लवोल्लासितहेमचामरपवनविलोलविमलदुकूलांचलं, अतिप्रचंडमंडलीकमहासामंतप्रधानमंत्रिपुरोहितान्तर्वंशिकादिपरिवारपरिवृतं, आस्थानमंडप-

१ अबलैः बलरहितैर्नियुक्तोऽपि नृपोऽयं दिशासु विदितमहासामर्थ्योऽभवदिति विरोधः । परिहार एवं—अबलाभिः स्त्रीभिः युक्तोऽयं नृप आसीत्तथा सकलदिग्वलये महाबल इति नाम्ना विदितः । यो भोगी न भूत्वापि भोगान्बुभुजे इति विरोधः । परिहारोयं—नभसा गच्छति इति नभोगः खेचरः । २ कुचांशुकानां ३ विजयार्धपर्वते । ४ सुवर्णमेरौ । ५ अमर्त्यानां देवानां पतिरिन्द्रः । ६ संघर्षणं । ७ आच्छादितं । ८ इंद्रधनुः ।

गतं भीतं महाबलक्षितिपतिमवलोक्य स्वयंबुद्धसचिवः प्रस्तावितधर्मकथाप्रस्तावस्तत्प्रतिष्ठापनाय दृष्टश्रुतानुभूतार्थसंबंधिनीमिमां कथां व्याजहार ॥

राजन्! राजस्वमानवक्त्र भवतो वंशे विशाले पुरा ॥
चंद्रोऽभूदरविंदनामविदितः प्रत्यर्थिदावानलः ॥
श्रीरस्तस्य नृपस्य तस्य विजयादेवी बभूव प्रिया ॥
कान्त्या कोमलया निराकृतवती राकेंदुबिंबानना ॥ ३६ ॥
तयोर्बभूवतुः पुत्रौ विद्यावैशद्यशोभितौ ॥
आदिमो हरिचंद्रश्च कुरुविंदस्ततोऽपरः ॥ ३७ ॥

स खलु कदाचन खेचरकुंभिनीपतिर्बव्हारंभपरंभवविजृंभितरौद्रध्यानाभिसंधानसंदानितनरकायुष्यः, प्रत्यासन्नमृतिर्दाविपावकज्वालानिकाशदाहज्वरबाधां सोढुमक्षमतया पुण्यक्षयपरिणतनिजविद्यावैमुख्येन च दमितमदशक्तदंतावल इवातिदीनदशामापन्नः, सीतातरंगिणीतरंगालिंगितलतासुरभितमंदारतरुसंदोहस्पंदमानमंदपवमानसुखोत्तरकुरुवनोद्देशाविहरणाय स्पृहयालुः, निजाज्ञापरिपालननिस्तन्द्रेण हरिचंद्रेण तद्वनोद्देशप्रापणाय प्रेषितायां गगनगामिनीविद्यायां अपुण्यवशेन अनुपकारिण्यां दुर्वारदुःसहसंतापसंपन्नदेहः, कदाचित्कलिविश्लिष्टगोधिकाबालधीविगलितशोणितबिंदुसंदोहसंपर्कशांतसंतापः, पापवशेन रुधिरवापीमज्जनमेव परमौषधं मन्यमानः,तद्वापीकरणाय समाज्ञप्तेन कुरुविंदेन पापोद्विग्नस्वान्तेन कारितायां कृत्रिमक्षतजवापिकायामतिसंतोषेण विहरमाणः,

---

१ इंदुसमवदन। २ अरविंदनामा। ३ पूर्णिमाचंद्रवदना। ४ पृथ्वी 'कुंभिनीलावंरा चोर्वी। इत्यमरः। ५ संबद्धं। ६ करी। ७ सुगंधित। ८ मुसली पहगोधिका पाल इति महाराष्ट्रभाषायां। ९ रक्तम्।

कृतगंडूषः विज्ञातरुधिरकृतकभावः, क्रोधेन कुरुविंदवधाय वीतवेगस्तरसा मध्ये निपत्य निजासिधेनुकाविदीर्णहृदयो मृतिमाससाद ॥

एवं पापविपाकेन दुर्मृतिमाप्तदुर्गतिः ॥
एष इत्यधुनाप्यत्र कथयं स्मर्यते जनैः ॥ ३८ ॥

तथा भवद्वंशाकाशचंडभानुर्दंडितारातिमंडलःप्रचंडतरभुजदंडो दंडो नाम व्योमचरपतिर्मणिमालिनामधेयं निजनंदनं यौवराज्ये नियोज्य, निरंतर-विविधान्भोगाननुभुंजानोऽपि तृप्तिमलभमानः,तीव्रसंक्लेशपरिणामसंकल्पित तिर्यगायुः,जीवितांतकालिकदुर्ध्यानवैभवविजृंभितदुर्मरणो निजभांडागारे समजायत महानजगरः ।

भवस्मरणसंभूतभांडागारमहादरः ॥
सोऽनुमेने निजं सूनुं तत्प्रवेशे न चापरं ॥

अन्येद्युरसौ मणिमालिनामा खेचरपतिरवधिज्ञानलोचनान्मुनिविकर्तना-द्विज्ञाताजगरोदंतः, पितृभक्त्या शंयुं पुरोधाय "भवान् विषयासंगदोषवि-शेषेण कुयोनिं प्राप्तस्तद्विषयामिषमिदं किंपाकफलसंकाशं, तांबूलमिव संयोगाधीनरागसंपादकं, अंधकारमिव सन्मार्गनिरोधनं, स्याद्वादमतमिव परिहृतमतांतरं, तडिल्लताविलसितमिव चलाचलं, सुरशरासनमिव विचित्रं, दुस्त्याज्यमपि त्याज्यमेवाति" इति बोधयामास ।

१ कृतनिष्ठीवनः । २ छुरिका । छुरिकाचासिधेनुका' इत्यमरः । ३ विकर्तनः सूर्यः ४ अजगरं । ५ यथा तांबूलं नागवल्लीदलचूर्णक्रमुकादिसंयोगाल्लौहित्यसंपादकं भवति तथैवैतद्विषयामिषं पुत्रकलत्रादिसंयोगे जाते सति प्रीतिमावहति । ६ तमो यथा कंटकरहितं सन्मार्गं न दर्शयति प्रत्युत तत्प्रतिरोधकं भवति तथा अनेन विषयामिषेण मोक्षमार्गो निरुध्यते । ७ स्याद्वादमतं यथा मतांतराणि निराकरोति तथा इदमपि विवेकशक्तिं ह्रासयति । उक्तं च महापुराणे जिनसे-नाचार्यपादैरपि-तांबूलमिव संयोगादिदं रागविवर्धनं॥अंधकारमिवोत्सर्पत्सन्मा-र्गस्य विरोधनं॥ जैनं मतमिव प्रायः परिभूतमतांतरम् ॥ तडिल्लसितवल्लोलं वैचित्र्यात्सुरचापवत्॥ उपर्युक्तगद्यांशः इमां श्लोकसरणिमनुसरति ॥

ततस्तनयवाङ्मयप्रचुरशर्मधर्मामृतै-
निरस्तविषयस्पृहः स खलु जीवितांते पुनः ॥
समाधिमरणं व्रजन्दिविजभूयमायातवान् ।
महर्द्धिपरिमंडितो महितदिव्यदेहोज्ज्वलः ॥ ४० ॥
अवधिज्ञानविज्ञातप्राग्भवः सुर आगतः
प्रादान्मणिमयीं मालां प्रपूज्य मणिमालिनम् ॥४१॥
सेयं माला मणिगणलसत्कांतिकल्लोलजाल-
व्याप्तप्रांता विलसति भवद्वक्षसि श्रीनितांते ॥
प्रालेयाद्रेः कटकनिकटे संपतंतीव गंगा ।
लक्ष्म्या लीलाहसितरुचिवत्कीर्तिबीजालिवच्च ॥४२॥

एवं पुरा भवदीयपितामहः शतबलो नाम विद्याधरक्षोणीवल्लभो राज्यलक्ष्मीं सुचिरमनुभवन्भवत्पितरि विन्यस्तसमस्तराज्यभारः सम्यग्दर्शनादिसंपन्नः सुध्यानेन त्यक्ततनुर्महेंद्रकल्पे सुराग्रणीः संजातः। स कदाचिन कांचनशिखरिशिखरे नंदनवने मया सह खेलंतं भवंतं समीक्ष्य अपारस्नेहपूरितमानसो ' जैनधर्मं लोकोत्तराभ्युदयसाधनं कदापि न विस्मरेति ' समादिदेश । तथा भवत्पितृपितामहोऽपि निखिलखेचरमुकुटराजिनीराजितचरणनीरेजः सहस्रबलः शतबले सुते निक्षिप्तराज्यभारः जैनीं दीक्षामासाद्य तपोंशुप्रकाशप्रकाशितमहीवलयः क्रमेणोत्पन्नकेवलज्ञानः समागतसुरासुरादिभिरभ्यर्चितः शाश्वतं पदमुपजगाम ॥

तथा भवत्पिता धीरस्त्वयि न्यस्तमहीभरः ॥
प्रव्रज्यामाश्रितः श्रीमान्प्राप्तवैराग्यवैभवः ॥ ४३ ॥

---

१ देवभूयम् । २ हिमगिरेः । ३ पृथ्वीपतिः । ४ मेरुगिरिशिखरे ५ मोक्षस्थानं ।

भवानपि महाधीरो भवद्वंशनराधिपैः ॥
साकं तपश्चरन्नेष मोक्षलक्ष्मीं जिघृक्षति ॥ ४४ ॥
धरापते ! ध्यानचतुष्टयस्य फलं विनिर्दिष्टमवेहि तत्र ॥
पूर्वद्वयं पापफलं प्रतीतं परद्वयं प्राप्तशुभप्रवाहम् ॥ ४५ ॥

इति जिनाधीशदर्शितधर्मदेशनाप्रकाशबद्धादरं प्रवादिमदकंडूलवनशुंडालपंचाननं स्वयंबुद्धं तद्वचनमधुधारामधुकरायमाणप्रीतांतःकरणेन धरारमणेन परिष्कृता परमास्तिक्यमास्थिता सभा सभा सभाजयामास॥

वाणीं श्रुत्वा खगाधीशो द्रोणीं संसारवारिधेः ॥
स्वयं संपूजयामास स्वयंबुद्धं महाधियम् ॥ ४६ ॥
स्वयंबुद्धः सोऽयं सकलगुणमालाविलसितः ॥
कदाचित्सद्भक्त्या जिनपतिगृहान्वंदितुमनाः ॥
ययौ कल्याणाद्रिं कनकरुचिलीलाकपिशिता—
वराभोगं शृंगोल्लिखितसुरलोकं सुरुचिरम्॥ ४७ ॥

यः किल पिहितांबरोऽपि विलसदंशुकः, मेरुरपि समाश्रित[illegible]न-

---

१ पूज्योऽयमतिबलोऽपि । २ ग्रहीतुमिच्छति ३ वनकरी । ४ सिंहः। ५ भया कांत्या सहिता इति सभा कांतिसहितेत्यर्थः । ६ आदरं चकारेत्यर्थः । ७ द्रोणी काष्ठांबुवाहिनी । ८ गृहाः पुंसि च भूम्न्येव । ९ आच्छादितवस्त्रोऽपि शोभमानवस्त्रः इत्यत्र किमाश्चर्यं । पक्षे व्याप्ताकाशोऽपि शोभमानकिरणः। 'किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः' 'वस्त्रं वसनमंशुकं'इत्युभयत्राप्यमरः । १० मेरुरपि समाश्रितनमेरुरिति विरोधस्तत्परिहार एवं। सम्यगाश्रिता नमेरवो छायावृक्षा येन ।

मेरुः, स तामरसं¹पदं दधानोऽपि नतामरसंपदं दधानः, बहुलताग-हनो²ऽपि निरस्ततमोभरः, मरालि³महितनंदनवनोऽपि अमरालिमहित-नंदनवनः, रजस्फुर⁴णपरिशोभितोऽपि नीरजस्फुरणपरिशोभितः, संततमगम⁵हितोऽपि नागमहितो विराजते ॥

त्रिद⁶शोपसेवितो यः प्राज्यावि⁷राजितरुचिर्महामेरुः
लक्ष्मीविलासगेहे जंबूद्वीपे विभाति दीप इव ॥ ४८ ॥

तत्र किल विचित्राचिरंतनरत्नरचितानेकरसभंगिसंगतसुरांगनासं-चरणसंचलत्कनककिंकिणीमृदुनिनादमनोहराणित्यालोकानकृत्रिमचैत्या-लयान्यथाक्रममासाद्यानम्य च प्रमोदलहरीपरीवाहप्लावितान्तःकरणः सौमनसवनपौरस्त्यदिग्भागभासमाने जिनभवने कृतभगवत्सपर्याचर्यः पर्याप्तभाग्यः क्षणं निषसाद ॥

---

१ तामरसपदं दधानोऽपि नतामरसपदं दधान इति विरोधः। तत्परिहारश्चायं—तामरसानां—कमलानां पदं स्थानं सरांसि दधानो धार-यंस्तथा नतानां नम्राणां अमराणां देवानां संपदं दधानः। नित्यं देवास्तत्र गत्वा क्रीडंते इति भावः। २ बहुलतागहनोऽपि निरस्ततमोभरः बहुलतया कृष्णपक्षतया गहनोपि व्याप्तोऽपि निरस्ततमोभरः दूरीकृततिमिरप्रसरः इति विरोधस्य परिहारः—बहुलतानां बह्वीनां लतानां गहनानि अरण्यानि यत्र एतादृशः। ३ मरालिभिः हंसीभिः। अमरालिभिः देवश्रेणीभिरिति विरोधपरिहारः। ४ रजः परागस्तस्य स्फुरणेन शोभि-तोऽपि नीरजस्फुरणपरिशोभितः नीरजानि कमलानि तेषां स्फुरणं विकसनं तेन परिशोभितः इति अविरुद्धं। ५ संततं अगमहितोऽपि पर्वतेषु मा-न्योऽपि नागमहितः न पर्वतमान्यः इति विरोधस्य परिहारः—पर्वतेषु मा-न्यस्तस्था नागाः नागकुमार इति देवविशेषः तेन महितः मान्यः नागश-ब्दोऽत्रोपलक्षणं तेन सर्वे देवा गृह्यन्ते। ६ त्रिदशा देवाः पक्षे पर्विंशत् ७ प्राज्यं उत्कृष्टं पक्षे प्रकृष्टं आज्यं घृतं।

अथागतौ पूर्वविदेहरम्यकच्छाख्यदेशान्नगरादरिष्टात् ॥
देशिष्ट सोऽयं धुरि चारणौ द्वौ मुनीश्वरौ मान्यगुणाभिरामौ ।

तौ किल प्रवाहौ करुणारसस्य, सेतू संसारांबुधेः, महामंत्रौ क्रोधभुजगस्य, दिवसकरौ मोहांधकारस्य, आलवालदेशौ जिनभक्तिवल्ल्याः, राजहंसौ युगंधरमहातीर्थसरस्याः, पूर्वान्चलाववधिज्ञानदिनकरोदयस्य, मुनिपुंगवावादित्यगत्यरिंजयनामधेयावभ्येत्याभ्यर्च्य च मुहुर्मुहुः प्रणम्य सुखासीनः स्वयंबुद्ध एवं पृच्छांचक्रे ॥

महाबल इतीरितः सकलखेचराधीश्वरः
पुरे वसति नः प्रभुः स किल भव्य एवाथवा ॥
अभव्य इति संशयो मम हृदालये खेलति
क्षमागुणमणेः खनी ! सह तदीयजिज्ञासया ॥ ५० ॥
प्रश्नाभिधं मधु निगीर्य निरुक्तरीत्या
तस्याथ भालदधरोष्ठदले मुखाब्जे ॥
आदित्यगत्यभिध एष मुनिर्मुखाब्ज-
हर्षाय सूक्तिकिरणान्प्रकटीचकार ॥ ५१ ॥

" भो सचिवोत्तंस[1] ! असौ भवत्स्वामी भव्यो भव्य एव भवदीय वचनशैलीं प्रत्येष्यति[2],प्राप्स्यति च दशमजन्मन्यस्मिञ्जम्बूद्वीपस्यालंकारभूते भारतखंडे युगारंभे प्रचुरागण्यपुण्यवशेन तीर्थंकराग्रगण्यतां, सकलसंक्रंदन[3]प्रमुखवृंदारक[4]संदोहवंदनीयतां च ॥

*अतीतभवमेतस्य प्रतीतयशसः[5] शृणु ॥

---

१ भो सचिवभूषण । २ विश्वसिष्यति । ३ इंद्रः। ४ देवसमूहः। ५ प्रख्यातकीर्तेः ।

* इतोऽतीतभवं चास्य वक्ष्ये शृणु समासतः । धर्मबीजमनेनोप्तं यत्र भोगेच्छयान्वितम् ॥ महापुराणे जिनसेनाचार्यविरचिते पंचमपर्वणि

धर्मबीजं हि यत्रोप्तं शर्मभोगेच्छयाऽमुना ॥५२॥

विख्यातपश्चिमविदेहविराजमान-
श्रीगंधिलोल्लसितसिंहपुरे व्यराजत् ॥
श्रीषेणनामधरणीरमणः प्रियास्य ॥
श्रीसुंदरीति विदिता भुवनैकरम्या ॥५३॥
जयवर्मेति विख्यातो ज्यायान्पुत्रस्तयोरभूत् ॥
श्रीवर्मेति कनीयांश्च समस्तजनताप्रियः ॥५४॥

तदनु श्रीषेणभूपाले जनानुरागमुत्साहं च समीक्ष्य कनीयसि राज्यपट्टमातन्वाने, खर्वेतरनिर्वेदो जयवर्मा स्वयंप्रभगुरोः पार्श्वे गृहीतदीक्षो नवसंयत एव अपरमिव सूर्यमधिनभस्थलमायांतं महर्द्धिसमेत व्योमचराधिपतिमुच्चक्षुर्वीक्षमाणस्तद्भोगप्राप्तिचिंतादंतुरितस्वान्तः, वल्मीकबिलनिर्गतदंदशूकनिर्दष्टतनुर्भोगचिंतयैव संत्यक्तासुः, संप्राप्तमहाबलभवः संततं भोगेष्वेव चिरतरमरज्यत ॥

इदानीं खलु निशायां विशांपतिः स्वप्ने त्रिभिर्मलिभिर्दुष्पंके बलान्निमज्यमानमात्मानं ततस्त्वया दुष्टांस्तान्निर्भर्त्स्य पंकादुद्धृत्य, हरिविष्टरे विमलतरसलिलैरभिषिक्तं कांचन कांचनसूत्रपिंडसच्छायां सौदामिनीलतामिवातिलोलामनुक्षणं क्षीयमाणां दीपज्वालां च क्षणदाक्षये विलोकयामास ॥

स्वप्नाविमौ खेचरभूमिपालो दृष्ट्वा भवन्तं प्रतिपादयन सः ।
आस्ते त्वमेवाशु समेत्य पूर्वं स्वप्नद्वयं बोधय साधुबुद्धे ॥५५॥
आद्यस्वप्नमवेहि त्वं साध्यपुण्यर्द्धिसूचकं ॥

---

१ चिंताव्यामग्नमानसः । २ अहिः । ३ प्रभातसमये ।

आह द्वितीयस्वप्नस्तदायुर्मासावशिष्टतां ॥ ५६ ॥

* एष किल मुक्तिमानिनींदूत्येव काललब्ध्या प्रबोधितः पृथ्वीपतिस्तृषितचातकपोत इव बलाहककुलविगलितजलबिंदुसंदोहे, आत्यंध इव अनंधंकरणचणपरमौषधे, दुर्गत इव निरवधिकनिधिनिधाने भवतोपादिष्टे सद्धर्मे परमां श्रद्धां विधास्यति ॥"

इति निगद्य सुधामधुरां गिरं मुनियुगे गगनस्थलमुद्गते ॥
सचिव एष जवेन महाबलं प्रतिजगाम युगायतसद्भुजम् ॥५७॥
समासाद्य भूपं समाचष्ट सर्वं स्वयंबुद्ध एष स्वयं योगिवाक्यं॥
जिनेंद्रोक्तधर्मं मुनीन्द्रोपलाल्यं कुरु क्षेमवृद्ध्यै क्षितीशेति चाह।

तदनु स्वयंबुद्धवचनगुंफविस्रंभविजृंभितस्वायुःक्षयनिश्चयो विपश्चिदग्रगण्यः खचरपतिर्यथाविधितनुत्यागं विधातुमना, मनागितरमनोहरनिजमंदिरारामसुंदरजिनचंदिरशुभमंदिरकंदालिताष्टान्हिकमहोत्सवः, सकलनयनसंतोषकल्पभूजाय निजतनूजाय प्रजाभागधेयाय अतिबलनामधेयाय प्रतिपादितराज्यभारः, सिद्धकूटमुपेत्य सिद्धार्चनपुरःसरं द्वाविंशतिदिनानि सल्लेखनाविधिमुल्लासयामास ॥

आराधनानावमुपेत्य भूपो भवांबुराशिं सहसा तितीर्षुः ॥
संत्यक्तबाह्यान्तरसंग्रहस्तन्निर्यापकं मंत्रिवरं न्ययंच्छत् ॥५९॥
तपस्यतस्तस्य शरीरवल्ली यथायथेयं तनिमानमागात् ॥
तथा तथाऽवर्धत कांतिर्भूमा प्रकाशिताशेषदिगंतसीमा ॥६०॥

---

* तृषितः पयसीवाद्यात्पतिते चातकोऽधिकं । अनुपांध इवानंधंकरणे परमौषधं ॥ रुचिमेष्यति सद्धर्मे त्वत्तः सोऽद्य प्रबुद्धधीः । दूत्येव मुक्तिकामिन्याः काललब्ध्या प्रबोदितः ॥ एतच्छ्लोकद्वयं उपर्युक्तं गद्यमनुसरति ॥

१ मुक्तिस्त्री । २ बलाहको मेघः । ३ दरिद्रः । ४ रथधुरावद्दीर्घप्रशस्तबाहुः । ५ कल्पवृक्षाय । ६ निर्यापकः कर्णधारः पक्षे आराधनाराधकंधर्मोपदेश विदधान आचार्यप्रवरः । ७ नियमितवान् । ८ प्रभाबाहुल्यं ॥

तदानीमुदारतपा महाबलः शारदनीरद इवारूढकार्श्यस्तादात्विक-मरणारंभव्रतमालोक्य क्वापि लीनाभ्यां लोचनाभ्यां विराजमानः, क्षीण-शोणितमांसचर्मभ्यामप्यपरित्यक्तकांतिकंदलाभ्यां कपोलाभ्यां विलसितः, पूर्वं नितांतपीवराभ्यां माणिकेयूरकिणकर्कशाभ्यामधुना तदीयमानसमार्दव-मालोक्येव समाश्रितमार्दवाभ्यामंसाभ्यां संभावितः, त्रिवलीभंगसंगवि-रहितमाभुग्नं निर्वातनिस्तरंगसरोवरसंकाशमुदरप्रदेशमाबिभ्राणः, क्रमेण ललाटतटाविन्यस्तकरांबुजकुड्मलः मंगलानि नमस्कारपदान्यन्तर्जल्पेन जपन्नेव स्वयंबुद्धसमक्षं प्राणांस्तत्याज ॥

आसाद्यैशानकल्पं तदनु स हि शुभे श्रीप्रभे व्योमयाने ॥
राजद्रम्योपपादामलशयनतलेऽजायताऽसौ सुराग्र्यः ॥
तत्र प्रत्यग्रशोभा सपदि तनुलता वैक्रियिक्याविरासीत् ॥
व्योमाभागे निरभ्रे तडिदिव सुचिरादेकशुभ्राभ्रलग्ना ॥६१॥

तारुण्यलक्ष्मीकमनीयरूपस्तदा व्यलासील्ललितांगदेवः ॥
सुप्तोत्थवद्दिव्यदुकूलचेलस्रग्वी लसद्भूषणभूषितांगः ॥६२॥

ललितांग एष ललितांगसंपदा-
तुलितांगजोऽथ कलितांगदोज्ज्वलः ॥
अरुणाब्जशोभिचरणांचितो बभौ-
तरुणेंदुकांतिहरणोल्लसन्मुखः ॥६३॥

तद्वक्त्राब्जरुचिप्रवाहजलधौ श्रीकुंतलालीमिल-
च्छैवाले भ्रुकुटीतरंगतरले बिंबोष्ठसद्विद्रुमे ॥
दंतोदंचितमौक्तिके समतनोन्निष्कंपमीनश्रियं ॥

१ 'प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः' इत्यमरः ।
२ तुलितमदनः । ३ धृतकेयूरशोभितः । ४ शुक्रः ।

नेत्रद्वंद्वमिदं निमेषरहितं निःसीमकान्त्युज्ज्वलम् ॥६४॥

मंदस्मितप्रसरकुंदसुमाभिलाषात्

कर्णावतंसगलितं किल भृंगयुग्मम् ॥

नासाख्यचंपकनिरीक्षणनष्टचेष्टं

नेत्रद्वयं सुरवरस्य तदा विरेजे ॥६५॥

तदनु, कल्पद्रुमवृष्टकुसुमकुलगलितमाध्वीकधारालोलल्लोलंबनिकुरुंबझंकारनिर्भरेण, मंदारवनमंदमंदस्पंदमानसमीराकिशोरचालितस्तनशाटीविलसदमरवधूटीनर्तनचलत्तुलाकोटीमधुररवपरिपाटीप्रचुरेण, सकलजनचित्तचलनावहसुरललनाजनकलनादगीतमनोहरेण, स्वयमेव विजृंभितमंदेतरसुरदुंदुभिस्तनितेन मुखरितादिगंतरे विमानांतरे, ललितांगदेवः किंचिद्वलिता दृशं समंताद्रानमदमरमुकुटतटघटितमणिघृणिकलितप्रकाशासु निखिलाशासु व्यापारयन्नहो किमिदं, कायातः, कोऽहमित्यादिविस्मयाविस्तारितचित्तस्तत्क्षणविलासितावधिविलोचनविलोकितपूर्वभवपरिचितस्वयंबुद्धादिवृत्तांतः, कल्पतरुपरिशोभमानं विमानमिदं, इमे प्रणामतत्पराः सुराः, लास्यलीलाकरोऽयमप्सरःपरिवार इत्यादिक्रमेण सर्वमबुध्यत ॥

जयेश नंदेति गंभीरवाचः सुरास्तदानीं नतमौलिमालाः ॥

विज्ञापयामासुरिदं समेत्य प्रज्ञापयोधिं ललितांगदेवम् ॥६६॥

आदौ मंगलमज्जनं विरचयन्पश्चाज्जिनेन्द्रार्चनां

भक्त्या कल्पय देव मोक्षपदवीप्रासादनिःश्रेणिकां ॥

श्रीमत्पुण्यबलार्जितं बलमिदं दृष्ट्वा समालोकय ।

प्रेक्षस्वाथ मनोज्ञनर्तनकलां स्वर्लासिकोल्लासितां ॥६७॥

---

१ नूपुरं । २ घृणिः किरणः । ३ स्वर्गनर्तकीप्रकटितां ।

सौदामिनीसमानांगीर्देवीस्तदनु लालय ॥
पंचेषुपट्टकरणीः श्रृंगाररससारणीः ॥ ६८ ॥
इति तद्वचनात्सर्वं चकारामरवल्लभः ॥
निसर्गवस्त्राभरणो निष्टप्तकनकच्छविः ॥ ६९ ॥

ततश्चाणिमादिगुणमणिगणरोहणायमानः समानः समासहस्रेण समासादितमानसाहारः पक्षेणैकेन श्वसितसुगंधबंधुरनिश्वाससुरभित-भविभ्रप्रदेशः, शरत्काल इव विधृतविमलांबरः, महाकविवचनोल्लास इव सरसशोभाविभासितः, अंगदमनोज्ञविलासोऽपि अनंगमनोज्ञविलासः, अयं ललितांगदेवो देवीचतुःसहस्रपरिग्रहोऽनवरतोल्लासिताभिरपि नवरतोल्लासिताभिः स्वयंप्रभा, कनकप्रभा, कनकलता, विद्युल्लता नामधेयादिभिः रतिरूपसुभगधेयाभिर्विलासविजितगतिर्देवीभिश्चतसृभिर्महादेवीभिर्विविधान्भोगाननुभुंजानः कालमनल्पमतिवाहयांचक्रे ॥

तदायुर्जलधेर्मध्ये तरला इव वीचयः ॥
भूयो देव्यो व्यलीयंत हतायुष्यतया तदा ॥

एवं पल्योपमपृथक्त्वावशिष्टे तस्यायुषि मूर्तिमतीव अमरसाम्राज्यलक्ष्मीः, संचरंतीव कल्पलता, साकारेव शशिलेखा, स्थिरतामु-

१ मदनोत्तेजनकारिणीः। २ श्रृंगाररसकुल्याः। ३ अंबरं वस्त्रं आकाशं च। ४ महाकविवचनप्रबंधः श्रृंगारादिनवरसकांतियुक्तो भवति। ललितांगदेवोऽपि अनुरागशोभासंपन्नो भवति। ५ प्रथमतो विरोधाभासः तत्परिहारस्त्वेवं अंगदं बाहुभूषणं तेन मनोहरो विलासो लीला यस्य तथा मदनमनोहरहावो यस्य सः। विलासो 'हावलीलयोः' इति विश्वलोचनः। ६ प्रथमं विरोधस्तत्परिहारश्चैवं:— अनवरतं अनिशं उल्लासिताभिः आनंदं प्रापिताभिः तथा नवरतं नवीनः संभोगः तेन उल्हासिताभिः हर्षं प्रापिताभिः

पगतेव सौदामिनी लता, पुंजीभूतेव सकलसौंदर्यलहरी, चित्रलेखेव संसारमहाभित्तेः, ललामवल्लीव त्रैलोक्यस्य, संकेतभूमिरिव लावण्यस्य, लास्यसदनमिव तारुण्यलक्ष्म्याः, उत्पत्तिस्थानमिव कांतेः, आकर्षणमंत्रसिद्धिरिव सकलनयनानां, महौषधसिद्धिरिव मदनमहेन्द्रजालिकस्य, निवासशालेव शृंगारस्य, नाट्यशालेव संगीतविद्यानां स्वयंप्रभानाम देवी समजायत ॥

तस्याः किमिति वर्ण्यते सौंदर्यगरिमा तथाहि

तस्या नेत्रं स्मितं चासीदुच्चैकोरकसन्निभं[1]।
अधरश्चरणश्चापि प्रवालश्रीविशोभितः[2] ॥
अस्या ओष्ठतलं पयोधरयुगं चित्तं च नाकाधिप—
क्रीडोद्यानमिवावभौ मृगदृशश्चंचत्सुरागोज्ज्वलं[3] ॥

---

१ उच्चकोरकसन्निभं दीर्घकमलकुड्मलसमं नेत्रं । स्मितं च श्वेतकमलकलिकातुल्यं । २ अधरश्चरणौ कोमलकिसयलशोभौ विद्रुमकान्तिशोभौ वा । ३ यथा इंद्रनंदनोद्यानं सुरागोज्ज्वलं सुराणां देवानां अगैः वृक्षैः कल्पवृक्षैः उज्ज्वलं भवति तथा अस्या ओष्ठतलं, पयोधरयुगं, चित्तं च सुरागोज्ज्वलं वर्तते । तदेवं:—सुष्ठु रागः सुरागः लौहित्यं तेन उज्ज्वलं, ओष्ठतलं लोहितत्वादुज्ज्वलं शोभते । पयोधरयुगं च सुराणां अगः पर्वतः मेरुरित्यर्थः तद्वत्प्रतिभाति सुवर्णसवर्णे उच्चैश्च शोभते । चित्तं च सुरागोज्ज्वलं सुष्ठु प्रीत्या उज्ज्वलं वर्तते । यथा इंद्रोद्यानं सुमनोजातेन लालनीयं तथा अस्याः स्वयंप्रभायाः केशानां वलयं ' सुमनोजातेन ' पुष्पसमूहेन लालनीयं अभवत् । अस्याः वचश्च ' सुमनोजातेन ' देवसमूहेन लाल्यं मान्यं अभूत् । अस्या वयस्तारुण्यं रूपं च सुमनोजातेन—मदनेन लाल्यं समभवत् ।

केशानां वलयं वचश्च सुमनोजातेन लालयं वयो
रूपं चेति तदंगवर्णनकला पारं गिरां गाहते ॥

ततश्च निजमनोभृंगसंचरणोद्यानवाटिकया तया वधूटिकया सह-ललितांगदेवो वशयेव वशावल्लभः, शचीदेव्येव पुरंदरः, सुंदरमंदरोद्यानवीथिकासु कोकिलकुलकलरववाचालासु, युवतिष्विव सद्रूपशोभितासु, गणिकास्विव विटपालंबितांबरासु, सुंदरीजनवदनतटीष्विव सुपर्वराजमनोहरासु, अन्येषु च नीलाचलखचराचलप्रभृतिवनोद्देशेषु चिरतरमरमत ॥

स्वयंप्रभासंगमलाभसौख्यपयोनिधौ मज्जनमाचरन्सः ॥
उदीतमात्मन्यनिमेषशद्धमन्वर्थतामेष निनाय देवः ॥७२॥

१ वशा हस्तिनी ' करिणी धेनुका वशा ' इत्यमरः । २ मंदरोद्यानवीथिकाः सन्तश्च ते द्रवश्च वृक्षाः तैः उपशोभिताः प्रशस्तवृक्षोपेताः अर्थात् कल्पवृक्षोपेताः युवतय इव । युवतयः सच्छोभनं रूपं सौंदर्यं तेन शोभिताः । ३ गणिकाः विटपैः खिड्गैः—कामुकैः आलंबितं वस्त्रं यासां ताः । मंदरोद्यानवीथयश्च विटपैः पल्लवैरालंबितं अंबरं आकाशं याभिस्ताः। विटपोऽस्त्री लतास्तंबखिड्गविस्तारपल्लवे इति विश्वलोचनः । ४ सुंदरीजनवदनतट्यः सुपर्वणः पौर्णमास्याः राजा चंद्रस्तद्वन्मनोहरास्तथा मंदरोद्यानवीथयश्च सुपर्वणां देवानां राजा इंद्रस्तेन मनोहराः। सुपर्वाणःसुमनसस्त्रिदिवेशा दिवौकसः इत्यमरः । ५ अनिमेषो देवः मत्स्यश्च । यथा अनिमेषः मत्स्यः पयोनिधौ मज्जनं करोति तथा अयमपि ललितांगो देवः स्वयंप्रभासंगमजनितसुखसागरे मज्जनं कुर्वन्ननिमेषशद्धं सार्थकं व्यधात् ॥ ' सुरे मत्स्येऽप्यनिमिषः सुरे मत्स्येऽनिमेषवत् ' इति विश्वलोचनः ॥

अर्हद्दासहृदालवालवलयाज्जातो बुधैः संस्तुतः।
प्रोन्मीलत्स्तवकोल्लसन्नवरसैरानंदमुद्वेलयन् ॥
मान्यश्रीपुरुदेवचंपुविदितः कल्पद्रुमोऽनल्पकं ॥
नृणामाश्रयिणां फलं वितनुतामाचंद्रताराावधि ॥ ७४ ॥

*** इति श्रीमदर्हद्दासकृतौ पुरुदेवचंपुप्रबंधे प्रथमस्तवकः ***

---

१ अयं पुरुदेवचम्प्वभिधः कल्पतरुः अर्हद्दासमहाकवेर्हृदयालवाले जातः, विबुधैर्देवैश्च स्तुतः, विकसत्स्तवकेषूत्पन्नशृंगारादिरसैर्विबुधानामानंदमुद्वेलयति ॥ अयं कल्पवृक्षः आचंद्रताराावधि अस्यालंबनं कुर्वतां जनानां विपुलं फलं प्रयच्छत्विति शम् ॥

अथ द्वितीयः स्तबकः ।

अथ कदाचिदस्य देवस्य भूषणमहितमसृणमणिगणेषु पूर्ववन्निशांतदीपस्वरूपेषु, सहजविशालवक्षःस्थलसंगतमालायां विद्युतीव पूर्ववृत्तांतायां, विशंकटवदनतटे पूर्ववत्प्रभाताब्जसंकाशे, तत्कल्पवास्तव्यतत्परिचारकत्रिदशेषु पूर्ववद्दिनविजृंभितखद्योतसदृशेषु, तद्वियोगवातभूत इव कंपमाने तदावाससंबंधिकल्पपादपे, जन्मप्रभृत्यनुभूतसमस्तसुखेष्वपि पिंडीभूय दुःखात्मतामुपगतेष्विव दुःसहेषु, समागततत्सामानिकदेवसांत्ववचनसमासादितधैर्यप्रकाशनसूर्यः सोऽयं ललितांगसुरवर्यः, सकलभुवनविलसिताजिनभवनानि मासार्धेन संपूज्य, अच्युतकल्पावलंबितरविबिंबानिकाशजिनबिंबानि पूजयन्सन्निहितायुरंतःसमाहितस्वांतः, किरीटतटविन्यस्तकरकुड्मलः, नमस्कारपदानि उच्चैरनुध्यायन्, शारदसमयसमुदितनीरद इव अदृश्यतामाससाद ॥

जंबूद्वीपे सुरशिखरिणः पूर्वदिक्स्थे विदेहे
रम्या भूमिर्विलसति तरां पुष्कलावत्यभिख्या ॥
चित्रा तत्र त्रिदिवसदृशी सौधराजत्पताका—
वातानीतामरतरुसुमामोदिनी राजधानी ॥ १ ॥

एतामुत्पलखेटनामनगरीं तामावसद्भूपतिः
प्रख्यातो भुवि वज्रबाहुरिति यो वज्रीव सद्वैभवः ॥
कांता तस्य वसुंधरा शशिमुखी देवः स नाकाच्च्युतः
पुत्रस्तत्र तयोरभूत्प्रकटयन्स्वां वज्रजंघाभिधां ॥ २ ॥

स्वजनकुमुदानंदी संशीलयन्विविधाः कलाः ।
सकलविमतान्पद्मान्संकोचयंश्च समंततः ॥

स किल ववृधे श्रीमान्बालेंदुरुज्ज्वलमंडलः।
कुसुमसुकुमारांगः कुंदोज्ज्वलास्मितचंद्रिकः ॥ ३ ॥

तदनु, राकाशशीव शरचंद्रिकया तारुण्यलक्ष्म्या भासुरशरीरो वज्रजंघकुमारः सुधावदाताभिरपि निजगुणश्लाघाभिः समस्तजनान् रक्तानातन्वन्, पूर्वभवपरिशीलितस्वयंप्रभानुरागेण लोलाक्षीषु निःस्पृहतामुपगतोऽपि सरस्वतीकीर्तिलक्ष्मीभिः सततं चिक्रीड ।

ततः स्वयंप्रभादेवी च ललितांगदेववियोगेन प्रियविप्रयुक्ता चक्राह्वीव बहुदीनदशामापन्ना, जलदकालसमुज्झितकलालापा कोकिलेव विविधसंतापसंतप्तस्वांता, तत्कालोचितसांत्ववचनोद्यतेन अंतःपरिषद्गतेन दृढवर्मदेवेन प्रचोदितसन्मार्गान् षण्मासाञ्जिनपूजां विधाय सौमनसोद्यानशोभितैचैत्यतरुमूले गुरुपंचकं मनसा ध्यायंती सहसा निशापगमे तारकेवादृश्यतामाटिटीके।

पूर्वोक्ते प्राग्विदेहेऽस्ति पुरी सा पुंडरीकिणी ।
यत्र सौधास्तरुण्यश्च वियन्मध्याविराजिताः ॥ ४ ॥
वज्रदंत इति विश्रुतो नृपस्तां शशास तुलितामराधिपः ।
यो जिगाय परलोकमद्भुतं मार्गणानविजहद्गुणैः परं ॥५॥
लक्ष्मीरिवापरा तस्य लक्ष्मीमतिरभूत्प्रिया ।
कचस्फूर्तिश्च मूर्तिश्च यस्याः सज्जघनोज्ज्वला ॥ ६ ॥

---

१ सौधाः आकाशमध्यशोभिताः। तरुण्यश्च वियदिव आकाशमिव सूक्ष्मं मन्मध्यं अवलम्ब्य तेन विराजिताः । २–३ मार्गणान् बाणानमुंचता ऽनेन नृपेण केवलं गुणैर्ज्यामिरेव शत्रवः पराजिताः पक्षे इमं नृपतिं याचकाः परित्यज्य अन्यत्र न गच्छंति । पराक्रमादिगुणैरेवानेन नृपा जिताः। ४ कचस्फूर्तिः सजलजलदवत्स्निग्धकान्तिधारिणी, यस्या मूर्तिः शरीरं च सता प्रशस्तेन जघनेन कट्यग्रभागेन उज्ज्वला ।

एषा किल सुरयोषा श्रीमति नाम्ना तयोः पुत्री संजाता, क्रमेण मंजुलतारुण्यमंजरीसुराभितनुलता संचारिणीव मदनराज्यस्य लक्ष्मीः, प्रत्यादेश इव रतिदेव्याः, प्रतिकृतिरिव लक्ष्म्याः, प्रतिबिंबमिव सरस्वत्याः, कलशप्रतिष्ठेव विधातृ[1]सृष्टेः, तरंगपरंपरेव शृंगारसागरस्य, पुनरुक्तिरिव सौभाग्यस्य, अधिदेवतेव कांतिकल्लोलस्य, मीनकेतनमहीक्ष्[2]मनभद्रपीठेनेव, मणिभूषणकांतिनिम्नगारुचिसैकतमंडलेनेव, यौवनमदहस्तिमस्तकेनेव, पृथुलजघनवलयेन विलसिता, नाभितलालवालसमुद्गतरोमराजिलताफलाभ्यामिव, हृदयतटतटाककमलमुकुलाभ्यामिव, चूचुकमुद्रामुद्रिताभ्यामिव, शृंगाररसपूर्णशातकुं[3]भकुंभाभ्यां वक्षोरुहाभ्यां विराजमाना, शुभतरलक्ष्[4]णअब्ज[5]मदनिर्मूलननिदानेन पदेन वदनेन च विराजमाना, भ्रमरा[6]जितेन कचनिचयेन नाभिपुटेन च लसमाना, जलदकाललक्ष्मीरिवोल्लसद्धा[7]रपयोधरा सज्जघनाभिरामा च निद्रेव सकललोचन[8]ग्राहिणी चकासामास।

कदाचित्सौधाग्रे मृदुलतमहंसांसमृदुले

---

१ ब्रह्मा। २ भूपतिः। ३ शातकुंभं सुवर्णं। ४ शुभतर—लाक्षेण शुभतरजतुरसेन पदेन. तथा शुभतरल·आक्षेण शोभनचंचलकटाक्षेण अक्ष्णः इदं आक्षमिति व्युत्पत्तेः। ५ अब्जं कमलं अब्जश्चंद्रश्च। ६ भ्रमर—अजितेन भृंगाजितेन भृंगादपि अधिककृष्णवर्णेन केशसमूहेन। भ्रम-राजितेन भ्रमो जलावर्तः तेन अजितेन नभिपुटेन। 'स्यादावर्तोऽम्भसां भ्रमः' इत्यमरः। ७ उल्लसद्धारपयोधरा यथा जलदकालः उल्लसत्—धारायुक्तपयोधरान्मेघान्दधाति तथा इयं श्रीमती उल्लसत्—हारसहितस्तना वर्तते। वर्षाकालः संभृतजलजलदैर्युतो भवति। इयं च सजघना प्रशस्तकटिपुरोभागा। ८ निद्रया लोचने निमील्येते इयं च सकललोचनानि स्वसौंदर्येण आकर्षति।

त्रिराजत्पर्यंके विविधमणिकान्त्या कवचिते ।
मरालीवोन्मीलत्सितजलजषंडे सुदृगियं
ययौ निद्रामुद्रां त्रिभुवनवशी हेमलतिका ॥ ७ ॥

तदानीं तत्पुरमनोहरोद्यानमध्यासीनमतिमानमहिमानमुत्पन्नकेवलज्ञान विशालतपसं यशोधरगुरुमर्चितुमाधिनभःस्थलमुच्चलितानाममराणाममंद-सम्मर्दसंवर्धितकलकलेन निशाकरदृढालिंगितव्योमलक्ष्मीवक्षःस्थलत्रुटितविगलितमुक्तादाममणिपंक्त्येव, जिनराजदर्शनकुतूहालिन्या स्वर्गलक्ष्म्या प्रहितकटाक्षपरंपरयेव, सौरभ्यसंरुद्धदिशावकाशया पतंत्या पुष्पवृष्ट्या समाकृष्टमदतुंगभृंगसंघझंकारेण, सुरदुंदुभिनिःसरदमंदनिध्वानेन च प्रबुद्धा सा तन्वंगी, चक्रांगीव पर्जन्यनिस्वनेन संत्रस्ता, देवागमनिरीक्षणक्षणजनितपूर्वभवस्मृतिः, स्मृतिजातसुंदरांगं ललितांगं स्मृत्वा, हा रूपविनिर्जितांग ! सुरांगनावदनांबुजभृंगकरणापांग ! देव ललितांग ! कासि कासि, मनसि मे कीलित इव ते विलासो विलसतीति प्रलपंती श्रीमती मूर्च्छामुपाजगाम ॥

मलयजघनसारासारसेकैर्मृणाली—
मृदुलकुलनिधानैः पुष्पशय्याधिरोहैः ॥
व्यजनपवनपोतैर्मंदमाश्वास्य नीता
सुदृगियमथ संज्ञां सादराभिः सखीभिः ॥८॥

चकोराक्षी सेयं मनसि खचितं तं सुरवरं
पुरः पश्चात्पार्श्वेऽप्युपरि किल पश्यंत्यनुकलं ॥
सखीभिः साशंकं सपदि परिपृष्टापि बहुधा।
पिकीव ग्रीष्मर्तौ समतनुत मौनव्रतकलाम् ॥९॥

तदनु पर्याकुलाभिरालीभिर्निवेदितोदंतौ लक्ष्मीमतीवज्रदंतौ मातापितरौ तूर्णमभ्यर्णमेत्य, बलवदस्वस्थां तनयां दृष्ट्वा, शोककीलित-स्वान्तौ तन्वंगि ! प्रतिक्षणमुत्संगभुवमावयोरेहि विधेहि परिष्वंगमिति व्याहरंतौ पुरो निषीदतुः।

राजायमिंगितज्ञानामग्रगण्यो वरेण्यो वचनविदामुदारगंभीरमति-र्मनसि तनुजाविकारबीजं प्राग्जन्मानुभवः कोऽपि इति निश्चित्य, यथा निश्चयमग्रमाहिषीं लक्ष्मीमतीं प्रतिपाद्य, नियोज्य च कन्यासमाश्वासन-संनिधानाय मधुरतमकौशलविधात्रीं पंडितानामधात्रीं, कांतया सह निर्जगाम ।

करणीयं नरेन्द्रस्य कार्यद्वैतमभूत्तदा।
कैवल्यं स्वगुरोश्चक्रसंभूतिश्चायुधालये ॥१०॥
उपस्थिते कार्ययुगे नृपस्य चित्तप्रवृत्तिर्द्विविधा बभूव ॥
महीधरे मार्गगते निरुद्धे स्रोतःप्रवृत्तिर्द्विविधेव लोके ॥११॥

तदनु किमत्र प्रथमं कर्तव्यमिति क्षणं चिंताकुलो वसुधापति-र्धर्मार्थकार्ययोर्मध्ये धर्मकार्यमेव मुख्यमिति निश्चित्य, भगवतो यशोधर गुरोः पूजां विधातुं पृतनया सार्धमुपसृत्य जगद्गुरोः सुरांचितमपि असु-रांचितं, वनीपकजनमनीषितपूरकमपि अवनिपकजनमनीषितपूरकं,

---

प्रथमं विरोधाभासः तत्परिहारस्त्वेवं, सुराः कल्पवासिनो देवाः।२ असुराः भुवनत्रिकदेवाः । ३ वनीपका याचकाः 'वनीपको याचनको मार्गणो याचकार्थिनौ' इत्यमरः ॥ याचकजनमनीषितपूरकोऽपि तथा नेति वि-रोधस्तत्परिहृतिरियं—अवनिं पृथ्वीं पालयन्ति इति अवनिपाः राजानः स्वार्थे कप्रत्ययविधानादवनिपक इति भवति नृपजनमनोरथपूरकं इत्यर्थः ॥

खरांशुकांतमपि नखरांशुकान्तं पदयुगलं पूजयामास ॥
तत्पादौ प्रणमन्नसौ नरपतिर्लब्धावधिः शुद्धधीः
स्वस्यैवाच्युतकल्पवासवपदं पुण्यार्जितं प्राग्भवे ॥
श्रीमत्या ललितांगदेवविलसत्कांतार्थमन्यच्च तद्
वृत्तं सर्वमतिस्फुटं विदितवानुद्वेलपुण्योदयः ॥१२॥

तदनु वंदितभगवच्चरणे धरणीरमणे तदारामान्निर्गत्य स्वपुरमागत्य च, निर्वर्त्य चक्रपूजां तनूजां पंडितावशे विधाय, षडंगबलेन बलेन दिग्जयाय प्रस्थितवति, पंडितापि तमालमंजुलां कृतमालमंजुलां, सालशोभितां रसालशोभितां, नीपविराजितां वनीपविराजितां, शुकराजिरमणीयां किंशुकराजिरमणीयां, नरवृंदानंदसंदायिनीं किंनरवृंदानंदसंदायिनीं नीरजातविलसितां वानीरजातविलसितां, सरस्थितिमनोरमां केसरस्थितिमनोरमां, पेयतरुमंडितां चांपेयतरुमंडलमंडितां, तालबंधुरां, हिंतालबंधुरां, रसोज्ज्वलेन सारसोज्ज्वलेन, सकलचित्तहारिणा हंसकलचित्तहारिणा, पद्माकरेण विराजितामशोकवनिकां शोकाक्रांतमत्या

---

१ खराः तीक्ष्णाः अंशवः किरणाः यस्य सः खरांशुकांतः सूर्यः तद्कांतमपि उज्ज्वलमपि न खरांशुकांतमिति विरोधे तत्परिहातिरित्थं—नखराणां नखानां अंशवः किरणाः तैः कांतं मनोहरं । २ तापिच्छवृक्षमनोहरां । ३ शम्याकतरुसुंदरां, कृतमालः (महाराष्ट्रभाषायां बाहवा इति) ४ सर्जवृक्षशोभितां । ५ आम्रवृक्षमनोहरां । ६ कदंबवृक्षसुंदरां । ७ पलाशकमनीयां । ८ किन्नरा देवविशेषाः । ९ नीरजातं कमलं । १० वेतसतरुसुंदरां । ११ पुन्नागतरुरमणीयां । १२ पेयतरु । (?) १३ तालवृक्षमनोहरां । १५ हिंतालस्तृणवृक्षः ।

श्रीमत्या समं समासाद्य, तत्र किल विचित्रचंद्रकांतशिलातले निष-ण्णा, पाणिपल्लवेन सस्नेहं तदंगानि संस्पृशंती, दशनरुचिविसरविमल, सलिलैस्तदंगसंतापं निर्वापयंतीव मधुरतरमिमं व्याहारं विस्तारयामास।

अहं सुदति! पंडिता निखिलकार्यलाभे ध्रुवं
नवोत्पलदलेक्षणे! ननु तवास्मि मात्रा समा ॥
ततो वद पतिंवरे सपदि मौनहेतुं स्फुटं
किमेष मदनोद्यमः किमथवाग्रहप्रक्रमः ॥ १३ ॥
इति पृष्टा विशालाक्षी निशायां नतपंकजा ॥
पद्मिनीवानतमुखी ह्रिया वचनमादधे ॥१४ ॥
कथा प्राग्जन्मकालिता स्मृता देवागमेक्षणात् ॥
लज्जायवनिकांतस्था पुरो नटति ते सखि ॥ १५ ॥

पुरा खलु धातकीखंडमंडनायमाननंदनवनसुंदरपूर्वमंदरापरविदे-हाश्रितगंधिलविषयाभिरामं पाटलिग्राममधिवसतो नागदत्तवणिजः सुद-तिविख्यातया कांतया विराजमानस्य नंद–नंदिमित्र–नंदिषेण–वरसेन-जयसेननामानः सकलगुणासीमानः पंचपुत्राः, पुत्रिके च मदनकांता श्रीकांतेति, तयोरहं कनीयसी संजाता निर्नामिका नाम ।

कदाचिच्चारणचरितविदितरम्यवनविलसदंबरतिलकधराधरे विराज मानं पिहितास्रवमुनिमानम्य, केन कर्मणाऽस्मिन्दुर्गतिकुले जातेत्यप्राक्षं । इति मया पृष्टोऽसौ मुनिरिदमाचष्ट । अत्र किल विषये पलालपर्वतग्रामे पूर्वं देवलाख्याद्ग्रामकूटात्सुमतेरुदरे जाता धनश्रीरिति विश्रुता भवती कदाचित्परमागमपठनकर्मठस्य तावकविहारभूमिमाश्रितस्य समाधि-गुप्तस्य मुनिवरस्य समीपे पूतिगंधबंधुरं कुक्कुरकलेवरं निधाय, तत्कर्मणा

विभिनायमानं प्रतिपादितकलुषवचनं तमेनं मयभरेण प्रणम्य क्षमां ग्राहयामास।

तेनोपशमभावेन स्तोकपुण्यं समाश्रिता
जगत्यां दुर्गतेऽत्यंतं जाता मानुषजन्मनि ॥१६॥
ततः कल्याणि ! कल्याणं तपोऽनशनमाचर
जिनेंद्रगुणसंपत्तिं श्रुतज्ञानमपि क्रमात् ॥१७॥

षोडशतीर्थकरभावनाश्चतुस्त्रिंशदतिशयानष्टमहाप्रातिहार्याणि पंचकल्याणान्युद्दिश्य त्रिषष्टिदिवसैः क्रियमाणमुपोषितव्रतं जिनगुणसंपत्तिरिति जोघुष्यते। अष्टाविंशतिमतिज्ञानभेदानेकादशांगान्यष्टाशीतिसूत्राणि प्रथमानुयोगं परिकर्मद्वयं चतुर्दशपूर्वाणि पंचचूलिका षडवधिज्ञानमनःपर्ययज्ञानद्वयं केवलज्ञानमेकमुद्दिश्याष्टपंचाशदधिकदिनशतेन क्रियमाणमनशनव्रतं श्रुतज्ञानमिति श्रूयते ॥

इति मुनिवरोद्दिष्टं धर्मं विधाय यथोचितं
सुदति ! ललितांगस्य ख्यातामरस्य सती प्रिया ॥
त्रिदशभुवने भूत्वा गत्वा मुनिं तमपूजयं
दिवि च सुभगान्भोगान्भुक्त्वेयमद्य बभूव च ॥ १८ ॥
पुरः पश्चादूर्ध्वं दिशि दिशि च दिव्यांबरधरं
स्फुरद्रत्नप्रोद्यन्मुकुटविलसन्मस्तकतलं
तमेनं पश्यामि प्रकृतिकमनीयं सुरवरं
मनोगेहेऽप्येष स्फुरति सततं कीलित इव ॥ १९ ॥

तदलाभे पुनर्मम तनुलता तदीयमध्यसाम्यं परिशीलयितुमिव

---

१ कोपयुक्तं।

क्षामतां न जहाति, सततमश्रुबिंदवो मामकीनदुःखं द्रष्टुमक्षमतया तमन्वेष्टुमुद्यता इव निर्यान्ति ॥

नभःस्थलगतो नवानुलेपनगतश्चंद्रो न शीतलः, कंठगता क्रीडो-द्यानगता च मल्लिमाला मां नानंदयति। समीपसंजातः सरोरुहवनसं-जातः प्रमदालिमधुरालापः परं दुःखयति । कविता विदग्धसखीजन-क्लृप्ता दासीजनक्लृप्ता च कुसुममृदुलशय्या न हर्षमाददाति । इद्धता करांगुलिगता च समेधमानरुगूर्मिका कंकणं विजृंभयितुमर्हति

स्मृतिपथगतः समीपदेशावलमानश्च दक्षिणमरुद्वरो मर्मांगानि शोषयति ॥

वारान्वर्षाति मारोऽयं क्षणकालश्च वर्षति ।
श्यामापि तत्र रक्तापि धवला च भवाम्यहं ॥२०॥

१ चंद्रो निशाकरः घनसारश्च [कापूर इति महाराष्ट्रभाषायां] 'चंद्रः सुधांशुकर्पूरस्वर्णकांपिल्लवारिषु ' इति विश्वलोचनः । २ आनंदयत्री मधुरभाषणं, आनंदभ्रमरमधुरगुंजारवश्च । 'अलिर्भृंगे सुरायां स्त्री स्यादालिः पिंडले स्त्रियां । सख्यां पंक्तावपि ख्याता ' इति विश्वलो० '। ३ कुसुमवत्पुष्पवन्मृदुला शय्या रचना यस्याः एतादृशी कविता, कुसुम-निर्मितकोमलशय्यातलं च । ४ इद्धता रुगूर्मिका—मनःपीडापरंपरा तथा करांगुलिगता प्रवर्धमानकांतिसहिता ऊर्मिका अंगुलीयकं । कंकणं करवलयं करभूषणं, जलकणं च । ५ दक्षिणदिग्वायुश्रेष्ठः पक्षे उदारामरवरः । ' दक्षिणः सरलो वामपरच्छंदानुवर्तिषु त्रिषु स्याद्वाच्यलिंगोयमवाचीसंभवे मतः ' ' मुरुत्पुंसि सुरे वाते ' इति विश्वलो० । दक्षिणः सरलोदारौ इत्यमरः । ६ वर्षमिवाचरति । ७ श्यामा यौवनमध्यस्था कृष्णा च । रक्ता अनुरक्ता लोहितवर्णा च । ८ तदीयाविरहात्पांडुरवर्णा ।

इत्युक्त्वा पुनरप्युवाच मधुरं सा श्रीमती तां सखीं ।
सत्यां त्वय्यरविन्दनेत्रि ! मम किं दुःखस्य लेशो भवेत् ॥
ज्योत्स्नायां कुमुदावलेरिव सखि! त्वं पंडिता मामके।
काले सत्यमरालकेशि!सुगुणे! मत्कार्यसिद्धिं कुरु॥२१॥

इदं च मया विलिखितं पूर्वभवचरितपट्टकं महाकविकाव्यसंगतव्यंगवैभवामिव गूढागूढं, गणिकाजनवचनमिव धूर्तजनमनःसंमोहकारणमादाय, अत्रत्यगूढार्थसंकटे पतिब्रुवान्धूर्ततरान्पराकृत्य, कविमतिरिव सुश्लिष्टार्थं, लक्ष्मीरिवोद्योगशालिनं पुरुषं, तं सुरोत्तमं मार्गमाणा प्रस्तुतकार्यं साधयेति ॥

पंडिताऽपि तरलाक्षि ! तवेष्टं क्षिप्रमेव कलये तनुगात्रि ! ।
इत्युदीर्य सहसा निरगच्छत्पट्टकांचितकरा दरकंठी ॥२२॥
गत्वा महापूतजिनालयं सा कृत्वा जिनेंद्रांघ्रियुगप्रणामं ।
तस्थौ ततः पट्टकशालिकायां परीक्षणार्थं लिखितं प्रसार्य ॥२३॥

यत्र च जिनभवने संध्यारागारुणा इव पद्मरागकुट्टिमेषु, तरंगितमलिनसंगहारिता इव मरकतमयमणिभूमिषु, गगनतलप्रसृता इवेन्द्रनीलभित्तिषु, तिमिरपटलविघटनोद्यता इव कृष्णागरुधूपधूमोद्गारिवातायनेषु, प्रभातचांद्रिकामध्यपतिता इव स्फटिकमणिभित्तिप्रभासु, गगनसिंधुतरंगिण इव सितपताकांशुकेषु, राहुमुखकुहरप्रविष्टा इव जंभारिमणिजृंभितगवाक्षेषु, पल्लविता इव सूर्यकांतोपलेषु, निर्गीर्णा इव वंदारुभव्यवृंदारकसंदोहमणिमुकुटमणिप्रभासु विराजंते रविगभस्तयः ॥

६ कुटिलकेशि . 'स्यादरालः : पुमान्सर्जे मत्तेभे कुटिलेऽन्यवत् ॥ इति विश्वलोचनः । ७ इंद्रनीलमणिः ।

तत्रागतान्कुशलकोमलसूक्ष्मबुद्धीन् ॥
सर्वान्किमेतदिति चित्रमवेक्षमाणान ॥
सा पंडिता समुचितैर्वचनप्रचारै—
र्गूढस्थलेषु कुशलान्कलयांबभूव ॥२४॥

तदनु कृतदिग्जयश्चक्रधरो नरविद्याधरसुरकिरीटमणिकोणशाणकषणनिर्मलीकृतचरणनखमणिः,कृतकृत्योऽपि निजनंदिनीविवाहसंविधानचिंतादंतुरितस्वांतः, केतुजालविमलपटाविगलितातपां निजराजधानीं प्रविवेश ॥

चक्री ततः समाहूय चिरमाधियुतां सुतां ।
स्मितांशुसलिलैः सिंचन्निव व्याहारमादधे ॥२५॥
शोकं जहीहि शतपत्रविशालनेत्रे! ।
स्नाहि प्रसाधनविधिं कुरु कोमलांगि ! ॥
मौनं च संत्यज तवेष्ट समागमोऽद्य ।
क्षिप्रं भविष्यति कुमारि! तमालकेशि ॥
यशोधरमहायोगिकैवल्यकलितावधिः ॥२६॥
सर्वं जानाति तेऽस्माकं स्वस्त्रकांस्याऽपि वृत्तकम् ॥२७ ॥
शृणु वक्ष्यामि लोलाक्षि ! त्रयाणां वृत्तमुत्तमं ।
पृथक्पयोजवदने ! भवांतरविभावितम् ॥२८॥

पुरा खल्वितः पंचमे भवे विभवाजितसुरनगर्यां इहैव पुंडरीकिणी नगर्यां, अर्धचक्रिणस्तनूजश्चंद्रकीर्तिनामधेयोऽहं क्रमागतां राज्यलक्ष्मीमासाद्य, जयकीर्तिनाम्ना वयस्येन चिरं रममाणो, गृहमेधिगृहीताणुव्रतः कालान्ते चंद्रसेनाख्यं गुरुमाश्रित्य त्यक्ताहारशरीरः संन्यास-

विधिमालब्य, माहेंद्रकल्पे सप्तसागरायुःस्थितिः सामानिकः सुरोऽस्मत्समानर्द्धिविभवेन जयकीर्तिना सह समभूवं ॥

ततः कालान्ते प्रच्युतो पुष्करद्वीपदीपायमानपूर्वमंदरपौरस्त्यविदेहविशोभितमंगलावतीविषयसंगतरत्नसंचयनगरमधिवसतः श्रीधरमहीपालस्य मनोहरा मनोरमा इति विख्यातयोर्देव्योस्तनयौ नाम्ना श्रीधर्मविभीषणौ बलकेशवौ जातौ परिणताविव परस्परसौहार्दरसौ विलसमानौ, राज्यलक्ष्मीं मयि ज्येष्ठे निक्षिप्य, तपसे प्रयाते ताते सुधर्मगुरुप्रतिपादितदीक्षे निरतिशयतपोदक्षे सिद्धपदमधितिष्ठमाने, मय्यतिमात्रवात्सल्येन स्थितायां मनोहरायां च, चिराय सुधर्मगुरुनिर्दिष्टं तपः समाचर्य ललितांगपदं प्राप्तायां, आवां चिरं भोगाननुभवावः स्म॥

तदनु, विभीषणवियोगेन खिद्यमानमानसोऽहं, पूर्ववात्सल्यप्रत्यासन्नेन मातृचरललितांगदेवेन बोधितस्त्यक्तशोकः प्रसन्नमतिर्युगंधरमहायोगिसमीपे जैनीं दीक्षामासाद्य, पंचसहस्त्रैः पृथ्वीपतिभिः समं सिंहनिष्क्रीडितं नाम दुश्चरं तपस्तप्त्वा, महोदर्कं सर्वतोभद्रं च चरित्वा, समासादितविज्ञानत्रयविमलालोकः सुस्वकताने अच्युतकल्पविमाने द्वाविंशतिसागरजीवितःसुरेंद्रो भूत्वा, तत्र दिव्यान्भोगाननुभुंजानो मातृवात्सल्येन ललितांगदेवमागत्यारोप्य च मामकीनं विमानं आनीयचास्मत्कल्पमसकृत्सत्क्रियां विस्तारयामि स्म ॥

अथ सोपि ललितांगः सुचिरं भोगाननुभुंजानो मुहुर्मुहुर्मया पूजितः कालांते च्युतो, जंबूद्वीपपूर्वविदेहविशोभितमंगलावती विषयविराजितरजतमहीधरोदक्तटघटितगांधर्वपुरनाथस्य वासवस्य विद्याधरेंद्रस्य प्रभावतीदेव्यां महीधरो नाम सुतः संजातः। क्रमेण तास्मि-

न्वासबे महीश्वराय राज्यं समर्प्यारविंदानिकटे मुक्तावलिनामतपस्तप्त्वा मोक्षलक्ष्मीमाटीकमाने, प्रभावत्यां च रत्नावलिनामतपश्चिरं चरित्वाच्युतकल्पमासाद्य प्रतीन्द्रपदं भजमानायां, सोऽयं विद्याधरराज्यं परिपालयन् सिद्धविद्यः, पुनर्विद्यापूजोद्यतो मंदराचलनंदनवनपूर्वदिगाश्रिततचैत्यालयमधितिष्ठमानः, पुष्करार्धद्वीपपश्चिमभागपूर्वविदेहविलसितवत्सकावतीविषयप्रभाकरीपुरीमंडनायमानस्य विनयंधरयोगींद्रस्य निर्वाणपूजां निष्ठाप्य महामेरुमागतवता मया लोचनगोचरीकृत एवं बोधितो बभूव ॥

मामच्युतेंद्रमवगच्छ नभश्चरेंद्र !
त्वं पूर्वमाविरभवो ललितांगदेवः ॥
स्नेहोऽस्ति मे भवति मातृचरे गरिष्ठ—
स्तद्भद्र संत्यज मुधा विषयाभिलाषं ॥२९॥

इत्युक्तमात्र एव निर्विण्णो नभश्चरेंद्रो महीकंपे ज्येष्ठसुते समर्पितराज्यभारः, बहुभिः खेचरेंद्रैः साकं जगन्नंदनमुनिनिकटे कनकावलिनामतपस्तप्त्वा प्राणतेंद्रपदं प्राप्तो, विंशतिसागरस्थितिस्तत्रानुभूतविविधभोगस्ततश्च्युत्वा, धातकीखंडद्वीपपूर्वाशाविशोभितपश्चिमविदेहगतगंधिलविषयायोध्यानगराधिपतेर्जयवर्मणः सुप्रभायामजितंजयनामपुत्रः समजायत ॥

ततश्च जयवर्मजगतीपाले राज्यलक्ष्मीं निजनंदने समर्प्य अभिनंदनपार्श्वे चिरमाचाम्लवर्धनं नाम तपस्तप्त्वा शाश्वतं पदमुपगते, सुप्रभायां च सुदर्शनां गणिनीमासाद्य रत्नावलिमुपोष्याच्युताधिपतिपदं प्राप्तायां, सोऽयमजितंजयोऽभ्युदितचक्ररत्नोऽभिनंदनजिनपदारविंदं

वंदमानः, पापास्रवद्वारपिधानेन पिहितास्रव इत्यन्वर्थनामधेयं दधान-श्चिरकालं राज्यसुखमनुभुंजानो मदीयधर्मबोधनविजृंभितवैराग्यभारो विंशतिसहस्रैर्नृपकुमारैः सह मंदरस्थविरमुनिसमीपे दीक्षामुपादाय, संजातावधिज्ञानसंपन्नचारणर्द्धिरंबरतिलकमहीधरे भवत्यै जिनगुणसंपत्तिश्रुतज्ञानारव्यमनशनव्रतं स्वर्गसुखसाधनं प्रतिपादयामास ॥

मालतीसुकुमारांगि ! माननीयगुणे सुते ! ।
ततोऽस्मद्गुरुरेवासीत्तवाप्यभ्यर्हितो गुरुः ॥३०॥

एवं गुरुस्नेहेन मया पूजितेषु द्वाविंशतिलालितांगेषु चरमस्तव भर्ता प्राग्भवे महाबलः स्वयंबुद्धोपदेशविलसितदेवभूयो ललितांगस्त्रिदिवच्युतः सोऽयमिदानीमस्माकं प्रत्यासन्नतमो बंधुः संजातस्तव च भर्ता भविष्यति ॥

अन्यद्वक्ष्याम्यभिज्ञानं कन्ये ! धन्यगुणे शृणु ॥
यस्याः कचाः कटाक्षाश्च शिलीमुखमदापहाः ॥ ३१ ॥

पुरा किल युवाभ्यां दंपतीभ्यां समन्वितोऽहं युगंधरतीर्थलब्धसम्यग्दर्शनाभ्यां ब्रह्मेंद्रलांतवाभ्यां तच्चरितं पृष्ट एवमवोचं ॥

जंबूद्वीपपूर्वविदेहविलसितवत्सकावतीमंडलमंडनायमानसुसीमानगराधिपतेः अजितंजयनामधेयस्य सचिववरिष्ठादमृतमतिनाम्ना सत्यभामायां जातः प्रहसितस्तत्सखा च विकसितस्तावेतौ सदा सहचारिणौ तर्कपारावारतलस्पर्शिधिषणौ वादकलाप्रवीणौ कदाचिन्मतिसागरनाममुनिवरमुपागतेननरपतिना सह समागतौ सकलनिजशंकाकलंकनिष्का

यस्याः कचाः शिलीमुखा भ्रमराः तेषां मदापहाः गर्वनिराकरणनिपुणाः भृंगेभ्योप्यतिकृष्णवर्णाः । कटाक्षाश्च बाणगर्वहरणचणाः । ' शिलीमुखो भवेद्भृंगे मार्गणे च शिलीमुखः, इति विश्वलोचनः ।

रगभीरया गिरा जीवतत्वनिरूपणं कुर्वाणं मुनिपूषणभानम्य गृहीतसंयमो सुदर्शनमाचाम्लवर्धनं चोपोष्य, विधाय च निदानं बलदेववासुदेवयोः कालांते महाशुक्रे षोडशसागरोपमस्थितिसहिताविंद्रप्रतीन्द्रौ संजातौ, चिरममरसंपदमनुभूय स्वायुरंते च्युतौ, धातकीखंडसुदर पश्चिममंदरपूर्वविदेहविराजितपुष्कलावतीविषयमंडितपुंडरीकिणीपुरीं पालयतो धनंजयभूपालस्य जयंतायशस्वतीदेव्योस्तनयौ महाबलातिबलनामधेयौ बलकेशवावजायेतां ॥

तदनु, राज्यं परिपालयन्महाबलः केशवस्यातिबलस्य वियोगेन संजातवैराग्यः समाधिगुप्तमहामुनिपार्श्वे तपस्तप्त्वा प्राणतेंद्रपदं प्राप्तस्तत्र विंशतिसागरोपमस्थितिरमरलक्ष्मीमनुभूय, धातकीखंडपश्चिममंदर पूर्वविदेहवत्सकावतीविषयप्रभाकरीपुरीनाथस्य महासेनमहीपालस्य वसुंधरादेव्यां जयसेनाह्वयः पुत्रः संजातः, क्रमेणोद्भूतचक्ररत्नः सुचिरं पालितमहीवलयः सीमंदराजिनपादपयोजमूले जैनीं दीक्षामासाद्य भावितषोडशभावनः कलितानिरतिशयतपसा ग्रैवेयकेषूर्ध्वमध्यमे प्राप्याहमिंद्रपदं, तत्र त्रिंशत्सागरोपमस्थितिर्दिव्यानुभोगाननुभूय ततोऽवतीर्य, पुष्कराधद्वीपपूर्वमंदरपूर्वविदेहसंगतमंगलावतीविषयविशोभितरत्नसंचयराजधानीमाधिवसतोऽजितंजयभूपालस्य वसुमतीनामदेव्यां युगंधरः समजायत ॥

सोऽयं युगंधराजिनः सुरमौलिराजी
नीराजितांघ्रियुगलः सकलाभिनंद्यः।
कैवल्यसंपदमुपेत्य महीयतेऽद्य

---

१ मुनिपूषणं मुनिसूर्यं । २ राजी पंक्तिः ।

भव्यांबुजातवनमंडलचंडभानुः॥ ३२ ॥
तदेति मद्वचः श्रुत्वा यद्भवो दर्शनं भिक्षाः॥
युवां च धर्मसंवेगो परमं समुपागतो ॥ ३३ ॥
हरिणांकगर्वहरणाननांबुजे !
पिहिताश्रवस्य महितामरार्चितं ।
अयि केवलोदयमई महागुणे !
सममागता वयमपि स्मरस्यदः ॥ ३४ ॥
सुते स्मरासि किं भद्रे स्वयंभूरमणोदधिं ।
क्रीडाहेतोर्विजेष्यामो गिरिं चांजनसंज्ञकम् ॥ ३५ ॥

इति कर्णरसायनं पितृवचनमाकर्ण्य युष्मत्प्रसादविभवेनैतत्सर्वं जानामि किंतु शिरीषकोमलांगो ललितांगः क जातो न ज्ञायते इति प्रतिपादितवतीं श्रीमतीं पुनश्चक्रधरः प्रत्युवाच ॥ भद्रे! युवयोः स्वर्गस्थयोरेवाच्युतकल्पात्प्राक्प्रच्युतोऽहं यशोधरमहीपतेर्वसुधरायां देव्यां वज्रदंतः संजातः । युवां च स्वर्गाच्च्युतो यथायोग्यं राजपुत्रौ जातौ॥

ललितांगि! तृतीयेऽन्हि ललितांगचरेण ते।
संगमो भविताद्यैव तद्वार्तां वक्ति पंडिता ॥ ३६ ॥
पैतृष्वस्रीय एवायं तव भर्ता भविष्यति ।
अपांगसुंदरो यस्त्वन्नेतांत इव भासते ॥ ३७ ॥

इति प्रतिपाद्य समागच्छंतीं तव मातुलानीं वयं प्रत्युद्गच्छाम

---

१ भव्या एव अंबुजातवनं कमलवनं तस्य मंडलं समूहः तस्मै चंडभानुः सूर्यः । २ हरिणांकश्चंद्रः ३ पितृष्वसुः अपत्यं पुमान्पैतृष्वस्रीयः। ४ अपांगो मदनस्तद्वत्सुंदरः नेत्रपक्षे अपांगः कटाक्षस्तद्वत्सुंदरः ।

इति चक्रधरे, तत्क्षणमखंडितमतिः पंडितापि समागत्य कार्यसिद्धि-संतुष्टहृदयालवालसंजातप्रीतिलतापुष्पायमाणमंदस्मितसुंदरवदनारविंदा प्रियतमोदंतश्रवणकौतुकविलासवतीं श्रीमतीं प्रीतिमधुरमेवं कथयांबभूव॥

कोमलांगि! कुसुमास्त्रपताके[1]! । त्वन्मनोरथतरुः फलितोऽभूत् ।
समपंचमरुणाधरबिंबे! व्याहरामि तदिदं शृणु कन्ये! ॥ ३८ ॥

इति किल पट्टकमादाय महापूतजिनालयमासाद्य, तत्र विचित्र-पट्टकशालायां पट्टकं प्रसार्य, बहून्समागतान्पंडितमानिनः पतिब्रुवा-न्गूढार्थसंकटे प्रकटितमोहान्विदधानायां मयि स्थितवत्यां, बिंबाधरि! कचवद्भ्रमराहितः[2], फालवत्सुपर्वराजसुंदरः[3], कुचमंडलवत्सरसहितवृत्तिः[4], भ्रूयुगलवद्धर्मोल्लसद्गुणः[5], आदिकंदः शृंगारपादपस्य, रोहणगिरिः स-कलगुणमणिगणस्य, प्रभवशैलः कंदर्पकथाकल्लोलिनीनां, वसंतसमयो वैदग्ध्यसहकारस्य[6], आदर्शतलं सौजन्यमुखस्य, आलवालतलं विद्याल-

---

१ कुसुमास्त्रो मदनः तस्य पताकेव इति कुसुमास्त्रपताका। २ भ्रान्तिर-हितः पक्षे भ्रमराणां हितः । ३ फालो भालप्रदेशः यथा भालप्रदेशः-सुपर्वराजवत् पूर्णिमाचंद्रवत्सुंदरस्तद्वत् अयमपि पूर्णिमाचंद्रवत्सुंदरः। अथवा सुपर्वाणो देवास्तेषां राजा इंद्रस्तद्वन्मनोहरः ४ सरसहितवृत्तिः सरेण पुष्पहारेण सहिता वृत्तिर्यस्य पक्षे सरसा शृंगारादिसहिता वृत्तिर्यस्य । ५ यथा भ्रूयुगलं शोभमानशिंजिन्या युक्तं धनुरिव शोभते तथासौ वज्रजंघः रत्नत्रयात्मधर्मोपेतत्यागादिगुणयुक्तः। 'गुणो रूपा-दिसत्वादिबिंबादिहरितादिषु । सूदेऽप्रधाने संध्यादौ रज्जौ मौर्व्यां वृकोदरे॥' 'धर्मः स्यादस्त्रियां पुण्ये धर्मो न्यायस्वभावयोः। उपमायां यमाचारवेदान्तेऽपि धनुष्यपि । ' इत्युभयत्र विश्वलोचनः । ६ आम्रवृक्षः ।

तानां, स्वयंवरपतिः सरस्वत्याः, संकेतसदनं कीर्तिलक्ष्म्याः, कुलभवनं शीलसंपदां, कोशगृहं सौंदर्यधनस्य, त्रिभुवनरमणीयाकृतिस्तव भर्त्तुर्यो वज्रजंघस्तत्र समागत्य भगवंतमर्हन्तमभ्यर्च्य पट्टकशालामाससाद।

निर्वर्ण्य पट्टकमिदं निरवद्यरूप
स्तत्पट्टके विलिखितं स्फुटमाह सोऽयं ॥
राजानमुज्जयति यस्य मुखं प्रतापो
हंसं यशश्च विमलं किल राजहंसं ॥ ३९ ॥
यस्य चंद्रनिभा कीर्तिर्हासहृद्यं मुखांबुजं ॥
करश्च समरारंभे चंद्रहासमनोरमः ॥ ४० ॥
सुमाभं यस्य हसितं भ्रूयुगं चापसन्निभं॥
राजते यः शरीरेण सुमचापमनोहरः ॥ ४१ ॥
यः कांचनश्रियं धत्ते यशो यस्याचलं भुवि ॥
यो धैर्येण महिम्ना च कांचनाचलसन्निभः ॥४२॥
यस्यांबरोज्ज्वलो देहो मणिभिश्च विराजितः।
यश्चकास्ति प्रतापेन चितांबरमणिः सदा ॥ ४३ ॥
प्रभया तुलयत्येष स्वर्णमब्जं करेण च
प्रभाकरेण तुलयन्प्रतापं यो विराजते ॥ ४४ ॥

इदं किल श्रीप्रभविमानं अयं च श्रीप्रभाधिपतिरहं ललितांगः। इयं च तत्पार्श्वे सौंदर्यसीमाभूमिः स्वयंप्रभा। अयमैशानःकल्पः।

---

१ चंद्रं २ हंसं सूर्यं ' हंसौ सूर्यमरालयोरिति विश्वलोचनः। ३ चंद्रहासः खड्गः। ४ सुमचापो मदनः । १३ अंबरं आकाश तस्य मणिः सूर्यः ॥ ६ सूर्येण।

इयमिंदिंदिरचुंबितकुसुमसंदोहतुंदिलमंदारवीथी । इदं पद्मसरः । अयं कृतकाचलः अत्र मंदारवाटिकायां प्रणयकोपपराङ्मुखी राकाशशिमुखी स्वयंप्रभा समीरसमाहतकल्पलतेव विलिखिता । इयं चावयोः कनकाचलतटक्रीडा दर्शिता।इतःकिल देदीप्यमानमणिप्रकांडमंडलमंडितकांडपटावृते शय्यागेहे निगूढप्रेमबंधबंधुरेर्ष्यावशेन मणिनूपुरझंकारमनोहरेण चरणेन मां बलात्ताडयंती, किंकिणीकलकलवाचालेन कांचीकलापेन सांत्ववचनपरेण सखीजनेनेव संरुद्धा, प्रणयकोपपरीतस्य मम पादे पतंती स्वयंप्रभा दर्शिता । अत्राच्युतेंद्रसमायोगगुरुपूजादिकं विस्तरेण लिखितं । अत्र किल चित्रमंडपे प्रणयकोपकलितस्वांतायाः कांतायाः पादयोः पतन्कर्णोत्पलेन ताड्यमानोऽहं प्रदर्शितः । इतश्च तरुणकिसलयमनोरमचरणकलितलाक्षामुद्रया मधुरस्यंठे विरचितं लांछनं न प्रकटितं । इह च कांताकपोलफलकयोर्विचित्रपत्राणि विलिखन्नहं न प्रकाशितः । इदं स्वयंप्रभादेव्यैव विलिखितं स्यादथवास्मत्क्रीडा साक्षीभूततया रतिदेव्या यद्वात तद्वृत्तांतं सर्वमनुभूनवत्या स्वर्गश्रियेति वितर्कयन् वज्रजंघः क्षणं पर्याकुलो मूर्च्छामुपजगाम ॥

परिवारजनैः कृतोपचारस्तरुणस्तत्र चिरेण लब्धसंज्ञः ॥
कलशस्तानि!केन चित्रमेतल्लिखितं स्यादिती मामपृच्छदेषः।४५।

एवं पृष्टाहमिदमवोचम् ॥

त्वन्मातुलान्यास्तनया तव स्त्री तटित्सवर्णा तरलायताक्षी॥
सा श्रीमती यन्मुखमेव जातो नभोगतां त्यक्तुमिवोडुराजः॥४६॥

---

१ भोगरहिततां पक्षे आकाशनिवासित्वं । २ उडूनां नक्षत्राणां राजा प्रभुः उडुराजः नक्षत्रपतिश्चंद्रः ।

कुटिलभ्रूयुगं तस्या धनुश्चेद्रमणीमणिः ॥
न तिष्ठेत तदा कन्या मुखभागे मनोहरे ॥
अहोस्विद्युक्तमेवेदं सा कन्यापि ग्रहोज्ज्वला ॥
तुलां त्यजति लोलाक्षी कुसुमेषुपताकिका ॥
रोमराजिर्हरिनिभा तालहृद्यं स्तनद्वयं ॥
तनुकांतिश्च तन्वंग्या हरितालमनोहरा ॥

तस्याः किल कुंभींद्रकुंभसन्निभः कुचकुंभबिंबो, बिंबसहोदरोऽधरो, धरतुलितं नितंबवलयं, वलयांचितं करकिसलयं, सलयमधुरा गानकला, कलानिधिमदहरं स्मितकुसुमं, कुसुमचापतूणीरसंकाशं जंघायुगलं, युगायता भुजलता, लतांतसुकुमारा तनुसंपदिति ॥

सा किल तरुणीमणिर्भवदीयवियोगहुतवहतांता कांता किंचिदप्यंभो न पश्यतीति जले विषबुद्धिं करोति । मदने मारमतिं तनुते । मंदानिलेऽप्याशुगमनीषां वहति । मृदुलनलिनेषु विषजातधियं विधत्ते । मलयजरसेऽशुचिभ्रांतिं कुरुते । शीतकरं सागरजातं तनुते । परिवादध्वनिं

१ धनुः कोदंडः पक्षे धनूराशिः (ज्योतिःशास्त्रे) २ कन्या तनया पक्षे कन्याराशिः । ३ तुलां उपमां पक्षे तुलाराशिं । ४ हरिनिभा सर्पसदृशी । ' हरिर्गोविंदवारींद्रचंद्रवातेंद्रभानुषु । यमाहिकपिभेकाश्वशुकेऽ-शोकान्तरे त्विषि । इति विश्वलोचनः ॥ ५ हरताळ: इति महाराष्ट्रभाषायां ॥ ६ अग्निनीडितां । ७ गरलं पक्षे जलं । ' विषं तु गरले जले ' इति विश्वलो॰ । ८ मारो मदनः मृत्युश्च । अक्षिभागेऽप्यथो मारो विघ्ने मृत्यौ स्मरे वृषे ' इति विश्वलो. । ९ आशुगो बाणवातयोः ' इति विश्वलो. । १० विषाज्जलात् जातं विषजातं पक्षे गरलजातं । ११ सागरजातं समुद्रजातं पक्षे सा श्रीमती गरजातं विषादुत्पन्नं मनुते । १२ परिवादोऽपवादः पक्षे परिवादध्वनिर्वीणाध्वनिः ।

न शृणोति । अलंकाराभियोग[1]: शलोरस्त्विति जल्पति । कुसुमकुञ्जं परिशोभि[2]तरुजं जानाति । लीलामराले हंस[3]बुद्धिमादधाति[4] । उपवनमयूरेषु शिखिर्मतिमारचयाति । क्रीडाशुके पतंगमनीषां विशेषयति ॥

अनंगरागं हृदयं मृगाक्ष्या अनंगदं बाहुयुगं विभाति ॥
तारुण्यतस्त्वद्विरहाच्च भद्र ! विहारहृद्यं[5] कुचकुंभयुग्मं ॥ ४९ ॥
इत्युक्तोऽयं वज्रजंघो मृगाक्ष्या मज्जन्मोदांभोधिमध्ये चिराय
पाणौ कृत्वा पट्टकं तावकीनं प्रादादन्यत्पट्टकं ते विचित्रं ॥ ५० ॥

तदनु, पंडितया समर्पितं पट्टकमादाय सा कुरंगशावविलोचना निर्वर्ण्य चिरं, संतापसंतप्ता चातकीव जलदकालं, मरालीव शरन्नदीपुलिनं, भव्यावलीव अध्यात्मशास्त्रं, कलकंठिकेव कुसुमितसहकारवनं, निर्जरपरिषदिव नंदीश्वरद्वीपं, प्रीतेः परां काष्ठामाटिटीके ॥

चक्रधरोऽपि षडंगबलतरंगितसावधिप्रदेशः समासाद्य अर्धपथं, समागतं भागिनीपतिं वज्रबाहुं, भागिनीं वसुंधरां, भागिनेयं वज्रजंघं च विलोक्यातिमात्रप्रीतः सद्मनमानीय सत्कृत्य च, कदाचिदतिसंतोषवशादिमां गिरमुदाजहार ॥

उदारपुत्रोऽपि[6] भवान्गृहं मे यतः समागादनुदारपुत्रः ॥ ततो
नृप ! प्रीतिनटी तनोति लास्यं मनोरंगतले मदीये ॥ ५१ ॥

---

१ अलंकाराभियोगं—भूषणसंबंधं पक्षे अलं अतिशयेन काराभियोगः कारागृहसंबंधः । २ परिशोभि—तरुजं तरोर्वृक्षाज्जायते इति तरुजं पक्षे समुत्पन्नरोगं । ३ हंसो मरालः पक्षे रविः । ४ सूर्यबुद्धिं ५ क्रीडायोग्यं पक्षे हारेण विनापि रमणीयं ६ न उदारः पुत्रो यस्येति विरोधः पक्षे अनुगता दाराः पुत्राः यं सः

ममाकाये मदिदं ते मही रमण ! वर्तते ॥
तद्दानं मयि प्रीतिर्यदि तेऽस्त्यनियंत्रणा ॥ ५२ ॥

इति वज्रदंतचक्रधरेणोक्ते वज्रबाहुनृपे "देव! तव प्रसादात्सर्वं ममास्त्येव किंतु कन्यारत्नं वज्रजंघाय प्रतिपादनीयं" इति बहुधा प्रार्थितवति, तत्प्रार्थनामंगीकुर्वाणो वसुधारमणस्तदानीमेव विवाहमंड-पारंभाय महास्थपतिमादिदेश ॥

महास्थपतिराततेने मंगलं मणिमंडपं ।
यत्संपदं विलोक्येव कापि लीनं त्रिविष्टपम् ॥ ५३ ॥

सुमनोवृंद[1]वासिततया, निर्जर[2]मनोहर्षकतया, सहस्रनेत्रा[3]नंदसंदायकतया, सदाखंडल[4]सद्वनिताजनमनोरमतया च त्रिविष्टप[5]मिदं मंडपं च तुल्यं ॥

तत्सर्वजनमनोज्ञं इदं त्रिदश[6]जनमनोज्ञं, तत्सौधालय[7]ख्यातं इदं सुरालय[8]ख्यातं तदिति न दृष्टांतमर्हति ॥

यत्किल पुरविराजितं, गोपुराविराजितं, रत्नशोभांचितं, विरल-

---

१ सुमनसां देवानां वृंदः समूहः पुष्पसमूहश्च । २ निर्जरसः देवाः जरारहिताश्च युवान इत्यर्थः । ३ सहस्राणि नेत्राणि यस्य सः सहस्रनेत्र इंद्रः पक्षे सहस्राणि नेतॄणां सहस्रनेतारः तेषां आनंदसंदायकः । अनेकनायकसंतोषकतयेत्यर्थः ४ आखंडलस्य शक्रस्य सद्वनिताः पतिव्रताः स्त्रियः तासां समूहेन मनोरमतया । पक्षे सदा अनिशं अखंडं अतिशयेन लसन्त्यश्च ताः स्त्रियश्च ताभिर्मनोरमतया । ५ स्वर्गः । ६ त्रिदशाः देवाः पक्षे त्रिंशाजनसुंदरं । ७ सुधाया अयं सौधः सौधश्चासौ आलयश्च सौधालयः तेन ख्यातं अमृतगृहेण ख्यातं इदं मंडपं अमृतगृहेण विख्यातं । पक्षे राजसदनविख्यातं 'सौधोऽस्त्री राजसदनमित्यमरः'। ८मदिरागृहविख्यातं पक्षे सुराणां देवानां आलयं गृहमिति विख्यातं

शोभांचितं, आनंतोल्लासकं, जनतोल्लासकं च । यच्च मणीद्धं, रम-णीद्धं, नरमणीद्धं, किंनरमणीद्धं । अत्युज्ज्वलं, महास्थपतेर्मत्युज्ज्वलं सुमत्युज्ज्वलं, वसुमेत्युज्ज्वलं च ।

महापूतख्याते जिनभवनवर्थे नरपतिः
महापूजां कृत्वा विमलशुभलग्ने शुभदिने ॥
सुतायाः स्वस्त्रीयस्य च विधिवदानंदभरितः
शुभस्नानं चक्रे मणिगणलसन्मंडपवरे ॥ ५४ ॥
ततो दिव्यांबरधरं तद्वधूवरमादरात् ।
प्रसाधनगृहे रम्ये प्राङ्मुखे विनिवेशितम् ॥ ५५ ॥

तदा लक्ष्मीमतिर्निजसुतायाः श्रीमत्याः नेपथ्यकल्पनाय प्रवृत्ता कचभरोऽयं सुदृग्मौलिलालितोऽपि मलिनस्वभावतया कुटिलस्वभावतया च सदा जडभृद्रुचिं वहति, मधुपमैत्रीं करोति, तया चामरत्वं चि-करोति बंधोऽस्य युक्त इतीव बंधं विदधाना, परिशोभितमालोत्कर्षा-सहमपि तत्कचनिचयं परिशोभितमालोत्कर्षेण भूषयंती, निर्मल-सरोवरे नीलोत्पलमिव, सितांबुजे लोलंबमिव, सुधाकरे कलंकमिव, तन्मुखे मृगमदतिलकं परिकल्पयंती, नासातिलकुसुमांचलोदंचितत्तुषा-

१ आनतानां नम्राणां उल्लासकं आनंदप्रदं । २ नरमणयो म-नुष्यश्रेष्ठास्तैरिद्धं उज्ज्वलं । ३ सुष्ठु मतयो येषां ते सुमतयस्तैरुज्ज्वलं । ४ वसुमत्या भूम्योज्ज्वलं । ५ सुदृग्मौलिलालितोऽपि स्त्रीमस्तकेन लालितः पक्षे सम्यग्दृष्टिलांकित इति ध्वनिः । ६ जडभृद्रुचिं डलयोरभेदात् जल-भृद्रुचिं इति जलभृतो मेघास्तद्वत्कांतिं । पक्षे जडभृतः अज्ञानिनः इत्यर्थः । ७ मधुपो भृंगः मद्यपश्च । ८ परिशोभितपुष्पमालोत्कर्षं ।

रबिंदुसुंदरं मौक्तिकं नासाग्रभागे विदधाना, विवेकवार्तानभिज्ञस्य क्षमाधरकलितविद्वेषस्य सूर्योदरांचितं साधुचक्रं निंदत: सततमूर्ध्वमेव पश्यत: कुचमंडलस्य विमुक्ताहारता न युक्तेति मत्वा किल तत्र मुक्ताहारं घटयंती, रतितंत्ररहस्यप्रतिपादकमनोहरारावशोभिततया कामस्य रसनैवेयं लेखनप्रमादेन 'रशना' जातेति कविजनैरुत्प्रेक्ष्यमाणां रशनां मध्यदेशे तन्वाना, कुसुमशरसर:कलहंसकौ हंसकौ पदयुगले परिकल्पयंती चिराय तां मंडयामास ॥

महनीयप्रभापूरैर्महार्घमणिभूषणैः ।
पुत्रं सा भूषयामास वज्रजंघं वसुंधरा ॥ ५६ ॥
एवं मंडितविग्रहौ परिलसद्वारांगनानर्तन-
व्यालोलन्मणिनूपुरारववरैः संपूरिते मंडपे ॥
नानावाद्यरवप्रकारमुखरे पृथ्वीश्वरैर्वेष्टिते
वेद्यां तत्र निवेशितौ सपादि तौ मोदं दशां तेनतुः ॥ ५७ ॥

तदनु, सरभसमितस्तत:प्रधावितस्य प्रतीहारजनस्य पादघट्टनजनितकुट्टिमध्वनिबंधुरेण, वारांगनाचरणरणन्मणिनूपुररवमेदुरेण, प्रचलितान्त:पुरजनमणिकलापमनोरमकलकलकमनीयेन, तत्पुर:सरकंचुकीजनकलितसंमर्दनिवारणपरवचननिर्भरेण, मंत्रविन्मुखकमलविनिर्गलन्निर्गलद्गंभीरशब्दपावनेन, विचित्रनानाविधवादित्ररवविराजितेन, विविधबंदिसंदोहपापठ्यमानबिरुदप्रपंचकलितेन, पौरवधूकलगानमनोहरेणोत्स-

---

१ आचार्ये विश्वासयुक्तं रविप्रीतियुतं । २ सज्जनसमूहः पक्षे उत्तम चक्रवाकपक्षिणं ३ विगतमुक्ताहारता त्यक्त–आहारता । ४ नूपुरौ । ५ द्वारपालजनस्य । ६ स्तुतिपाठकसमूहः ।

चकोलाहलेन, मुखरितादिगंतरे तन्मंडपांतरे सिद्धस्नानांबुपूतमस्तकं वधूवरं नवरत्नखचितचामीकरपट्टके विधाय चक्रधरः शुभे मुहूर्ते कंकेलिपल्लववेष्टितमुखभागं कनककरकं करेण बभार ॥

ततो न्यपाति क्षितिपेन तस्य करांबुजाते करकांबुधारा ॥
दीर्घं भवन्तौ सुखजीविनौ स्तामिति ब्रुवाणेव सुदूरदीर्घा॥५८
जग्राह पाणौ नरपालपुत्रीं कुरंगशावामललोलनेत्रां ॥
तस्याः करस्पर्शनसौख्यभारमीलद्दृगब्जः स हि वज्रजंघः॥५९॥
श्रीमती तत्करस्पर्शात्स्वेदबिंदूनधारयत् ॥
चंद्रकांतशिलापुत्री चंद्रांशुस्पर्शनादिव ॥ ६० ॥

अपरेद्युरसौ वज्रजंघः करदीपिकासहस्रैर्दिवसायमाने प्रदोषे श्रीमत्यानुगम्यमानः प्रभयेव प्रद्मबंधुरागत्य मेरुमिव महापूतजिनालयं प्रदक्षिणीकृत्य, कृतेर्याशुद्धिर्जिनभवनं प्राविश्य, तत्र गंधकुटीमध्ये विलसंतं भगवंतमभिषेकपुरःसरं पूजयित्वा कृतार्चनस्तत्स्तोत्रं प्रारेभे॥

भवभयनिशारंभे निद्राजुषां निखिलात्मनां
जिनवर! भवान्धत्से स्वापांगमुज्ज्वलमौषधं ॥
वयमिह ततांश्रितं निर्णिद्रमीश भजामहे

---

१ सुवर्णपट्टके (सोन्याचा पाटा इति महाराष्ट्रभाषायां) २ अशोकाकिस-लयं। ३ सुवर्णकलशं। ४ जग्राह पाणौ कुरुवंशदीपो जीवंधरः खेचरकामिनीतां ॥ निमीलिताक्षश्च बभूव सौख्यं स्पर्शाहितं द्रष्टुमिवांतरंगे॥ ५ गंधर्वदत्ता तत्पाणिस्पर्शेन समजायत ॥ वधूरिन्दुकरस्पर्शाच्चंद्रकांताशिला तथा ॥ इतीमं श्लोकद्वयं जीवंधरचम्पूकाव्यस्थं उपरितनश्लोकद्वयमनुसरति ॥

परिहृतमहदुःखास्पृष्टाः प्रबोधमहो चिरं ॥ ६१ ॥
पदं तव जिनाधिप ! मथितबोधवारां निधे ! ॥
भजन्भजति जातु किं न विपदं नराः सांप्रतम् ॥
इदं तु परमद्भुतं शिरसि तत्परागं सदा॥
सुबिभ्रदपरागतां व्रजति भव्यवर्गो भुवि ॥ ६२ ॥
इति स्तुत्वा देवं विमलमुनिवृंदं च विनमन् ॥
अयं राजीवाक्ष्या सह पुरमगात्पुण्यचरितः ॥
पुरे द्वात्रिंशच्छ्रीमुकुटधरसाहस्रकलितं ॥
महं विंदन्भोगान्सुचिरमनुभुंक्ते स्म विविधान् ॥ ६३ ॥

कदाचिदयं वज्रजंघः कंदर्पक्षोभितकनकनाराचधाराभिरिव श्रीमतीशयकुशेशयानिर्गलिताभिः कुंकुमजलधाराभिः पिंजरीक्रियमाण-देहो लाक्षारसच्छटाप्रहारपाटलितदुकूलो मृगमदजलबिंदुशबलचंदन-स्थासकः कनकयंत्रधाराभिक्रीड ॥

कदाचन पुरंदर इव सुमनोमंडितः सोऽयं श्रीमत्या सह ललिताप्सरः कुलमसेवत ।

पश्यतो मे हराम्नेत्रं जहार मृगलोचना ॥
इति मत्वेव सुरते जहार सुदृशोऽम्बरं ॥ ६४ ॥
अपूर्वपाणिग्रहणे प्रक्लृप्ते नृपेण देव्याः किल केलिगेहे॥
लाजायितं मन्मथहव्यवाहे मरोद्गिलन्मौक्तिकहारकेण ॥ ६५ ॥

---

१ पदं चरणं । २ चरणधूलिं । ३ रागद्वेषराहित्य । ४ नाराचो बाणः । ५ शयो हस्तः । ६ श्वेतरक्ती भूतवसनः । श्वेतरक्तस्तु पाटल इत्यमरः ७ शबल मिश्र । ९: इंद्रपक्षे सुमनोमंडितः देवैः परिभूषितः, वज्रजंघपक्षे कुसुमैरलंकृतः ।

जंघ्यापत्योर्मेलने केलिगेहे शंपावल्लीमेघयोर्यद्वदभ्रे ॥
आसीत्तत्रामेघसंपातवृष्टिस्तस्या जज्ञे मानसस्य प्रहर्षः ॥६६॥

अरुणविलसद्बिंबं ग्रस्तं तदा सहसा बला-
दहह पतितं मेरोः शृंगाच्च तारगणैस्ततः ॥
तिमिरनिकरव्याप्तश्चंद्रो बभूव नवोत्पल-
द्वितयमपि च लीलालोलं तयोः स्मरसंगरे ॥ ६७ ॥

निरंजनत्वं नयनांचलेऽभूद्विरागतांभूनयने मृगाक्ष्याः॥
नीव्यां कबर्यामपि बंधमुक्तिः पत्या समं दर्पककेलिकाले॥६८॥

एवं जिनेंद्रमहिमोत्सवपात्रदान—
पुत्रोद्भवादिविभवैः सरसस्य तस्य ॥
कांतासखस्य कमनीयविशालकीर्तेः
कालो महानविदितो निरगाच्च तत्र ॥ ६९ ॥

---

१ यद्वन्नभसि शंपावल्लीमेघयोर्मेलने सति मेघागमनाज्जलवृष्टिर्भवति तथा तयोः श्रीमतीवज्रजंघयोः क्रीडागृहे मेलने जाते सति मेघानामनागमनेऽपि वृष्टिरभवत् । स्वेदोदकेन गात्रार्द्रताऽभवत् । तथा वज्रजंघसंयोगेन तस्या मानसं हर्षयुतमभवत् ॥

२ तयोर्मदनकदने अलक्तरागेण शोभमानं तस्या बिंबं—अधरबिंबं ग्रस्तं वज्रजंघेन तच्चुंबितमित्यर्थः । तदा मेरोःशृंगात् तारकासमूहैःपतितं अर्थात् वज्रजंघेन दृढमाश्लिष्टायास्तनतटाद्धारगतमौक्तिकानि त्रुटितानीति भावः । चंद्रस्तिमिरनिकरव्याप्तो बभूव— अर्थात् विपरीतरते प्रवृत्तायास्तन्मुखं केशैर्व्याप्तं बभूवेति भावः । नवनीलकमलद्वयं लीलया चंचलं बभूव—रतिसुखानुभवने तस्या नेत्रे अर्धमीलितेऽभवतामित्यर्थः ॥

३ पापरहितत्वं गतकज्जलत्वं च । ४ अपगतरागत्वं अपगतापराधत्वं च । ५ कर्मबंधान्मुक्तिः नीविविस्रंसनं केशपाशशैथिल्यं च ।

वज्रबाहुरदात्कन्यां वज्रजंघसहोदरीं ॥
अनुंदरीं चक्रवर्तिसुतायामिततेजसे ॥
चारुलक्षणसंपन्नश्चाक्रिसूनुस्तया बभौ ॥
ज्योत्स्नयेव सुधासूतिः प्रभयेव च भास्करः ॥

इति श्रीमदर्हद्दासकृतौ पुरुदेवचंपूप्रबंधे द्वितीयस्तबकः ॥

तृतीयः स्तबकः

अथ कदाचिच्चक्रधरकलितपूजासत्कारपूजितश्चक्रिप्रतिपादितां महतीं सेनां कोशदेशादिकं च प्रतिगृण्हानया श्रीमत्या पुरस्कृतः षिश्रादिपरिवृतः, प्रस्थानसंसूचकभेरीभांकारपूरितभुवनतलो वज्रजंघोऽनु[१]व्रजितुमायातान्मंत्रिपुरोहितपौरवर्गान्नातिदूरे विसृज्य पुरस्तरंगितचतुरंगबलेन सह स्वपुरं प्रति निर्जगाम ॥

महीतलं तदा व्योमतलं चो[२]च्चैःकरेणुभिः
पुपूरे वज्रजंघस्य प्रयाणे परिजृंभिते॥ १ ॥

शंखास्तदानीं पृ[३]तनाधिराजैरापूर्यमाणा द्वितयं निभेदुः ॥
[४]शं तद्वियोगासहसज्जनानां वयस्ययूनां रभसेन [५]खं च॥२॥

एवं प्रयाणपटुतरबलेन सह तोरणकेतुजालादिभिरलंकृतमुत्पलखेटकं पुरं समासाद्य तत्र गगनतलचुंबिसौधसमाश्रितानितंबिनीजनकरोन्मुक्तकुसुमलाजोपहारसुरभितसाविधप्रदेशो नरपतिभवनमाससाद ॥

श्रीमतीं रमयामास वज्रजंघो विशालधीः ॥
मातापितृवियोगेन खिन्नां कोशघनस्तनीं॥ ३ ॥

सापि कुरंगलोचना सखीनामग्रगण्यया पंडितया नृत्यगीतादिविनोदमनुभवन्ती क्रमेण पंचाशतं यमान्पुत्रान्प्रासोष्ट । अथ कदाचिन्माणिसौधाग्रविराजमानो वज्रबाहुमहीपतिः सुरा[६]पगाडिंडीरखंडमिव, व्योमलक्ष्मीहसितमिव, नभस्तरुकुसुमपुंजमिव, गगनकाननविहरमाणस्तंबे[७]रमिव, कंचन शारदनीरदं तत्क्षणविलीनं तं विलोकमानो वैराग्यायत्त-

---

१ अनुसर्तुं । २ उच्चैर्हस्तिभिः उच्चैर्धूलीभिश्च । ३ सेनापतिभिः ४ सुखं ५ आकाशं । ६ देवनदीफेनसमूहमिव । ७ करिणमिव ।

चित्तस्तनयसमर्पितराज्यभारः पंचशतपृथ्वीपतिभिर्वीरप्रभृतिभिःश्रीमती-
तनयैश्च साकं जैनीं दीक्षामुपादाय क्रमेण कैवल्यमुत्पाद्य परं धाममा-
ससाद ॥

पैत्रिकीं संपदं प्राप्य प्रकृतीरनुरंजयन् ॥
वज्रजंघोऽपि वसुधां पालयामास सादरं ॥ ४ ॥

अथ वज्रदंतचक्रधरोऽपि स्वामिव सुरसभावं आतिदक्षं सभासंनि-
वेशमासाद्य सद्वृत्तरत्नमंडितं सिंहासनमलंकुर्वाणस्तत्र समागतेन वन-
पालेन समर्पितं सामोदं भ्रमरहितं पद्ममाजिघ्रंस्तद्गंधमुग्धमधुकरं भिति
तत्र संरुद्धं मृतं निरीक्ष्य भृशं निर्विण्णो, विरतविषयाभिलाषस्त
नयाय विदितनयाय अमिततेजोभिधानाय राजलक्ष्मीं प्रतिपादयितुका
मस्तस्मिन्सानुजे तपःसाम्राज्यमेव बहुमन्वाने, तत्सुताय पुंडरीकाय
वदमजितपुंडरीकाय बालाय राज्यमर्पयित्वा षष्टिसहस्त्रैर्देवीभिर्विंश-
तिसहस्त्रैर्नरपालैः सहस्त्रैः सुतैः पंडितया च परिवृतो यशोधरयो-
गींद्राशिष्यं गुणधरनामानं मुनिवरमाश्रित्य सत्वरमदीक्षिष्ट ।

ततश्चक्रधरापायाल्लक्ष्मीमतिरगाच्छुचम् ॥
अनुंदर्या सहोष्णांशुवियोगान्नालिनी यथा ॥ ५ ॥

बाले राज्यभरोऽर्पितः कथमयं बालो मया रक्ष्यते ।
पुण्यत्पक्षबलादृते किमधुना कर्तव्यमित्युत्कटं ॥
चिंताक्रांतमतिः खगाधिपसुतौ लक्ष्मीमतिः प्राहिणोत् ।
पत्रग्रंतकरंडकौ कुशलिनौ श्रीवज्रजंघं प्रति॥ ६ ॥

तदनु करंडकास्थितपत्रार्थज्ञानेन निश्चितसकलोदंतः किंचिच्चिंता-
क्रांतस्वान्तः काश्यपीकान्तः कान्तायै श्रीमत्यै यथानिश्चयं वृत्तमिदं
निवेद्य, समाश्वास्य च समाकुलमानसां तां, कृतप्रयाणोद्यमः पुरतो
विसृज्य चिंतागतिमनोगतिविख्यातौ दूतमुख्यौ, मतिवरानंदधनमित्रा-

कंपननामधेयैर्महामंत्रिपुरोहितश्रेष्ठिचमूपतिभिः परिवृतश्चलन्तमपरमिव जलधिं बलं पुरोधाय प्रस्थानभेरीरवपूरितभुवनोदरः प्रतस्थे ॥

[1]रंगत्तुरंगमतरंगवती करींद्र—
[2]यादःकुला बहुललोलकृपाणमत्स्या ॥
[3]श्वेतातपत्रघनफेनविराजमाना
सा वाहिनी नरपतेः प्रजवं चचाल ॥ ७ ॥

घोटाटोपस्फुटितवसुधाधूलिकापालिकाभिः
शोषं याते दिवि भुवि लसत्सिंधुयुग्मे क्षणेन ॥
शुंडोद्गच्छज्जलकणभरैर्दानपूरैश्च वेगा—
अन्वर्थाख्यैस्तदिदमुभयं पूरितं सिंधुरंध्रैः ॥ ८ ॥

ततश्च विकचकं सुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभितां निजसेनामिव महिषीसमाधिष्ठितां कंचुकीपरिवृतां चमरजातविराजितां च वनवीथिमासाद्य, तत्र कस्य-

---

१ उच्चलदश्वा एव तरंगा यस्याः । नदीपक्षे उच्चलदश्वा इव तरंगा यस्याः सा । २ करीन्द्रा एव यादःकुलं जलचरसमूहो यत्र । नदीपक्षे करीन्द्रसमजलचरप्राणिधारिणी । ३ बहुचंचलकृपाणाः खड्गाः एव मत्स्याः यस्यां।नदीपक्षे बहुचंचलखड्गसममत्स्यधारिणी । ४ श्वेतातपत्राण्येव घनफेनो यस्यां । नदीपक्षे श्वेतातपत्रसमघनफेनयुता । ५ वाहिनी नदी सेना च । ६ दिवि भुवि च अश्वखुरविदारितमहीसमुत्थधूलीराजीभिः स्वर्णदीमहीनदीयुग्मे शोषं गते सति शुंडानिर्गतजलकणैर्गंडस्थलनिर्गतमदजलैश्च तदिदं नदीयुग्मं यथार्थनामधेयैः सिंधुरैः पूरितं ॥ ७ वज्रजंघनृपसेना राज्ञीसमाधिष्ठिता । वनपंक्तिश्च महीषीभिः सैरिभैः समधिष्ठिता । सेना कंचुकीपरिवृता, अन्तःपुराधिकृतपुरुषैर्युक्ता वनवीथी च कंचुकीभिः सर्पैः परिवृता। ९ चमरजातं प्रकीर्णकं वनवीथिपक्षे चमराणां मृगविशेषाणां जातं समूहः ।

चित्सरःसमीपदेशे शीतलसुरभिलमंदगंधवहमधुरसलिलसन्निवेशे नरपालः सेनां परितो विधाय शिबिरमाससाद॥

कांतारचर्या संगीर्य पर्यटंतौ मुनीश्वरौ॥
ददर्श धरणीपालः स तत्रांबरचारिणौ ॥ ९ ॥
उत्थाय वेगेन धराधिराजः कृतांजलिर्भक्तिसमर्पितार्घ्यः ॥
प्रणम्य कांतासहितो मुनीन्द्रौ प्रवेशयामास निजं निकाय्यं१०

तत्र विशुद्धमतिरसौ नरपतिर्दमधरसागरसेननाम्ने प्रथितमहिम्ने शिथिलितभवनिगलाय मुनियुगलाय तस्मै विधिवदाहारं दत्वा,रत्नवृष्टिपुष्पवृष्टिगगनतरंगिणीतरंगवाहिमंदमारुतदुंदुभिध्वनिजयघोषणारूपाणि पंचाश्चर्याणि विलोकमानः, प्रणम्य संपूज्य मुनिपुंगवौ विसृज्य विबुध्य च कांचुकीयादिमौ चरमात्मतनुजौ, ससंभ्रमं श्रीमत्यासह सप्रीतः पुनस्तन्निकटमासाद्य, प्रथमं गृहस्थधर्मं स्वस्य श्रीमत्याश्च भवावलिं च श्रुत्वा सादरमेवं पप्रच्छ ॥

स्वबंधुनिर्विशेषा मे स्निग्धा मतिवरादयः ॥
मुनीश्वर! भवानेषां मह्यं ब्रूहि दयानिधे! ॥ ११ ॥
इति पृष्टो नरेंद्रेण मुनींद्रस्तुष्टमानस : ॥
अवधिस्पष्टनयन इदमाचष्ट सादरं॥ १२ ॥

अयं मतिवरो जंबूद्वीपपूर्वविदेहवत्सकावतीविषयप्रभाकरीपूर्यामतिगृद्धो नाम नरपालो जातस्तत्र बह्वारंभपरिग्रहवैभवविजृंभितनरकायुष्यः पंकप्रभानाम्नि नरके संजातनारकभावो दशसागरोपमास्थितिस्ततो निष्पत्य पूर्वोक्तनगरसमीपविलसिते निजधननिक्षेपपर्वते शार्दूलः समजायत॥

---

१ सेनानिवेशस्थानं ।

कदाचिद्विजिगीषयाप्युत्थितं निजानुजं निवर्त्य तन्महीधरमधिवसंतं सानुजं प्रीतिवर्धनं नाम महीरमणं, पुरोधाय मेधावतामग्रणीरत्र मुनीश्वराहारदानेन तव महान्लाभो भवितेति प्रतिपाद्य मुनीश्वरसमागमोपायमप्येवं कथयांबभूव ॥

प्रकीर्यंतां पुष्पैरलिकुलकलारावमुखरैः
पयोभिः सिच्यंतां घुसृणरसमिश्रैः सुरभिलैः॥
पुरीरथ्याः पृथ्वीपतिरयमितो यास्यति मुधा
ध्वजान्बद्ध्वा सौधेष्वपि तनुत भोस्तोरणगणान्॥१३॥

इति पुरे घोषणायां दत्तायां तथालंकृतं नगरं अप्रासुकत्वेनात्मनो विहारायोग्यं मत्वा कांतारचर्यां संगीर्य मुनिवरो यास्यति ॥

एवं पुरोधोवचनमंगीकृत्य धरारमणस्तथा कुर्वाणस्ततःक्रमेण समागताय पिहितास्रवनाममुनिवराय विधिवदाहारं दत्वा निर्लिंपनिपातितां वसुधारां विलोकमानस्तदानीमये धरारमण अस्मिन्महीधरे भवदीयदानवैभवविजृंभितरत्नवृष्टिनिरीक्षणक्षणजनितजातिस्मृतिः संत्यक्तशरीराहारः कोऽपि शार्दूलः शिलातले निविष्टः सोऽयं त्वयोपचर्यतां । अयं किल पुरुनंदनो भूत्वा चक्रवर्तितामेत्य परं धाम व्रजिष्यति इति मुनिवरव्याहारविस्तृतविस्मयो मुनिना समं गत्वा शार्दूलस्य सपर्यां विस्तारयामास ।

तदनु तेन मुनिशार्दूलेन स्वर्गी भवेति कलितकर्णजापः शार्दूलोऽयमष्टादश दिवसैस्त्यक्ताहारपरिग्रहो दिवाकरप्रभाविख्यातविमाने श्रीमदैशानकल्पे दिवाकरप्रभो नाम देवो बभूव ॥

तदानीमुदारमिममाश्चर्यं दृष्ट्वा तस्य नरपालस्य चमूपतिसचिवपुरोधसः परामुपशांतिमुपागता नृपदानानुमोदेन कुरुष्वार्याः संजा-

ताः कालांतेन नवैशानकल्पप्रभाकांचनरूपिताख्येषु विमानेषु प्रभाकर-कनकप्रभप्रभंजननामधेयाः सुराः समजायंत ॥

ललितांगभवे युष्मत्परिवारामरानिमान् ॥
चतुरश्चतुरान्धीरान्धुरीणानवधारय ॥१४॥

ततः प्रच्युत्य शार्दूलचरः सुरः श्रीमतीसागरयोः सुतस्तव मंत्री मतिवरः समजायत ॥

प्रभाकरश्च नाकात्प्रच्युत्य आजीवापराजितसेनान्योर्नंदनोऽयमकंपनो बभूव ॥

कनकप्रभस्तु तस्मात्प्रच्युतोऽनंतमतिश्रुतकीर्त्योः सुतोऽयमानंदस्तव पुरोधा बभूव ॥

प्रभंजनस्ततः प्रच्युत्य धतदत्ताधनदत्तयोस्तनूजो धनमित्रस्तव श्रेष्ठी समजायत ॥

इमां मुनींद्रस्य गिरं निशम्य तौ दंपती धर्मरतावभूतां॥
पप्रच्छ भूयोऽपि मुनीन्द्रमेनं धरापतिर्विस्मयदत्तचित्तः ॥१५॥
अमी नकुलशार्दूलगोलांगूलाः ससूकराः ॥
कस्मादत्रैव तिष्ठंति त्वन्मुखार्पितदृष्टयः ॥ १६ ॥
इति राज्ञानुयुक्तोऽसौ चारणर्षिरुवाच तं ॥
वचश्च[1] यस्य तेजश्च भास्वद्वर्णं विराजते ॥ १७ ॥

अयं किल व्याघ्रो भवान्तरे एतद्देशाविशोभितहस्तिनानगरे धनवतिसागरदत्तयोर्वैश्यदंपत्योरुग्रसेननाम्ना सूनुर्भूत्वा वसुधावेदसनिभादप्रत्याख्यानक्रोधात्संजनिततिर्यगायुष्यः, पृथ्वीपतिकोष्ठागारे

---

१ यस्य वचो भास्वद्वर्णं उज्ज्वलाक्षरसंपन्नं, यस्य तेजश्च उज्ज्वलकान्त्या युक्तं विराजते ।

निमुक्तान्पुरुषान्निर्भर्त्स्य घृततंदुलादिकं वेश्याजनेभ्यो ददानस्तद्वृत्तांत-ज्ञेन राज्ञा बंधितश्चपेटचरणाघातादिभिर्मृत्वा इह व्याघ्रो बभूव ॥

एष किल वराहः पूर्वभवे विजयनामपुरे वसंतसेनामहानंदयो राजदंपत्योर्हरिवाहननामा पुत्रो भूत्वा अप्रत्याख्यानमानमस्थिसमं बिभ्राणः पित्रानुशासनमसहमानः शिलास्तंभजर्जरितमस्तक आर्तो मृत्वा वराहोऽजायत ॥

अयं खलु वानरः पूर्वभवे धान्यनाम्नि नगरे सुदत्ताकुबेरयो-र्वैश्यदंपत्योर्नागदत्तनामा नंदनः संजातो मेषशृंगसमामप्रत्याख्यानमा-यामाश्रितः कदाचिन्निजानुजाविवाहार्थ एव स्वापणे विन्यसितस्वा-पतेयमंबायामादधानायां तद्वंचनोपायमजानानस्तिर्यगायुर्वशेन गोलां-गूलो बभूव ॥

अयं किल नकुलो भवान्तरे सुप्रतिष्ठितपुरे धनलोलुपः कांद-विकनामा लोलुपो भूत्वा, चैत्यालयनिर्मापणोद्यतस्य नरपालस्येष्टिका-वोष्टिपुरुषान्वशीकृत्य तेषामपूपादिप्रदानेन धनेष्टिकासंचयं संगृह्णान-स्तत्र कासुचित्सुवर्णशलाकाविलोकनेन विवर्धितलोभः कदाचित्पुत्र-मिष्टिकासंग्रहणाय नियोज्य स्वसुताग्रामं गत्वा ततः प्रतिनिवृत्तस्तथा नाचरितवतः पुत्रस्य शिरस्तटं लगुडताडनादिभिः स्वचरणाभ्यां समं निर्भिद्य राज्ञा च घातितो नकुलत्वमप्रत्याख्यानलोभेन समुपाजगाम ॥

मुष्मद्दानसमीक्षणेन परमं मोदं गतास्तत्क्षणं
जाताः पूर्वभवस्मृतिं प्रतिगता निर्वेदमुर्वीपते ! ॥
त्वद्दानानुमतेः कुरुष्वातितरां बद्धायुषोऽमी मृगाः
निःशंकाः पुरतः स्थिताः कुतुकिता धर्मामृतास्वादने॥१८॥

---

१ कांदविकः कांदवं अपूपादिभक्ष्यं तत्पण्यमस्येति कांदविकः ॥

अमी किल भवदीयाष्टभवपर्यन्तं भवतैव समं दिव्यमानुषगोचरान्भोगाननुभूय ततः सेत्स्यंति ॥ इयं च श्रीमती भवत्तीर्थे दानतीर्थप्रवर्तकः श्रेयान्कुमारो भूत्वा शाश्वतं पदमवाप्स्यति ।

इति सुवचनमाध्वीं कर्णपात्रेण पीत्वा
मुनिवरमभिवंद्यावासमागान्महीशः
तदनु च मुनिवर्यौ मेरुसंकाशधैर्यौ
विदधतुरुरुशोभौ वातमार्गप्रवृत्तिं ॥ १९ ॥

भूपतिश्च तद्गुणाध्यानसमुत्कंठितचेतास्तद्दिनं तत्रैवातिवाह्यापरेद्युर्बलेन सह प्रस्थाय प्रविश्य च पुंडरीकिणीं पुरीं शोकाक्रांतमतीं लक्ष्मीमतीमनुंदरीं च समाश्वास्य निरुपप्लवं च राज्यं मंत्रिमंडलमंडिते पुंडरीके नरपुंडरीके निवेश्य यथापुरं निजपुरं अभिजगाम ॥

किमेष सुरनायकः किमु सुमोल्लसत्सायकः
किमाहिततनुर्मधुः किमुत भूमिमाप्तो विधुः ॥
इति क्षितिपतिः पुरीसुकुचकुंभबिंबाधरी–
गणेन परिशंकितो गृहमगाद्गजैर्मंडितः ॥ २० ॥

स किल तत्र विचित्रप्रतीकशोभाभिरामया रामया सह समस्तऋतुविस्तारितानिस्तुलभोगाननुबोभूयमानः कदाचन मदनसहकारसहकारपल्लवतल्लजसमुल्लसन्मधुरसमये वसंतसमये, मधुमासलक्ष्मीमिव

१ वातमार्गो नभः । २ नरेषु पुंडरीकः श्रेष्ठः तस्मिन् । ३ सुमैः पुष्पैरुल्लसन्तः सायका यस्य सः पुष्पबाणो मदन इति भावः । ४ शरीरं ५ आम्रवृक्षः ।

तिलकशोभितसुरुचिरसालकाननां सद्यस्तनस्तबकाविराजितां कलकंठालापमनोहरां तां नितंबिनीं रमयन्माल्लिकामतल्लिकाविकासमूले निदाघकाले, धारागृहेषु चंदनद्रवसिक्तांगीं तां तन्वंगीमालिंगन्प्रावृषेण्यदिवसेषु वर्षालक्ष्मीमिवांबरोल्लसितपीनपयोधरामभ्रांमितां सज्जघनां तटिद्रुक्कांतिविराजितां च तामाविरलं परिरंभमाणः, शरदि च शारदलक्ष्मीमिव राजहंसमनोरमां रमयन्नयमनल्पसमयं गमयामास ॥

> कदाचन मणिप्रभातरलहेममंचांचिते ।
> तया सह धरापतिः पिहितरत्नवातायने ॥
> स वै शयनमंदिरे सुरभिधूपधूमावृते ।
> सुषुप्तिसुखमन्वभूत्स्तनतटाग्रजाग्रत्करः ॥ २१ ॥
> तत्रागरुलसद्धूपनिरुद्धश्वासनिर्गमौ
> दंपती तौ निशामध्ये दीर्घनिद्रामुपेयतुः ॥ २२ ॥

अथ जंबूद्वीपसुपर्वपर्वतोत्तरदिशासमाश्रितेषु मधुमैरेयादिरसभेदप्रदानप्रवणैर्मद्यांगैः, पटहमर्द्दलतालकाहलझल्लरीशंखप्रमुखनानावादित्रविधानैरातोद्यांगैर्मंजीरकेयूरहाररुचकमुकुटांगदादिभूषणवितरणप्रवीणैर्भूषणांगैर्नानाविधमाल्यकर्णपूरादिदानशौंडैर्माल्यांगैर्निजतेजोविजृंभितमंदो

---

१ वसंतलक्ष्मीः तिलकवृक्षशोभितमनोहरसालवृक्षवना । श्रीमत्यपि सौभाग्यतिलकशोभितमनोहरा चूर्णकुंतलसहितमुखा । मधुलक्ष्मीः नूतनस्तबक–पुष्पगुच्छविराजिता भवति, श्रीमत्यपि स्तनरूपगुच्छकविराजिता। मधुलक्ष्मीः कलकंठालापमनोज्ञस्वरा २ प्रावृषेण्यलक्ष्मीः अंबरे नभसि उल्लसितपीनपयोधरा शोभितनिबिडामोदा । इयं च श्रीमती अंबरे वस्त्रे उल्लसितौ पीनौ पयोधरौ स्तनौ यस्या एतादृशी । ३ अभ्रं इता पक्षे अभ्रमिता भ्रान्तिरहितेत्यर्थः ४ सज्जा घना यस्यां सत् जघनं यस्या इति च । ५ राजहंसाः मरालास्तैर्मनोरमा । राजसु नृपेषु हंसः श्रेष्ठो वज्रजंघो नृपतिस्तस्य मनोरमा । ६ मरणं । ७ मद्य । ८ वादित्रांगैः । ९ लज्जावशेन

क्षवक्षेनेव तत्र प्रवेष्टुमक्षमान्सूर्याचंद्रादीन्विदधानैर्मणिप्रदीपदानैर्दीपांगै- र्दिवाकरनिशाकरविकारधीरैर्ज्योतिरंगैस्तुंगतमहर्म्यमंडपसभागृहहाटक- नयनाटकशालास्थूललक्ष्यैर्गृहांगैः, सुधामपि सुधां शर्करामपि शर्करां[1] विदधानान् वीर्यवृद्धिकारानाहारान्ददानैर्भोजनांगैः, स्थालचषकभृंगा- रकरकादिवितरणोदारैर्भाजनांगैश्चीनपट्टदुकूलप्रावारपरिधानप्रदानचतुरै- र्वस्त्रांगैश्च दशप्रकारैः केवलमवनीभारैः कल्पपादपनिकरैः[2] परिशोभि- तेषु, चतुरंगुलसंमितया धरणीरमणीविधृतहरितांशुकशंकासंपादिकया तृण्यया[3] विराजितेषु, सुरभिसंचारसमीरकिशोरसमानीतकुसुमरजः- पुंजपिंजरितनभोभागतया संदानितवितानेष्विव विलसमानेषु उत्तर- कुरुषु श्रीमतीवज्रजंघौ पात्रदानप्रभावेण जंपतितां[4] संपादयामासतुः ॥

प्रागुक्ताश्च मृगा जन्म प्रापुस्तत्रैव भद्रकाः ॥
पात्रदानानुमोदेन परमं पुण्यमाश्रिताः ॥ २३ ॥

तत्र च मतिवरादयस्तद्वियोगविजृंभितशोकास्तदानीमेव दृढधर्म- नाम्नो मुनिवर्यस्य समीपे जैनीं दीक्षामाश्रित्य दुश्चरं तपस्तप्त्वाधो ग्रैवेयकस्याधोविमानेऽहमिंद्रपदमासेदुः ॥

छायासु कल्पकतरोः कमनीयमूर्ती
तौ दंपती ललितकामकलाविलासैः ॥
चिक्रीडतुर्महितकल्पकपादपस्य
लक्ष्म्यां प्रदत्तनयनौ नयनाभिरामौ ॥ २४ ॥

कदाचिदयं व्योमपथप्रकाशमानं सूर्यप्रभदेवविमानं दृष्ट्वा जातिस्मरतामासाद्य प्रबुद्धः प्रियया सह दूरादागच्छंतौ चारणमुनींद्रौ समीक्ष्य नलिन्या समं दिवस इव सूर्यप्रतिसूर्यौ प्रत्युद्गच्छन्नानंदबाष्प-

---

१ पानपात्रं २ समूहैः । ३ तृणानां समूहस्तृण्या । ४ पतिपत्निभावं

बिंदुसंदोहैस्तत्पादौ क्षालयन्निव प्रणम्य सुखोपविष्टौ तावेवं पप्रच्छ ॥

अहो मुनीन्द्रावरविंदबंधू युवां ध्रुवं यन्मम चित्तपद्मं ॥
भावत्कपादागमजातबोधं प्रसादमाध्वीकरसं प्रसूते ॥२५॥
भगवंतौ ! युवां कस्यौ कुतस्त्यौ किं नु कारणं ॥
युष्मदागमने ब्रूतमिदमेतत्तथाद्य मे॥ २६ ॥
इति प्रश्नं समाकर्ण्य मुनिर्ज्यायानभाषत ॥
दंतांशुमंजरीपुंजैर्दिशः सुरभयन्निव ॥ २७ ॥

अहं किल पुरा भवदीयमहाबलभवे भवत्सचिवाग्रणीः स्वयंबुद्धः कर्मनिबर्हणस्य जैनधर्मस्योपदेष्टा त्वद्वियोगाज्जातनिर्वेदो दीक्षित्वा सौधर्मकल्पविलसमाने स्वयंप्रभविमाने मणिचूलनामा सुरः संजातः साधिकसागरोपमायुष्कः ततः प्रच्युतो जंबूद्वीपपूर्वविदेहपुष्कलावती-विषयपरिशोभितपुंडरीकिणीनगर्यां सुंदरीप्रियसेनाव्हययो राजदंपत्योः प्रीतिंकराख्यातो ज्येष्ठः सुतः समभवं ॥

ततश्च प्रीतिदेवनाम्ना मम कनीयसानुजेन सह स्वयंप्रभजिनसमीपे जैनीं दीक्षामासाद्यास्थाय च तपोबलेन चारणपदं पाददानप्रभावेण भवंतमिहसंजातमवधिविलोचनेन विज्ञाय प्रबोधयितुमागतौ स्तः ।

महाबलभवे भवान्मम सुबोधनाद्दर्शने
न शुद्धिमुपसेदिवान्प्रबलभोगकांक्षावशात् ॥
ततो विमलदर्शनं विदितनिर्वृतेः साधनं
गृहाण गुणवारिधे ! तव तु लब्धकालोऽधुना ॥२८॥
शमाद्दर्शनमोहस्य सम्यक्त्वादानमादितः
जंतोरनादिमिथ्यात्वकलंककलितात्मनः ॥ २९ ॥

---

१ पादाः किरणाश्चरणाश्च ।

निर्भिद्य मिथ्यात्वमहांधकारमुदेति सद्दर्शनतिग्मरश्मिः॥
तेन प्रबोधं विमलं चरित्रमाराधयन्राजति भव्यजीवः॥ ३० ॥

जीवादिमोक्षपर्यंततत्वश्रद्धानमंजसा॥
त्रिभिर्मूढैरनालीढमष्टांगं विद्धि दर्शनम् ॥३१॥
तस्य प्रशमसंवेगावास्तिक्यं चानुकंपनं॥
गुणाः श्रद्धारुचिस्पर्शप्रत्ययाश्चेति पर्ययाः ॥३२॥

तथा जिनेंद्रसंदर्शितमोक्षमार्गादिषु शंकापनयनं, भोगाकांक्षासु विमुखता, मुनिजनतनुषु विचिकित्साविरहः,त्रिमूढतापायः, उपगूहनं,-सद्धर्मपदच्युतभव्यसंहातिस्थापनं, विमलगुणवत्सलता, श्रीमज्जैनशासन-प्रभावना चेति अष्टौ गुणाः सम्यक्त्वावयवाः प्रतिपादिताः ॥

मुक्तिश्रीहाररत्नं महितमहिमसद्दर्शनं धत्स्व चित्ते
यद्धृत्वा भव्यजीवो हृदि सपदि चिरं सौख्यमुद्वेलमेति॥
अंब! त्वं चाविलंबं भज भवजलधेर्दुस्तरस्यापि नावं
सद्दृष्टिं स्त्रैणहेतोः किमिति हृदि सदा खिद्यसे चारुनेत्रे!॥३३॥

इति मुनिवचनेन प्रापतुः पुण्यवंतौ
सपदि विमलसम्यग्दर्शनं दंपती तौ ॥
दधुरधिहृदयं ते व्याघ्रमुख्यार्यवर्या
नतमुनिपदपद्मा दर्शनं काललब्ध्या ॥ ३४ ॥

एवं बोधयित्वान्तर्हिते चारणयुगले किंचिदुत्कंठितमानसौ सम्यक्त्वभावनापरिशीलनलालसौ सुचिरं भोगाननुभूय जीविताते सुखोज्झितप्राणौ तौ जायारमणौ पुण्यवशेन गृहाद्गृहांतरमिवैशानकल्प-मासाद्य देवभूयमुपजग्मतुः ।

तत्र किल विचित्रसुखैकताने श्रीप्रभविमाने वज्रजंघार्यः श्रीधर-नामा सुरवर्यः, श्रीमत्यार्यां च स्वयंप्रभविमाने तत्समाननामधेयो-

देवः, शार्दूलार्यश्च तत्कल्पाविलसिते चित्रांगदविमाने चित्रांगदामरः, सूकरार्यश्च नंदाख्यविमाने मणिकुंडलीत्रिदशः, कोशार्यश्च नंद्यावर्तविमाने मनोहरसुमनाः, नकुलार्यश्च प्रभाकरविमाने मनोरथनिर्लिंपः समजायत॥

पुण्योदयेन फलितं सुरलोकसौख्य-
मासेदुषामतितरां ग्रुंसदाममीषां ॥
श्रीमत्सरस्थितिरुरोभुवि कल्पकद्रु-
क्रीडावने च समभूद्गत नैव चाभूत् ॥३५॥

नाकनारीमुखांभोजभ्रमरः श्रीधरः सुरः ॥
बुभुजे सुचिरं भोगान्कंदर्पसदृशाकृतिः॥ ३६ ॥

यद्देव्यो यश्च सन्मुख्यः सुमनोर्जानितांतभाः ॥
श्रीसारसदृशः पुण्यद्विलासगमना अहो! ॥ ३७ ॥

यश्च यत्परिवाराश्च सुशोभनमनाः सुराः ॥
सामोदा सुमनोमाला यस्य पार्श्वेऽप्युरःस्थले ॥ ३८ ॥

---

१ देवः। २ देवानां ३ देवानां वक्षसि शोभायुक्तकंठाभरणस्थितिः कल्पद्रुवने सरोवरस्थितिः । पुनर्देवानां वक्षसि लक्ष्म्या मात्सर्यस्थितिः कल्पद्रूपवने संपदो मात्सर्यस्थितिर्नाभूत् ॥ ४ देव्यः प्रशस्तवदनाः सुरोऽयं पुनः सतां मुख्यः । ५ सुमनोज—नितांतभाः शोभनमदन इवाधिककांतिमान् । देवीपक्षे सुमनःसु देवीषु जायते नितांत भाः कांतिर्यासां ताः । देवतासु अधिककांतिसंपन्नाः अस्य सुरस्य देव्य इत्यर्थः । ६ लक्ष्मीसारस्य सदृशा देव्यः । संपत्सारेण सदृशोऽयं सुरः । ७ पुण्यद्विलासेन गमनं गतिर्यासां ताः । पुण्यद्विलासं गच्छति मनो यस्य सः पुण्यद्विलसगमनाः विपुल सुखासक्तचित्तः इति भावः । ८ सुष्ठु शोभनं मनः यस्य एतादृशो देवः । यत्परिवारश्च सुष्ठु शोभनं नमनं येषां ते । ९ यस्य पार्श्वे सुमनोमाला देवपंक्तिः च यस्योरसि सुमनोमाला पुष्पमाला॥

वक्षोरःस्थलमाश्रिता मम हठाभेतं मनोज्ञस्मितो—
ल्लासैर्हारसितांशुकं च हरते नित्यं कलानां निधिः॥
भूषाभिः किल लोकबांधववसून्मुष्णाति तृष्णाकुले-
त्यालोच्यैव जहार वस्त्रममरो देव्या रते श्रीधरः॥३९॥

अथ श्रीप्रमाद्रिविलसमानमुत्पन्नकेकलज्ञानमहिमानं जगत्प्रीतिंकरं प्रीतिंकरं निजगुरुमासाद्याभ्यर्च्य च तं सर्वज्ञं महाबलभवेऽस्मन्मंत्रिणस्त्रयः कुदृष्टयः कीदृशीं गतिं प्राप्ता इति पप्रच्छ ॥

इति पृष्टः समाचष्ट सर्वज्ञः सुरवंदितः ॥
अस्यान्तर्ध्वांतसंतानमपाकुर्वन्वचोंऽशुभिः॥ ४० ॥

पुरा खलु भवति स्वर्गं गते लब्धबोधेषु चास्मासु दुर्मृतिं प्राप्तौ संभिन्नमहामती गाढांधतमसपदं निगोदास्पदमुपजग्मतुः। शतमतिश्च मिथ्याज्ञानप्रभावेन द्वितीयनरके वाचामगोचरदुःखमनुभुंक्ते ॥

इति वचनमुदारं कर्णदेशे वितन्वन्
शिरसि चरणयुग्मं तस्य भक्तिं च चित्ते ॥
शतमतिमतिखिन्नं धर्मनिष्ठं विधातुं
सपदि नरकमागात्तद्द्वितीयं सुरोऽयं ॥ ४१ ॥

या कल शर्कराप्रभा नामा जाज्वल्यमानज्वलनशिखाप्रतप्तभूमिभागा, दुःसहदुःस्पर्शस्फुलिंगकणसंगतवातपरीतांबरतलचुंबिविगलदंबुधरनिपतिततप्तांशुवृष्टिदुरवगाहा, विततविषवल्लीसंलक्षितासिपत्रवनपातितप्रहरणमयपत्रविदीर्णप्रतीकनारकमनाक्रोशमुखरितदिगंतरा संतप्तायोमयपुत्रिकासमालिंगितनारकतरंगितदुःखाक्रंदनघोरा, मखाग्निदीपितनवायसकंटकपरिमेदुरशाल्मलीवृक्षेषु कोशाकारैः परैः समारो-

---

१ शरीरं।

प्यमाणानामूर्ध्वाधःकृष्यमाणानां च पुरुषाणां क्षतैजपरीवाहपरीतमहा-
भागा, नानर्त्यमाननारककरकलितशूलाग्रकीलिताग्रभागवंभ्रम्याणानां
शोणितारुणविग्रहाणां केषांचिद्गात्रखंडैर्विकीर्णा विराजते ॥

तत्रावलोक्य शतबुद्धिमसौ सुराग्र्यः
किं भद्र वेत्सि खचरेंद्रमहाबलं मां ॥
मिथ्यात्वदुर्णयवशात्तव दुःखमेतत्
माप्त विधेहि हृदि दर्शनमित्युवाच ॥४२॥

इति बोधितोऽयं गृहीतसम्यक्त्वधृतिः शतमतिः कालान्ते निरयान्निर्गत्य, पुष्करार्धद्वीपपूर्वार्धपरिशोभितप्राग्विदेहप्रकाशमानमंगलावतीविषयसंगतरत्नसंचयनगरमधितिष्ठतोः सुंदरीमनोहरनामधेययो राजदंपत्योस्तनयो जयसेनाभिधानः संजातः । पाणिग्रहणप्रारंभे करुणाकरेण श्रीधरामरेण नारकीं वेदनां बोधितो निरस्तविषयाभिलाषस्तत्क्षणमेव यमधरं नाम गुरुवरं समाश्रित्य, दुश्चरणतपश्चरणदक्षः कालांते ब्रह्मेन्द्रो भूत्वा सुस्पष्टावधिलोचनस्तस्माल्लोकादागत्य कल्याणमित्रं श्रीधरमतिमात्रं पूजयामास ॥

तदनु श्रीधरोऽपि स्वर्गाच्च्युत्वा जंबूद्वीपप्राग्विदेहमहितमहावत्सकावतीविषयविराजमानसुसीमानगरपतेः सुदृष्टिनरपतेः सुंदरनंदायाः सुविधिनाम सूनुरजायत ॥

---

१ रुधिरं । २ पुनः पुनः नृत्यंतो नामत्यमानाः । ३ देहानां

सोऽयं कलानिधिरिति प्रथितोऽपि भास्वान्
सौम्योऽपि मंगलतनुः सुमना नरोऽपि ॥
बाल्ये रराज सुविधिर्मदवार्जितोऽपि
श्रीसुप्रतीकविदितोऽपि च सार्वभौमः ॥ ४३ ॥
प्राणोऽपि जगतां सोऽयं प्रचेता राजनंदनः ॥
नरसार्थहिता यस्य सरसार्थहितापि गीः ॥ ४४ ॥

स किल यथाकालं परिगृहीतसत्कलत्रः पितुरुपरोधेन प्राप्त-राज्यभारश्चक्रधरस्याभयघोषाह्वयस्य स्वास्त्रियोऽयं चाक्रिसुतां मनो-रमां उद्वाह्य तया सह रममाणो राज्यमनुशशास ॥

यस्य च पुरं रंगोज्ज्वलं तुरंगोज्ज्वलं चतुरंगोज्वलं च नीप-

---

१ सोऽयं नृपः कलानिधिरपि चंद्रोऽपि भास्वान् सूर्य इति विरुद्धं। तत्परिहारः चतुःषष्ठिकलानिधिरपि प्रकाशमान्॥सौम्योऽपि मंगलतनुः सोमस्य अपत्यं पुमान् सौम्यःबुधग्रहः।बुधग्रहोऽपि मंगलग्रह इति विरुद्धं। तत्परिहारः सौम्योऽपि मनोरमोऽपि मंगलतनुः शोभनशरीरः। नरोऽपि सुमनाः देव इति विरुद्धं। तत्परिहारः सुष्ठु शोभनं मनश्चित्तं यस्य सः। मदवर्जितोऽपि श्रीसुप्रतीकोऽपि सार्वभौमः यः मदजलवर्जितोऽपि श्रीसुप्रतीकदिग्गजः सार्वभौमदिग्गजश्चेति विरुद्धं। तत्परिहारश्चायं यःगर्वरहितः श्रिया शोभमानं प्रतीकं शरीरं यस्य तथा सार्वभौमो नृपः। २ यः प्राणोऽपि वायुरपि प्रचेता वरुण इति विरुद्धं। परिहारश्च यः जगज्जीवनस्तथा प्रकृष्टं चेतो· मनो यस्येति विद्वानिति भावः। यस्य सरसार्थहितापि गीर्नरसार्थहिता इति विरुद्धं। तत्परिहारश्चायं शृंगारादिरसयुक्ता पदार्थप्रतिपादिनी हितकारिणी तद्वाणी,नराणां सार्थः समूहस्तद्धितकरीति च। ३रंगोज्ज्वलं-सभामंडपोज्ज्वलं ४ चतुरंगोज्ज्वलं अश्वकरिरथपत्तिभिश्चतुःसाधनैः सैन्यैर्युक्तं।

हृद्या वनीपहृद्या अवनीपहृद्याश्चारामाः ॥

आर्याधिकानंददो भार्याधिकानंदद:सभार्याधिकानंददश्च पृथ्वीपतिः॥

मारविलसितं कुमारविलसितं सुकुमारविलसितं च यस्यांत:पुरं ॥

वरतोल्लासिता नवरतोल्लासिता अनवरतोल्लासिता च वनिताजनता॥

यस्य च यशोमाला राजमनोरमा सुरराजमनोरमा च ॥

यस्मिन्शासति महीवलयं सुवृत्तस्य कुचस्य कठिन इति पीडा, अपापस्य कूपस्य विरस इति खननं, सुगुणस्य मुक्ताहरस्य अंतश्छिद्र इति भंगः, महातपास्थितिमहितस्य सरोजस्य सपंक इति मीलनं, सुमनोभूषितानां कुंतलानां वक्रा इति आकर्षणं, सुरक्तस्य वनितोष्ठस्य अधर इति खंडनम् ॥

---

१ यस्य आरामा नीपहृद्याः कदंबवृक्षमनोज्ञाः, वनीपहृद्याः वनपालकमनोरमाः, अवनीपहृद्याः अवनीं पान्ति इति अवनीपा राजानः तैर्मनोहराः। २ मदनः ३ बालको युवराजश्च । ४ उत्कृष्टता । ५ नूतनसंभोगः। ६ अनवरतं नित्यं । नित्यानवरताजस्रमिति अमरः ७ यस्मिन्नृपे शासति सुवृत्तस्य सुचरितस्य पीडा नास्ति परं सुवृत्तस्य शोभनवर्तुलाकारस्य कुचस्यैव कठिनत्वात्पीडा अस्ति । ८ तत्र अपापस्य पापरहितस्य जनस्य खननं अपमानो नास्ति परं अद्भिः रहितस्य कूपस्य विरस इति जलरहित इति खननं अस्ति । ९ शोभनगुणयुतस्य जनस्य न भंगः किंतु तंतुयुक्तमुक्ताहारस्य सच्छिद्रस्य भंगोऽस्ति १० अधिकतपश्चरणेन पूज्यस्य मुनेः मलिनं संकोचो नास्ति। किंतु अधिकसूर्यातपस्थितस्य कमलस्य कर्दमोत्पन्नत्वान्मीलनं संकोचोऽस्ति । ११ विद्वद्भूषितानां जनानां क्रूरा इति नास्त्याकर्षणं परं पुष्पालंकृतानां शिरोरुहाणां वक्रत्वादाकर्षणमस्ति । १२ सुरक्तस्य परपुरुषस्य खंडनं नास्ति पं अरुणस्य ओष्ठस्य अधरंचुंबनमस्ति ॥

एवं शासितराजस्य रममाणस्य कांतया
स्वयंप्रभो दिवश्च्युत्वा केशवाख्यः सुतोऽजनि ॥४५॥
वज्रजंघभवे यासौ श्रीमती तस्य वल्लभा ॥
तस्मिञ्जाते सुते राज्ञः प्रीतिरासीद्गरीयसी ॥ ४६ ॥

इहैव किल सुरलोकनिकाशे देशे शार्दूलचरश्चित्रांगदेवः स्वर्गात्प्रच्युत्य बिभीषणनृपालस्य प्रियदत्तायां वरदत्तनामसूनुरजायत ॥

मणिकुंडली चानंतमतिनंदिषेणयो राजदंपत्योर्वरसेनसमाह्वयः पुत्रो बभूव ॥

मनोहरश्चंद्रमतिरतिषेणनाम्नो राजजायापत्योश्चित्रांगदः पुत्रो बभूव ॥

मनोरथोऽपि चित्रमालिनीप्रभंजनयोः क्षत्रियभार्यापत्योः प्रशांतमदनो नाम नंदनोऽजायत ॥

तदनु चक्रधरेणाष्टादशसहस्रनृपपरिवृतपार्श्वभागेन सममेतेषु विमलवाहाख्यं जिनमाश्रित्य प्रव्रज्यामास्थितेषु, सुविधिभूपालस्तु पुत्रस्नेहेन गार्हस्थ्यं त्यक्तुमक्षमस्तत्क्षणमुत्कृष्टोपासकस्थाने दुश्चरं तपस्तप्त्वा, प्राणान्ते जैनीं दीक्षामासाद्य सम्यगाराधितमोक्षमार्गः समाधिना त्यक्ततनुरच्युतेंद्रो बभूव ॥

केशवश्च परित्यक्तकृत्स्नबाह्यांतरोपधिः ॥
प्राप्तो जैनेश्वरीं दीक्षां प्रतींद्रोऽभवदच्युते ॥ ४७ ॥
पूर्वोक्ता वरदत्ताद्याः पुण्यात्पार्थिवनंदनाः ॥
तदानीं समजायंत तत्र सामानिकाः सुराः ॥ ४८ ॥
राकाकोकारिप्रतीतवदनो राजीवसल्लोचनः ।

१ सूकरार्यचरः । २ कपिचरः । ३ नकुलार्यश्च । ४ कोकस्य चक्रवाकस्य रिपुः चंद्रः ।

श्रीमानच्युतवासवः सुरभिलं मंदारमाल्यं वहन् ॥
रेजे भूषणरत्नकांतितटिनीखेलन्मरालस्फुर- ।
द्देहः कांचनशैलशृंगतुलितावंसौ दधत्सुंदरः ॥ ४९ ॥

यस्य च समदयो गजघटया तुलिता चित्तवृत्तिः । सदाभया तनुलतया सदृशी सामानिकपरिषत् । अतिशोभनया संपदा समाना देवीसंततिः । अतिमृदुलया वचोधारया संमिता सुरसुंदरीजनगानकला । शोभितसुवर्णसरोरुहया करकांत्या तुल्या समानीकपद्धतिः । कलितमनोजया तारुण्यलक्ष्म्या निकाशा धैर्यवृत्तिः । सुगंधिगंधवायुविशोभितरया कल्पकवनवीथिकया सगंधा सैंधवपरंपरा ॥

किं च यद्देवीकुचमंडलेषु मकरीगणश्चक्रभासुरता सरसता चेति युक्तमेव यतोऽत्रे सरश्चकासामास किं तु कुचभरो नीरसंहितो नासीदित्यद्भुतमेव ॥

त्र्यरत्निप्रमितोत्सेधदिव्यदेहेन राजितः ॥

---

१ भुजशिरसी । २ मदसहितया समानदया च । ३ यस्य सामानिकपरिषत् सदा आभया सदा आभया कांत्या तनुलतया सदृशी । ४ प्रशस्तकांत्या संपदः अधिकशोभनयाः यस्या सा एतादृशी देवीपरंपरा । ५ अतिमृदुलयः तालः यस्याः सा गानकला अतिकोमलया वचोधारया संमिता । ६ प्रकाशितसुवर्णमयकमलसदृशया करकान्त्या प्रशस्तसुवर्णमयकंठहारयुक्ताश्वा समानीकपद्धतिः तुल्या । ७ धृतो मन्मथो यया सा तया तारुण्यलक्ष्म्या । कृतो मनसो जयो यया सा धैर्यवृत्तिः १२ सुगंधिवायुना विशोभितरया कल्पकवनवीथ्या । सुगंधिवायुविशोभितो रयो वेगो यस्याः सा अश्वपद्धतिः सगंधा । ८ मकरिकापत्रं मत्स्यगणश्च । ९ वरूथेनं भासुरता, चक्रवाकपक्षिणां भासुरता च । १० शृंगारादिरसयुक्तता जलसहितताच । ११ कुचमंडले । १२ सरोवरं मुक्ताहारश्च । १३ जलसहितो नास्तीति विरोधः । पक्षे नीरसानां शृंगारादिरहितानां हितः न भवति ॥

मानसोऽस्य प्रवीचारो विष्वं।णोऽपि तथा भवेत् ॥५०॥
द्वाविंशतिसहस्त्रैश्च समानां सकृदाहरेत् ॥
तथैकादशभिर्मासैः सकृदुच्छ्वासितं भजेत ॥ ५१ ॥

संचारिणीभिरिव हेमलताभिराभि-
र्देवीभिरेष ललिताकृतिरच्युतेंद्रः ॥
चिक्रीड दिव्यसरसीषु कुमुद्वतीषु
मंदारकुंदरवनेषु च मंदरेषु ॥ ५२ ॥

ततश्च तस्य स्वर्गप्रच्युतिलिंगेषु देवीजनशोकाग्निविस्फुलिंगेष्विव प्रकटीभवत्सु, धीरधीरमनाः सोऽयं अच्युतेंद्रःषण्मासानर्हत्परमेष्ठिसपर्यामत्याश्चर्यां विधाय त्रिदिवात्प्रच्युत्य, जंबूद्वीपप्राग्विदेहविशोभितपुष्कलावतीविषयमंडितपुंडरीकिणीनगर्यां श्रीकांतावज्रसेनयो राजदंपत्योर्वज्रनाभिनामा पुत्रः समजायत ॥

तयोरेव सुता जाता वरदत्तादयः क्रमात् ॥
विजयो वैजयंतश्च जयंतोऽप्यपराजितः ॥ ५३ ॥

अथ वज्रजंघभवे तस्य ये मंत्रिपुरोहितसेनाधिपश्रेष्ठिनो मतिवरानंदाकंपनधनमित्रनामधेया अधोग्रैवेयकेष्वहमिंद्रा जातास्ते किल ततः प्रच्युत्य सुबाहुमहाबाहुपीठमहापीठाव्हयास्तयोरेव तनयाःसमजायंत ।

नगर्यां केशवोऽत्रैव धनदेवाव्हयोऽभवत् ॥
कुबेरदत्तवणिजानंतमत्याश्च नंदनः ॥ ५४ ॥

निसर्गसौंदर्यनिधेरमुष्य तारुण्यमासीत्पुनरुक्तिपात्रम् ॥
विशाविहारालयवज्रनाभेर्हेम्नो यथा वर्णविशेषकारि:५५
लक्ष्म्या साकं विपुलमभवत्तस्य वक्षस्तदानीं ॥

---

१ मैथुनं । २ भोजनं वत्सराणां॥

सत्वा शत्रुक्षितिपविभवैर्मध्यदेशः कृशोऽभूत् ॥
कीर्त्या सार्धं जघनवलयं विस्तृतत्वं प्रपेदे ॥
तेजोलक्ष्म्या सह गुणनिधेरुद्गता रोमराजिः ॥ ५६ ॥

तदनु वज्रसेनमहाराजोऽपि तस्मिन्नेव तनये राज्यलक्ष्मीं नियोज्य लोकांतिकामरैः प्रबोधितो विहितनिष्क्रमणमतिः कलितसुरवरापचितिः सहस्रप्रमितैर्नराधिपतिभिःसह परिनिष्क्रम्य तपोलक्ष्म्या समालिंगितदेहोऽपि मुक्तिलक्ष्मीं प्रमोदिनीं चक्रे ॥

जयागारे चक्रे विजितरविबिंबे रुचिभरैः ॥
समुद्भूते पुण्यात् क्षितिपतिरसौ कौतुकवशात् ॥
विधायैतत्पूजां विलसितषडंगेन महता ॥
बलेनाथ श्रीमान्स निखिलदिगंतानि जितवान् ॥५७॥
धनदेवोऽपि तस्यासीद्धरणीशस्य चक्रिणः ॥
रत्नं तद्गृहपत्याख्यं निधौ रत्ने च योजितम् ॥५८॥

यस्य च महीरमणस्यारिचक्रं पाणिलालितं खंडितं च । सुमनोमाला कंठे पार्श्वे च । यस्य सुराः पौरवर्गो विधेयाश्च । यस्य च वचनक्रम इव सत्यो, भुज इव सालसदृशो वनिताः । यस्य च मनोजवन्ति तु-

---

१ अराः सन्ति यस्मिंस्तत आरि आरि च तच्चक्रं चारिचक्रं । तत् पाणिलालितं । शत्रुचक्रं शत्रुसमूहः तत्खंडितं । २ पुष्पमाला गले विद्वत्समूहश्च पार्श्वे । ३ सुष्ठु राः द्रव्यं यस्यासौ सुराः शोभन द्रव्ययुक्तः इति भावः ॥ सुराः देवाश्च । पौरवर्गः शोभनद्रव्ययुतः देवाश्च विधेया भृत्याः इत्यर्थः । ४ यस्य वचनक्रम इव वनिताः सत्यः पतिव्रताः । ५ भुज इव सालसदृशश्च अलसेन सहिता दृशो दृष्टयो यासां ताः । वचनक्रमः सत्यः मिथ्याभाषणरहितः । भुजश्च सालस्तटस्तत्सदृशः । ६ तुरंगसमूहाः मनोजवंति चित्तवद्वेगवंतो भवन्ति । देवीमंडलानि च मनोजो मदनः अस्ति येषु तानि मदनयुक्तानि इति भावः ।

रंगसमूहा देवीमंडलानि च । वनराजीवंति वनितादृशः क्रीडास्थानानि च । स्त्रीणां भ्रमन्ति नाभयो न बुधाः । उत्सर्पन्ति रोमराजयो न शत्रवः । दरंति कंठा न पौराः । गदंति वियोगा न दुर्भाषां जनाः । हरंति हासा न धनानि चौराः ॥

आलोक्य दिग्जये यं शात्रवसैन्ये निषादियूथस्य ॥
अंकुशमगलद्धस्तात्कुंश्चमक्ष्णोः शं तथैव मनसोऽपि॥५९॥
आलक्ष्य यस्य वीर्यं युद्धारंभे धुरि द्विषां हस्तात् ॥
गलति स्म चंद्रहासो हासोऽपि च तत्सतीमुखांभोजात्॥६०॥
जयश्रिया यत्र वृते रणाग्रे विवाहशोभामरिभूमिपालः
लेभे तदानीं रिपुसैन्यवर्गाश्चित्रं चिरंनंदनसौख्यमापुः॥६१॥
असौजन्ये निपुणोऽपि सौजन्यनिपुणोपि मर्त्येन्द्रशायामप्यच्युतोमर्त्येन्द्रो बभूवेति चित्रं ॥

---

१ वनितादृशः वनराजीवन्ति वनं जलं, राजीव कमलं जलकमलमिव आचरंति इति वनराजीवन्ति । वनितानेत्राणि जलस्थितकमलवद्विभान्तीति भावः । क्रीडास्थानानि च वनानामुद्यानानां राजी पंक्तिः अस्ति येषु तानि वनराजीवन्ति । २ स्त्रीणां नाभयो भ्रमंति जल निर्गमां इव आचरंन्ति न बुधा भ्रमेन्ति भ्रान्तियुक्ता भवन्ति । ३ रोमराः जयः उत्सर्पति उद्गच्छत्सर्प इव प्रतिभान्ति । शत्रवः न उत्सर्पन्ति नाभि द्रवन्ति । ४ दरन्ति शंखवदाचरति कंठाः न दरन्ति भयं प्रादुर्वन्ति पौरा । ५ वियोगा गदन्ति रोगायन्ते । जना दुर्भाषां न गदन्ति न ब्रुवन्ति । ६ हासा हरंति सेना हरन्ति चौरा धनानि न हरन्ति । ७ कुशं जल । ८ शं सुखं ९ चंद्रहासः खड्गः । १० जयश्रियाऽयं नृपो वृतः शत्रु नृपश्च विवाहशोभां लभते स्मेति चित्रं । तत्परिहार अस्मिन्नृपतौ जयश्रिया वृते सति शत्रुभूपालः विहतवाहनशोभां लेभे । ११ रिपुसैन्यवर्गाः पुत्रसौख्यं प्रापुरिति चित्रं । परिहारः रिपुसैन्यवर्गा मृत्वा देवत्वं प्राप्य नंदन वनसौख्यं भेजुरिति भावः । १२ असौ सौजन्यनिपुणोऽपि सौजन्यनिपुण इति विरोधः । परिहारश्च असौ जन्यानिपुणः युद्धप्रवीणः । मनुजेंद्रदशायां अच्युतेंद्र इति चित्रं । अकारेण च्युतः अमर्त्येन्द्रः मर्त्येंद्र इत्यर्थः ।

यस्य च सपक्षा विपक्षाश्च सकलभ-यशस्य-गमना: । सुमहितां मुक्तापांसुलभवनपालिमधिवसन्ति ॥

कुंदसुंदरयशोविशोभितः पाकशासनसमानवैभवः ॥
सोऽयमुज्वलगुणो निधीश्वरःशास्ति स्म सुचिराय मेदिनीं॥६२॥

तदनु कदाचन विषयाभिलाषविरतस्वान्तः मेदिनीकांतः वज्रदंतसमाह्वये पुत्रे विन्यस्तसमस्तराज्यभारः षोडशसहस्रपरिमित पृथ्वीपतिभिः, सहस्रेण नंदनैः, अष्टाभिः सोदरैर्धनदेवेन च परिवृतः, स्वगुरोस्तीर्थकरस्यापेकंठ जैनीं दीक्षामासाद्य, तीर्थकरत्वांगानि षोडशभावनाः सुचिरं भावयन् अतिदुश्चरमाश्चर्यावहं तपश्चचार ॥

ततोऽसौ कालांते मथितसुतपाः पुण्यचरितो ।
महीकांतः शांतोऽविशत शिखरं श्रीप्रभगिरेः ॥
परित्यक्ताहारः प्रकटितसमाधिर्गुणनिधिः
सुखात्त्यक्त्वा प्राणानगमदहमिंद्रत्वपदवीं ॥ ६३ ॥

सर्वार्थसिद्धावहमिंद्रदेवः स्वकान्तिदुग्धांबुधिमध्यमग्नः।
राकासुधासूतिरिवाकलंकः पुंजीकृतो वा सुषमैकसारः ॥६४॥

अथवा राकाकोकारिः सकलकलावल्लभतया सन्मार्गनिविष्टतया चानेन समानोऽपि सोऽयं दोषाकरोऽपि कलंकमलिनोऽपि सत्पतिरिति, सप्तविंशतिर्तारापतिरपि शततारापतिः, हिमकरोऽपि परिशोभितमीन

१ यस्य सपक्षाः गजसहितश्लाघनीयगमनाः पूज्यां त्यक्तधूलिगृहपंक्तिमधिवसंति ॥ विपक्षाश्च सकल-भययुक्तगमनाः मुक्तापां त्यक्तजलां सुलभवन-पालीं-सुलभवनसमूहां अधिवसन्ति ॥ २ पूर्णमासोचंद्रः । ३ दोषां रात्रिं करोति इति, ४ सतां सज्जनानां पतिः । सतां नक्षत्राणां पतिः । ५-६ सप्तविंशतितारापतिरपि शततारापतिरिति विरोधः शततारामिधस्य नक्षत्रस्य पतिरिति परिहारः ७।८ हि-मकरोऽपि मकरराशिरपि परिशोभित मीनराशिरिति विरोधः स हिमकरश्चंद्रः परिशोभितमीनराशिमान् ।

इति, मृगकृत्तिकाविशेषोऽपि परिलसितसितांशुक इति, नक्षत्राधिपोऽपि राजेति, जडस्वभावोऽपि जडव्युत्पन्नोऽपि कलानिधिरिति, भश्रीकरोऽपि नैभश्रीकर इति, स पुनर्वसुवर्गशोभितोऽपि स्वातिसमृद्धिविराजितोऽपि पूर्वाशांवशेन शुभोदयं भूभृत्सेवां दिने दिने करोति इति परस्पर विरुद्धार्थं प्रकटयतीति नोपमानभावमर्हति ॥

सुमनोधर्मतया तयास्य समानोऽपि पंचशरः सुदृशामपि बाधां विदधाति, मार्गणानां पंचतामपि सहते इति न दृष्टांततामनुभवितुमीष्टे । वसंतस्तु सकलसुमनोगरिष्ठोपि जातिभ्रष्ट इति स्मरणार्होऽपि न भवति इति कटकाचिततया न तुलां भजति इति न चित्रमेतत् ॥

१-२ हरिणचर्मयुक्तोऽपि राजितशुभ्रवस्त्रवानिति विरुद्ध । पक्षे मृगशिराकृतिकानक्षत्रयुक्तः; प्रकाशितशुभ्रकिरणः । ३ न क्षत्राणां क्षत्रियऽणां अधिपोपि राजेति विरुद्धं पक्षे तारकाणां अधिपोऽपि चंद्र इति । ४-५ जडस्वभावोऽपि मूढतास्वभावोऽपि जडव्युत्पन्नोऽपि जडबुध्या जातोऽपि कलानिधिरीत चित्रं, परिहारः डलयोरभेदात् जलस्वभावः जलव्युत्पन्न इति कलानिधिः षोडशकलायुक्तः । ६-७ भानां नक्षत्राणां श्रियं करोतीति भश्रीकरः नभसः श्रियं करोतीति नभःश्रीकर इति परिहारः ८-९-१०-११ स पुनर्द्रव्यसमूहशोभितोऽपि स्वस्य धनस्य अतिसमृध्याविराजितोऽपि पूर्वानुगतधनाशावशेन भूभृत्सेवां राजसेवां करोति इति विरोधे परिहारः पुनर्वसुनक्षत्रशोभितः स्वातिनक्षत्रविभवविशोभितः सन्पूर्वदिग्वशेन उदयाचलसेवां दिने दिने करोति इति परिहारः ॥ १२ देवत्वधर्मयुक्ततया । पुष्पधनुर्युक्ततया । १३ सम्यग्दृष्टिजनानामपि पक्षे स्त्रीणामपि। १४गतींद्रियकायादिचतुर्दशमार्गणानां पक्षे बाणानां। १५विनाशतां पक्षे पंचसंख्यात्वं। १६ सकलदेवगरिष्ठोऽपि जातिभ्रष्ट इति विरोधः पक्षे सकलपुष्पगरिष्ठोऽपि जातिभ्रष्टः नवमाल्लिकापुष्पविरहितः, नवमाल्लिकोत्पत्तिर्ज्येष्ठ भवति । अवशेषाणि पुष्पाणि प्रायः वसंततौ समुत्पद्यन्ते ॥१७ कर्कराशिना युक्तः न तु राशिं भजति ।पक्षे कटकाभरणयुक्तः ।

तेप्यष्टौ भ्रातरस्तस्य धनदेवोऽप्यनल्पधीः
जातास्तत्सदृशा एव देवाः पुण्यानुभावतः ॥

स किलायमहमिंद्रस्त्रयस्त्रिंशत्पारावारपरिमितास्थितिर्हस्तमात्रोच्छ्रितदेहः स्वक्षेत्र एव नवरत्नप्रभामनोहरे विहरमाणः संकल्पमात्रकृतसन्निधानैः कुसुमगंधाक्षतादिभिर्जिनेंद्रसपर्यां कुर्वाणः क्वचिदनाहूतमिलितैः स्वसमानवैभवैरहमिंद्रैर्धर्मगोष्ठीषु संभाषमाणः, त्रिसहस्राधिकत्रिंशत्सहस्रवर्षातिक्रमे मानसं दिव्यमाहारमंगीकुर्वाणः पंचदशदिनाधिकषोडशमासावसाने प्रोच्छ्वासं प्रकटीकुर्वाणः सुखमासामास ॥

* इति श्रीमदर्हद्दासकृतौ पुरुदेवचम्पूप्रबंधे तृतीयस्तबकः ॥ *

चतुर्थः स्तबकः

प्राज्यप्रभावप्रभवः प्रशस्तधर्मस्य पादानतदेवराजः ॥
विध्वस्तमिथ्यात्वतमा जिनेश आद्योऽथवान्ये ददतां शुभानि ॥ १ ॥

इह खलु जंबूद्वीपसंभावितभारतवर्षविशेषकायमानराजतशिखरिदक्षिण-भागे तुलितस्वर्गैकखंडे मध्यमखंडे कालसंभौ मुखे मनोहरां गां, भुजे ज्यां हृदि क्षमां, भूदेव्या विरहमसहमान इव बिभ्राणः, कीर्तिक्षौमविलसितानां दिगंगनानां घसृणरसपरिक्लृप्तन्यात्युक्षिकासंदेहदायकेन प्रतापेन विभ्राजमानः, कुलकृतामंत्यः निखिलभाविमहीपालानां नाभिर्नाभिनामधेयो राजा बभूव ॥

तस्यासीन्मरुदेवीति देवी देवीव सा शची ॥
चरंती हेमवल्लीव साकारेवैंदवी कला ॥ २ ॥

सा खलु बिंबोष्ठी चंद्रलेखेव गगनतलस्य, वसंतलक्ष्मीरिव सहकारवनस्य, चंद्रिकेव चंद्रस्य, प्रभेव प्रभाकरस्य, मदलेखेव दिग्गजस्य, कल्पवल्लीव कल्पपादपस्य, कुसुमश्रीरिव मधुमासस्य, कमलिनीव सरो-

१ समीचीनधर्मस्य उत्कृष्टमाहात्म्यस्थानं चरणानतदेवराजः निरस्तमिथ्यात्वतिमिर आद्यो जिनेशः नः कल्याणानि ददातु । इति आद्यजिनपक्षे श्लोकाभिप्रायः । अवशिष्टजिनानां पक्षेऽयं भावः —सम्यक्स्वरूपस्य धर्मस्योत्तममाहात्म्यानां प्रभवः स्थानानि, पादयोरानतो देवराड् येषां ते, निराकृतमिथ्यात्वतमाः तमशब्दोऽकारान्तोप्यस्ति । जिनानां ईशते इति जिनेशा अद्यादन्ये त्रयोविंशतिजिनवराः शुभानि ददतां ।

वरस्य, तारापंक्तिरिव प्रदोषसमयस्य, हंसमालेव मानससरोवरस्य, चंदनवनराजिरिव मलयाचलस्य, फणामणिपरंपरेव फणिपतेः, त्रिभुवनविस्मयजननी जननी वनिताविभ्रमाणां, खनी गुणरत्नानां, वनीं कांतिलतानां, धुनी शृंगाररसस्य, महीपालभूषणं बभूव ॥

भानि भ्राजितकांतिसारलहरीं रात्रिंदिवं सेवितुं ॥
प्रोद्युक्तानि विहाय तानि खतलं तस्याः कुरंगीदृशः ॥
पादांभोजयुगे समाविरभवन्नूनं नखानि क्षणात् ॥
तस्मात्खं च नभःस्थलं समभवद्रूढयेव तारापथम् ॥ ३ ॥
स्वर्णस्थितिं प्राप्तमपि प्रभूतां सरोजमस्याः पदवारिजस्य॥
वसुप्रपंचानपहृत्य राज्ञो भयाद्वनांते वसतिं विधत्ते ॥४॥
मनोजतूणीयुगलं मृगाक्ष्याः जंघायुगं नूनमिति प्रतीमः॥
यतस्तदग्रे पदकैतवेन तद्बाणभूतं जलजं चकास्ति॥५॥
तदूर्ध्वकांतिं स्वकरे चिकीर्षुर्मत्तद्विपो ऽसौ यतनं विधत्ते ॥
तत्कांतिचौर्याय सदा प्रवृत्तो रंभां विमथ्नाति कुतोऽन्यथासौ॥६॥
कटीमंडलमेतस्याः कांचीसालपरिष्कृतं ॥
मन्ये दुर्गमनंगस्य जगड्डामरकारिणः ॥ ७ ॥

---

१ नक्षत्राणि शोभमानकांतिसारवीचिं तां मरुदेवीं अहर्निशं सेवितुं खतलं—आकाशतलं परित्यज्य: तस्याश्चरणकमलयुग्मे नखानि समजायंत । अत एव आकाशं ‘खं’ शून्यरूपं समभवत् । तथा नभस्थलं अभवत् । ‘न भानां नक्षत्राणां स्थलं नभस्थलः तर्हि तस्य तारापथमिति कथं नाम प्रथितमिति चेद्रूढित इति ब्रूमः ॥ २ कांचनस्थितिं पक्षे शोभनजलस्थितिं । ३ द्रव्यसमूहं पक्षे किरणसमूहं । ४ राज्ञश्चंद्रस्य । ५ वनांते जलमध्ये अरण्यांते च । ६ शराधियुग्मं । ७ मन्मथबाणरूपं । ८ रंभां मोचातरुं कदलीमित्यर्थः । ९ जगद्विजयकारिणः ।

स्वयमंबरमपि मध्यं तस्याःसूक्ष्मांबरोपेतम् ॥
तदपि च नेत्राविषयं बभूव चित्रं सुमध्यायाः ॥ ८ ॥
परिवेष्ट्य मध्ययष्टिं नाभिबिलांतं कुरंगलोलाक्ष्याः ॥
मणिखचितसर्वदेहश्रितं कांचिप्रदाकुरधिशिश्ये ॥ ९ ॥
रोमश्रेणी कुसुमधनुषा यौवनारामवृद्ध्यै ॥
नाभीवापीनिकटघटिता किं घटीयंत्रदारु ॥
तस्याधस्तात्त्रिवलिकपटात्कल्पितं तद्विरेजे ॥
सोपानानां त्रितयमतनोः पादविन्यासहेतोः ॥१०॥
हस्तोज्ज्वलोऽसौ नखशीतरश्मि-
स्तस्यास्तुलां नांचति युक्तमेतत् ॥
तथापि चित्राधिककांतिशोभी
स्वातिप्रकाशं च चकार चित्रम् ॥ ११ ॥
तस्याःकुचौ मारमदेभकुंभौ ध्रुवं यदस्याः परिमौक्तिकश्रीः ।
रोमावलीवाल्लिमिषेण रेजे शुंडाप्रकांडश्च चिरादधस्तात् ॥१२॥
चिरमुपगतामेतां त्यक्तुं नभोगसरोगतां।
कुवलयदृशस्त्रासीदब्जद्वयं नयनाननं ॥

---

१ स्वयमंबरमपि वस्त्रमपि तस्याः मध्यं सूक्ष्मांबरोपेत सूक्ष्मवस्त्रोपेतमिति विरोधः। परिहारस्त्वेवं तस्याः मध्यं आकाशवदातिशयेन सूक्ष्मं तथा मृदुवस्त्रोपेतं। तदपि च नेत्राविषयं नेत्रं वस्त्रं तस्य अविषयं वस्त्ररहितं बभूवेति विरोधः। तत्परिहारश्च नयनागोचरं बभूवेति ॥ नेत्रं विलोचने वृक्षे वस्त्रमूले गुणे पथि ॥ इति विश्वलोचनः। २ प्रदाकुः सर्पः। ३ रोमपंक्तिरूपेण कृत्रिमप्रियालवृक्षेण। ४ मदनस्य। ५ करेणोज्ज्वलः पक्षे हस्तनक्षत्रेणोज्ज्वलः। ६ तुलां तुलाराशिं तुलामुपमां। ७ चित्रा नक्षत्रं पक्षे चित्राऽनेकविधा चासौ स्वधिककांतिश्च तया शोभते। ८ स्वातिनक्षत्रं पक्षे स्वस्य धनस्य अतिप्रकाशं च कारेति चित्रं ॥ ९ नभसि गच्छति इति नभोगस्तस्य भावः नभोगता पक्षे न भोगता।सरो गता पक्षे रोगसहितता। १० अब्जद्वयं कमलं चंद्रश्च।

अहमपि भवाम्यस्याः कंठस्तथाब्जसमाह्वयः ॥
इति किल दरस्तस्याः कंठात्मतां समगच्छत ॥ १३ ॥
वचनाधरौ मृगाक्ष्या मधुरौ तत्राद्यसंगतो वर्णः ॥
शुकलाल्यश्चरमगतः किंशुकलाल्यास्त्वियान्भेदः ॥१४॥
नासाकैतवदीर्घवंशकलितस्तंभे कुरंगीदृशः ॥
भ्रूवल्लीद्वयरज्जुबद्धशिखरे द्राङ्नाट्यजीवि स्मरः ॥
राज्ञस्तद्रुचिराननस्य पुरतस्तत्तांडवाडंबरं
चक्रे चित्रतरं समस्तजनताचेतोहरं सादरम् ॥ १५ ॥

अस्याः किल शुभदलसत्कांतिविराजितं राजहंससंतोषनिदानमब्जाभिख्यांचितं सकलमनोहरामोदकारणं सुमनःश्लाघ्यं वदननलिनं च समानं। तथापि प्रथमं सकचं विकलंकं सरसत्वमुपगतं कर्णाभरणादिभिर्मुक्तामयं। अपरं च विकचं सपंकं नीरसत्वमुपसेवते तथापि पूर्णचंद्रोदये सरोगमिति न दृष्टान्तार्हं ॥

१ अब्जं शंखः । २ तस्या वचनं शुकवल्लाल्यं ३ तथाधरः किंशुवत्पलाशपुष्पवदारक्तः । ४ नृत्यजीवी मदनो घ्राणरूपे वंशस्तंभे बद्धे ये भ्रूरज्जू चाटित्वा घ्राणरूपे वंशस्तंभशिखरे मरुदेवीमुखरूपराज्ञः पुरतः अनिर्वचनीयं आश्चर्यकरं सकलजनमनोहरं विस्तृतं नृत्यमकरोत् ॥ नर्तकोऽपि राजादीनां पुरतःस्तंभाग्रमारुह्य नर्तनमाश्चर्यावहं तनोतीति प्रतीतमेवं सर्वेषाम् ॥५ अस्याः वदनं शुभद-लसत्कांतिविराजितं, नलिनं शुभदल-सत्कांतिविराजितं । अस्या वदनं राजहंससंतोषनिदानं नृपोत्तमनाभिराजानंदकारणं, नलिनं तु मरालमोदहेतु भवति । वदनं अब्जाभिख्यांचितं—कमलवत्सौंदर्ययुक्तं, नलिनं तु अब्ज इत्याभिधानेन युतं । 'अभिख्या तु यशःकीर्तिशोभाविख्यातिनामसु' इति विश्वलोचनः । वदनं सकलमनोहरामोदकारणं सकलमनःसंतोषकारणं । नलिनं सकलचित्तहरसुगंधिकारणं । सुमनःश्लाघ्यं पुष्पेषु प्रशस्यं नलिनं । वदनं विद्वत्सु प्रशस्यं ।

कचतिमिरे लोलदृशो निबिडे मारजनिभावितोत्कर्षे ।
कुसुमस्रजो विचित्राश्चक्रुर्हा हंत सौरभानुगतिं ॥१६॥
स तया कल्पवल्ल्येव लसदंशुकभूषया॥
समाश्लिष्टतनुर्भूपः कल्पांघ्रिप इवाद्युतत् ॥ १७ ॥

अथ ताभ्यां दंपतीभ्यामलंकृते सुरलोकनिकाशे तस्मिन्देशे कल्पपादपात्यये भावितीर्थकृत्पुण्यसमाहूतः पुरुहूतः तत्क्षणमेव विस्मयकरविचित्रसन्निवेशविशेषां कवलीकृतसुरपुरगर्वा नगरीं कांचिदयोध्यां नाम कल्पयामास ॥

सुत्रामा सूत्रधारोऽभूच्छिल्पिनः कल्पजाः सुराः ॥
यत्र तत्पुरसौंदर्यं को वा वर्णयितुं क्षमः ॥ १८ ॥

यत्र पण्यवीथिकासु सकलभ—वनानीव सकल—भवनानि मदनागमोचितरसालसालपनसहितविटपालिपालिताभिर्मृदुलवलीभिरंचितानि विशोभंत। यत्र च सुरसालावलीव सुरसालावली सदाखंडलसद्विचाररमणीया तथापीयं च मरालिगतिहृद्या, सा पुनरमरालिगतिहृद्या,—सुमनःसमूहाः सामोदभ्रमरहिताः किंतु वनार्हसमुन्मेषा न वनार्हसमुन्मेषाश्च, रा-

---

१ मारजनिभावितोत्कर्षे मदनोत्पत्त्या लंभितोत्कर्षे पक्षेम या शोभाया युक्ता या रजनी तया संप्रापितोत्कर्षे । २ सूरस्य सूर्यस्य इमे सौराः सौराश्च ते भानवश्च किरणास्तेषामनुगतिं । पक्षे सौरभं सुगंधत्वं तस्य अनुगतिं अनुसरणं । ३ इंद्रः । ४ इंद्रः । ५ हस्तिपोतवनानि । ६ सुर-सालाः कल्पवृक्षास्तेषां आवलीव पंक्तिरिव । ७ शोभनाश्च ते रसाला आम्रवृक्षाः पुंड्रेक्षवश्च तेषां आवली । ८ सदा शक्रस्य प्रशस्तसंचाररमणीया पक्षे सदा अखंडशोभमानपक्षिभ्रमणमनोहरा । ९ हंसीगतिहृद्या । १० देवपंक्तिगमनहृद्या । ११ पुष्पसमूहाः पक्षे विद्वत्समूहाः । १२ सहर्षभ्रान्तिरहिताः सुगंधत्वाद्भ्रमरहिताः । १३ अरण्यार्हविकसनयुक्ताः । १४ मराला इव

जहंसा इव राजहंसाः सरसां तरंगविभवमाश्रिताः किंतु भोगमनोहरो-चितोल्लासाः । नभोगमनोहरोचितोल्लाश्च । निर्जरजना इव निर्जरजन-सुरतानंदबंधुराः किंतु वनीविहारसक्ता अवनीविहारसक्ताश्च ।। ललिता-प्सरःकुलानीव ललिताप्सरःकुलानि स्वर्णस्थितिकलितानि

मंजुगुंजन्मनोज्ञहंसकानि विलोलोर्मिकोज्ज्वलानि सर्वतोमुखकांति मधुराणि कमलाधिकशोभांचितानि किंतु विकचपद्मवदनानि सकचपद्मवै-

१ नृपोत्तमाः। २ सरोवरमध्यविभवमाश्रिताः राजहंसाः । शृंगारादिरससहितांतरंगविभवमाश्रिता राजश्रेष्ठाः । ३ न विद्यते भोगादीति विरोधः पक्षे खचराणां ।चित्तहरणोचितोल्लासाः राजश्रेष्ठाः४ नभसा गच्छंति इति नभोगाः पक्षिणः तेषां मनोहरणयोग्य उल्लासो तेषां तं । ५देवा इव। ६ तरुणजनाः। ७ देवस्वानंदसंयुताः पक्षे संभोगानंदसंयुताः । ८ वनानां समूहो वनी । ९ मनोहरदेवांगनासमूहा इव जलसरो वरकुलानि १० कांचनयुक्तानि पक्षे सुवर्णः जलं तेन युक्तानि सरांसि । ११ मंजु मधुरं गुंजन्तो मनोज्ञा मनोहरा हंसकाः मराला यत्र, पक्षे मधुरं ध्वनन्ति चित्तहरनूपुराणि येषां तानि। १२ चंचललहर्युज्वलानि पक्षे चंचलांगुलीयकोज्वलानि देवांगनाकुलानि । ‘ ऊर्मिका त्वंगुलीये स्यात्तरंगे-मधुपध्वनौ ’ इति विश्वलोचनः । १३ सर्वतः मुखकांतिमधुराणि वदनप्रभा-मधुराणि । सरः पक्षे जलकांतिमधुराणि ‘ कबंधमुदकं पाथः पुष्करं सर्वतो मुखं ’ इत्यमरः । १४ कमलैः अधिकशोभांचितानि सरांसि । पक्षे कमलाया अपि अधिकशोभायुक्तानि देवांगनाकुलानि ‘ कमलं जलजे नीरे ” कमला श्रीवरस्त्रियाम् ’ इत्युभयत्र विश्वलोचनः। १५ सरःकुलानि त्रिकचपद्मवद-नानि प्रोत्फुल्लानि कमलान्येव वदनानि येषां एतादृशानि । १६ देवांगना-कुलानि च सकचानि केशसहितानि पद्मवत् कमलवत् वदनानि मुखानि येषां तानि ।

दनानि । सुपर्वसुंदरास्तेजनास्तेजनाश्च तथापि कृशानुभावास्पदत्वम-कृशानुभावास्पदत्वं मुक्तास्थानत्वममुक्तास्थानत्वं चेति परस्परभेदः ॥ यत्र च राजेव राजा सकलकलावल्लभः कुवलयानंदसंदायकश्च, किन्तु दीनबंधुर्नदीनबंधुरलीकाविप्रियो नालीकाविप्रियः, क्षत्राधिपतिर्नक्षत्राधिपतिर्वसुधावैभवमनोहरो नवसुधावैभवमनोहरश्च ॥

साकेते किल तत्र चित्रनगरे देवाधिराजः स्वयं ॥
नाभिक्ष्माधिपतेर्विधाय चतुरो राज्याभिषेकोत्सवं ॥
तद्देव्याश्च सुपट्टबंधनविधिं कृत्वैतयोर्विश्वदृक् ॥
सूनुः संभवितेति कौतुकवशात्पूजां व्यधत्ताधिकम् ॥१९॥
षड्भिर्मासैर्जिनाधीशे स्वर्गादवतरिष्यति ॥
रत्नवृष्टिं दिवो देवाः पातयामासुरादरात् ॥ २० ॥

सा किल रत्नवृष्टिरत्र त्रिभुवनाधिपतिरवतरिष्यतीति कौतुकवशेन समागता स्वर्गसंपदथवा पुण्यकल्पद्रुमप्ररोहपरंपरा यद्वास्मत्तेजसां निरा-

१ अयोध्यानिवासिनो जनाश्च सुपर्वसुंदराः सुपर्वाणो देवास्तद्वदिव सुंदराः तथापि देवमनुजयोर्भेदं निर्दिशति। देवेषु कृशानुभावास्पदत्वं कृशानुभावस्पदत्वं कृशोऽनुभवः प्रभावस्तस्यास्पदत्व स्थानत्वं जनेषु च अकृशप्रभावस्थानत्वं पक्षे कृशानुः अग्निस्तस्य अनुभावस्तेजस्तस्य आस्पदत्वं । 'कृशानुः पावकोऽनल' इत्यमरः । २ देवेषु मुक्तास्थानत्वं वर्तते अर्थात् स्वस्थानं मुक्त्वा अत्रायोध्यां क्रीडार्थं आगच्छन्ति । जनास्तथा न अत्रैव क्रीडां कुर्वन्ति स्वर्गादपि अयोध्याया मनोहरत्वात् ॥ ३ चंद्र इव । ४ षोडशकलावल्लभः ५ चतुःषष्टिकलावल्लभः । कुवलयं चंद्रविकाशि कमलं पक्षे कोर्भूमेर्वलयं मंडलं । ६ दीनानां मित्रं ७ न दीनबंधुः पक्षे नदीनां इनः पतिस्तस्य बंधुः मित्रं चंद्रः । ८ अनृते विगतप्रियो राजा । नालीके पद्मखंडे विप्रियो चंद्रः पद्मानां संकोचकारकात्वात् ॥ ' नालीके पद्मखंडेऽपि ' इति विश्वलोचनः ॥

करणनिदानमद्भुतं तेजोऽत्र समुदेष्यति इति मत्वा तत्सेवार्थं पूर्वमेव समागता नक्षत्रपरंपराहोस्विज्जगद्गुरुजन्मोत्सवो मयि भवतीत्यमंदानंद-वशेन लोकपुरुषे कलिततांडवे जगत्संक्षोभवशेन संजातानिधिगर्भस्रुतिः, किंवा परस्परमनुप्रविष्टा विद्युदिंद्रायुधसंततिरिति नभश्चरैरुत्प्रेक्ष्यमाणा वसुधारा जगद्भर्तुर्हिरण्यगर्भतां प्रकटयितुमिव नाभिनरपालसदनांगणे निपपात ॥

रत्नगर्भा धरा जाता हर्षगर्भाः सुरोत्तमाः॥
क्षोभमायाज्जगद्गर्भो गर्भाधानोत्सवे विभोः ॥ २१ ॥

अथ कदाचिद्गंगातरंगविमलदुकूलप्रच्छदशोभिते सौधे सुप्ता सा मरुदेवी निशायाः पश्चिमे यामे निजकुचयुगलमिवावधीरितधराधरमैंद्रं गजं, शृंगारसहितं परिशोभितं माहारावसक्तं वृषभं, स्तंबेरमकुंभस्थलनिर्भेदनपटुं गर्जत्पंचाननं, निजकांतकीर्तिमिव सुरनागैर्लालनीयां पद्मां, भ्रमराहितमनोरमामवदातां मालायुगलीं, जीवंजीवं प्रत्यानंदसंदायिनीं सकलांचितवृत्तिमिंदुमंडलीं, स्वनायकवक्षःस्थलमिव पद्माधिकोल्लासकरं पुरः परिस्फुरंतं भास्वन्तं, सरसंयुक्त पद्मावृतं शातकुंभकुंभयुगं, विमलसरःस्थितिसमासक्तं मीनद्वयं, निजवल्लभमिव कमलांचितैः कवीश्वरैः संस्तुत कुवलयप्रासाधन निर्मलं सरोवरं, सदुच्च-

१ चंद्रोपकेण । २ स्तंबेरमः करी । ३ सिंहं । ४ सुरेषु नागः श्रेष्ठः इंद्र इत्यर्थः । पक्षे सुराणां नागः हस्ती ऐरावण इत्यर्थः । ५ जीवजीवश्चकोरकः । ६ सकलैः अंचिता श्लाघ्या वृत्तिर्यस्य । ७स्वस्य मरुदेव्याः नायकः पतिः नाभिनृपः । ८ पद्मा लक्ष्मीः पक्षे पद्मं कमलं । ९ पुष्पमाला युतं । १० सुवर्ण । ११ कमलया संपदा अंचितैः युक्तैः । पक्षे कमलयुक्तैः । १२ महाकविभिः पक्षे जलपक्षिश्रेष्ठैः । १३ कमलैरलंकृतं पक्षे भूमंडलालंकृतं ।

लहरिधुरंधरं सज्ज–नैक्रमकरमुग्रतर–वारिमाजितक्ष्माभृत्कुलं पारावारं, सद्वृत्तरत्नमंडितं सिंहासनं, सुरुचिरमणिमनोहरं सुरभवनं, बहुशोभनागमहितं फणींद्रभवनं, लोलांशुकैविराजित रत्नसंचयं, प्रतापिनं निर्धूमपावकं च विलोकयामास ॥

दृष्ट्वेमान्षोडश स्वप्नानद्राक्षीन्मादिरेक्षणा ॥
प्रविशंतं स्ववक्त्राब्जं पुंगवं कुंदनिर्मलम् ॥ २२ ॥

अरुणांबरं दधाना संध्यारमणी विनिद्रपद्ममुखी ॥
देवि ! तव पादसेवां कर्तुमिवायाति कमललोलाक्षी ॥२३॥

लक्ष्म्याःसमस्तवसुवृद्धिपुषां निवासो-
प्यब्जं तथा वसुमतो वसुभिः परीतं ।
देवि ! त्वदीयमुखराजविरोधहेतो
र्नीलालके नवसुमत्त्वमहो दधाति ॥ २४ ॥

तवाननांभोजविरोधिनौ द्वा-

१ सदुच्चलहरिव्रजोद्धुरं प्रशस्तोत्प्लवमानाश्वसमूहव्याप्तं । पक्षे प्रशस्तोच्चलहरीसमूहैः तरगवृंदैर्व्याप्त । २ सज्जनानां पद्धतिकरं पक्षे उच्चलन्नक्रमकरजलजंतुयुक्तं । ३ उग्रखड्गेन विनाशित शत्रुनृपतिकुलं पक्षे उग्रतरजलैर्माज्जितपर्वतसमूहं ॥ ४ पीवरोच्चलहरिव्रजोद्धुरं सज्जनक्रमकरं समंततः अब्धिमुग्रतरवारिमाज्जितक्ष्माभृतं पतिमिवावनीभुजां इति धर्मशर्माभ्युदये । ५ सच्चतद्वृत्तं चारित्रं तदेव रत्नं तेन मंडितम् : प्रशस्तवर्तुलमणिमंडितं । ६ अत्यधिकमंगलशास्त्रमहितं नाभिं । पक्षे अत्यधिकशोभायुक्तैर्नागदेवैः पूज्यं ॥ ७ वस्त्रेण पक्षे किरणेन । ८ आरक्तवस्त्रं पक्षे अरुणेन सूर्यसारथिना सहितं अंबरं आकाशं ॥ ९ वसुमतः धनिकस्य पक्षे चंद्रस्य । १० न वसुमत्वं पक्षे नवपुष्पत्वं ।

वब्जस्तथाऽब्ज च पुमांस्तु तत्र ॥
त्वया जितोऽस्ताचलदुर्गमाप-
स्यक्तं पुनः क्लीबमुपैति मोदं ॥ २५ ॥

इति प्राबोधिकहृद्यतमपद्यपरिपाटीभिर्मंगलवाद्यरवघाटीभिश्च प्रबुद्धा सा देवी कृतप्रत्यूषकृत्या कलितमंगलनेपथ्या सभामंडपाविभासितसिंहासनाग्रमधिवसंतं नाभिमेदिनिकांतं निजनयनचकोरकुमुदिनीकान्तमासाद्य यथादृष्टं स्वप्नजातं निवेदयामास ॥

पृथ्वीशोऽप्यवधिज्ञानप्रबुद्धः स्वप्नसत्फलं ॥
व्याजहार रदोद्योतव्याजहारमयं दधत् ॥ २६ ॥

अयि देवि मत्तेभगमने ! मत्तेभदर्शनेन महान्पुत्रस्ते भविता, वृषासक्तचित्ते ! वृषनिरीक्षणेन सकललोकाधिपतिः, सिंहमध्ये ! सिंह विलोकनेन अनंतवीर्यो, मालारुचिरकचनिचये ! मालावलोकनेन धर्म तीर्थकर्ता, लक्ष्मीतुलितसौंदर्यसंपन्ने ! लक्ष्मीवीक्षणेन लोकोत्तरविभवः पूर्णचंद्राननने ! पूर्णचंद्रदर्शनेन सकलजनानंदसंदायकः, प्रभाकरनिभमणिगणमंडिते ! प्रभाकरनिरीक्षणेन निःसीमतेजःप्रसरः, कुंभस्तनि ! कुंभयुगलेन निधिभाक्, मीनायतलोचने ! मीनद्वयेन अनंतसुखः. सरोवरसदृशनाभिमंडले ! सरोवरेण सल्लक्षणोपेतः, पारावारगंभीरे ! पारावारेण समस्तदर्शी, पीठायितनितंबे ! सिंहपीठदर्शनेन साम्राज्यमहितः, सुरविमानसमानमंदिरे ! सुरविमानेन स्वर्गादवतरिष्यति, फणिनिभवेणि ! फणिपतिभवनेन अवधिज्ञानलोचनः, सद्रत्नशोभिते, रत्नसंचयेन गुणाकरः शुचिस्मिते! शुचिदर्शनेन कर्मेंधनदहनः, वृषभाकारमादाय तवास्यप्रवेशेन वृषभो देवस्त्वद्गर्भे सन्निधास्यतीति ।

तावत्सुराधिपतिशासनतः समेत्य

---

१ अब्जश्चंद्रः अब्जं कमलं । २ धर्मासक्तचित्ते ।

दिक्कन्यकाश्च कुतुकेन सिषेविरे तां ॥
श्रीर्ह्री धृतिः सपदि कीर्तिसुबुद्धिलक्ष्म्यो
देव्यो जिनस्य जननीमनवद्यरूपां ॥ २७ ॥
तांस्तस्याः परिचर्यायां गर्भशोधनमादितः ॥
प्रचक्रुः शुचिभिर्द्रव्यैः स्वर्गलोकादुपाहृतैः ॥२८॥

तत्र काचिन्मुखविजितसेवार्थसमागतविधुबिंबशंकाकरेण धवलातपत्रेण, अन्या च तद्वदनकमलमाभिषतन्मरालशंकावहेन चामरेण, अपरा च निजतनुलताविलसितभुजशाखासंसक्तशुकनिकरसंदेहदायकेन तांबूलीदलवृंदेन, इतरा च तदंगरक्षणतत्परा देहकान्तिसरोवरदीर्घमीनायमानेन करकलितकरवालेन यथोचितं मरुदेव्याःसेवां चक्रिरे॥

सा भारतीव व्यंग्यार्थं सिंधुवेलेव सन्मणिं॥
बभार सुदती गर्भं गुहेव हरिपोतकं ॥ २९ ॥
नोदरे विकृतिः कापि न स्तनौ नीलचूचुकौ
न पांडुवदनं तस्या गर्भोप्यवृधदद्भुतम् ॥ ३० ॥

कदाचिन्मरुदेवी देवीजनैः सह विकचवारिजविगलन्मधुरममांसलपयःपरिवाहां तरंगिणीमासाद्य, बाले ! अतनुविहारकांतासि । मुग्धे किमद्यापि चापक्रीडापरायणासि । भामिनि ! किमिति शरविहारमाकलयासि । सुदति ! किंवा बहुतर- वारिक्रीडां विदधासि मुग्धे ! सर्वतोमुखभगं करोषि ! अबले ! जडसंगमं परिहर । सुकेशि ! कीलालार्द्रं वसनं संत्यज ॥

१ धनुषः क्रीडा पक्षे च आपक्रीडा अप्संबंधिनी क्रीडा=जलक्रीडेत्यर्थः । २ बाणविहारो जलविहारश्च 'शरस्तेजनके कांडे शरं नीरे नपुंसकमिति विश्वलोचनः॥३बहुखड्गक्रीडा पक्षे बहुतरजलक्रीडा॥४ सर्वतो-मुखं, सर्वतो-मुखं जलं च। ५ डलयोरभेदात् जलसंगमं इति भवति। कीलालं जलं रुधिरं च । ६ कीलालं रुधिरेऽपि स्यात्पानीयेऽपि नपुंसकम्॥

बुद्धे कुतो विषं पिबसि अपाये । त्यज कबंधानुरागं। सुमुखि स्वर्णस्थितिमाप्तासी । सुमध्ये ! प्रचुरोर्मिकाव्रजं भजसि । इत्यादिविविधव्याहारपेशलां व्यात्युक्षिकां निर्वर्त्य, भवनप्रासादमारुह्य, यावत्सचमत्कारसल्लापमभिकांक्षति तावत्काचिदिदं पद्यमाह

नदवनजमुदारं नाभिराजस्य कांतेः—
तव मुखसुखजन्मप्राप्तिसक्त्यातपस्थं ॥
अपि यदि तदधस्तान्नीतशीर्षं तपस्येत्
जनवदनमथापि प्रोद्भवेदेणनेत्रे ! ॥ ३१ ॥

अहो साधु साधु भाषितमिति तामभिनंद्यान्या तावदाह—

सुरादिजीवैरमृत निष्ठैर्लाल्या सरःस्थितिः ॥
कुचाद्रितटयोस्तन्वि ! तव भातीति नाद्भुतम् ॥३२॥

अपरा तावदाह—

चंद्रात्मना सुधाब्धौ तव कान्त्यब्धौ मुखात्मना जातः॥
द्विजराज इत्यभिख्यामन्वर्था वहति घनकुचे! राजा॥३३॥

अन्या पुनराह—

अधरारुणबिंबेद्धस्मितेंदुरुचिसुंदर ॥
महादर्शविलासं ते मुखं धत्ते इति स्फुटं ॥ ३४ ॥

न केवलमेतदेव युक्तं अन्यदप्येवं दरीदृश्यत इत्याभिधाय काचिदाहः—

कीर्तीदुमंडलोपेतः प्रतापरविशोभितः ॥

---

१ विषं गरलं जलं च । 'विषं तु गरले जले' इति विश्वलो.। २ अंगुलीयसमूहं लहरीव्रजं च । ३ जलक्रीडां ४ नदजलोत्पन्नं कमलं ॥ ५ ग्रीष्मर्तौ स्थितं तपश्चरणे स्थितं च ॥ ६ सरोवरस्थितिः । पीयूषासक्तैर्देवैर्लाल्या भातीति अद्भुतं । मुक्ताहारस्थितिर्न अद्भुतं ॥ ७ अमावास्या विलासं पक्षे महादर्पणस्थितिं ॥

अमानवचरित्रस्ते पतिरित्यपि युज्यते ॥ ३५ ॥

इतरा पुनराह—

तन्वि ! त्वद्वचनामृते विलसिते द्राक्षावली द्रागियं ।
आदौ रूपयुता तथा किल सिता मध्येऽधिका मानिनि ! ।
लोलाक्ष्यग्रजनांचिता नवसुधा लोलंबकेश्यादितो ।
राजच्छोभनवास्पदं मधुरसः प्रायो दधौ हास्यतां ॥३६॥

एतच्छ्रुत्वा साधुसचमत्कारभाषणधुरीणा साधु द्राक्षावली रुद्राक्षावली सिता सिकता नवसुधा नवसुधाना मधुरसोऽवमधुरमो बभूवेति सम्यगभिहितमित्यभिनंद्य काचिदेवमूचे ॥

बिंबाधरि ! तव कंतुककंचुकनयनं धीरतरधीः नयनयनोऽयनतानवः संरसः तव पतिश्च कल्याणगुणोज्ज्वलतया परस्परं समानाः कदाचिदपि वर्णविपर्यासं न सहते इति ॥

इत्यादिभिः स्फुटचमत्कृतिभिर्वचोभि
र्देवीजनेन सहितं परिचर्यमाणा ॥
स निर्भरप्रथितगर्भभरालसांगी

---

१ अग अमावस्या पक्षे लोकोत्तरचरित्रं । २ रूपयुता मनोहरयुता द्राक्षावली । आदौ रुवर्णनयुक्ता चेत् रुद्राक्षावली इति सारराहितेत्यर्थः । अधिका श्रेष्ठा सिता शर्करामध्येऽधिका मध्यस्थितककारो भवति चेत् सिकतावत्भवति । अग्रजनांचिता श्रेष्ठजनांचिता नवसुधा नूतनामृता अपि पुनरग्रजनां चिता—पुरतः नकारवती नवसुधा न भवति । किंतु नवसुधाना—(पोहे इति महाराष्ट्रभाषायां) धात् अभवत् । राजच्छोभ—नव—आस्पदं मधुरसः अपि राजच्छोभनं वकारास्पदं भवति चेत्न मधुरसः वमनास्पदो भवतीत्यर्थः ३ एते कंतुकादयः शब्दाः क्रमेण पठिताः वर्णविपर्यस्ता न सन्ति ।

पत्या समं प्रमदवारिनिधौ ममज्ज ॥ ३७ ॥
चैत्रे मासवरे धरेश्वरसती पक्षे वलक्षेतरे ॥
सल्लग्ने नवमीदिने दिनमणौ प्राचीदिशं मांचाति ॥
विश्वे ब्रह्मसमाव्हये साति महायोगे विशालेक्षणा ॥
प्राचीवार्कमसूत तत्र तनयं स्फारप्रभामदुरं ॥३८॥
नाभिक्ष्मापतिपूर्वभूधरतटात्प्राप्तोदयं श्रीजिनं ॥
बालार्कं विलसत्त्रिबोधकिरणं प्रोद्यत्तमोनाशनं ॥
लेखस्त्रीनलिनीलताकुतुकतः संवीक्ष्य मोदोल्लसद् ॥
बाष्पव्याजमरंदपूर्णविकसन्नेत्रांबुजा रेजिरे ॥ ३९ ॥

तदा किल त्रिदशाधिकस्नेहोज्ज्वले सुरुचिराज्यविशोभिते विभावर्युदितभयहरणचणे उत्तमश्रीविराजितेऽपि तमःसमूहविध्वंसनधुरीणे जिनाभिधाने त्रिभुवनदीपे परिस्फुरति, लज्जयेव तदीयकांतिकल्लोलिनीलीना सुरांगनाकरारोपितदीपावलिर्दिनकरकरनिकरनिरंतरे दिनांतरे खद्योतपरंपरेवानवलोकनीयप्रकाशा केवलमंगलफला विललास ॥

नदीपबंधुर्गांभीर्यगुणेन त्रिजगद्गुरुः ॥
दीपानयं निराचक्रे तेजसेति न विस्मयः ॥ ४० ॥

तदानीं खलु जिनस्य प्रसिद्धां कोलारिरित्याभिख्यां विबुध्य भयेनेव

१ कृष्णपक्षे । २ देवस्त्री । ३ देवेंद्रादिकानामधिकस्नेहोज्ज्वलो भगवान् पक्षे त्रिदशाभिःवर्तिभिरधिकस्नेहोज्ज्वलो दीपः । ४ मनोहरराज्यशोभितो जिनः पक्षे सद्घृतविशोभितो दीपः । ५ विभौ प्रभौ अर्युदितं शत्रूत्पन्नं च यद्भयः तद्धरणे निपुणः पक्षे रात्र्युत्पन्नभीतिनाशने पटुर्दीपः । ६ अधिकांधकारेण शोभितो दीपः उत्तमा चासौ श्रीश्च तया विराजितो जिनः । ७ अंधकारध्वंसनो दीपः अज्ञानांधकारध्वंसनो जिनः । ८ समुद्रबंधुः न विद्यते दीपानां बंधुरिति ध्वनिः । ९ यमारिः षट्कालारिरिति ध्वनिः

सेवनार्थं समसमयसमवतीर्णैः सर्वर्तुविलासैर्विकसदशोकविकचमल्लिका-कुंदकुड्मलाडंबरकदंबरसनंददरविंदविकासितसिंदुवारप्रबुद्धलोध्रविशोभमानः वनमेदिनीकामिनी संजातोऽयं भुवनाधिपतिर्विभुतया वनाधिपतिरिति मत्वा किल निजानुरागं प्रकटयंतीव, मंदहासमान्वतीव, पुलाकमुकुलानि बिभ्राणेव, आनंदाश्रुबिंदून्मुंचंतीव हर्षवशेन नयने विस्तारयंतीव, मलयजरजोराजिं किरंतीव विरराज ॥

शंबरारिमदभेदनधीरो जात एष इति तोषविशेषात् ॥
शंबराणि सह सज्जनचित्तैः सप्रसादमुपजग्मुरुदारम् ॥ ४१ ॥
प्रौढशोभनखरांशुवैभवो जात एष जिनचंडदीधितिः॥
इत्यवेत्य किल लज्जया तदा मंदितोष्णकिरणोऽभवद्रविः ॥४२॥
स सदागतिस्वभावः पावनरीतिं वहन्महच्छलाघ्यः ॥
जातोऽसाविति दुर्भरहर्षभराद्वायुरावबौ मंदम् ॥ ४३ ॥
पुण्याश्रियं समाधिकां प्राप्तुं सूनाश्रियं महद्वृक्षाः ॥
विजहुः को वा कुतुकादूनं न जहाति समाधिकं प्राप्तुं ॥४४॥
राकाकोकारिकांतिप्रसरमुपगता प्रोल्लसत्पुंडरीक- ।
भ्राजच्छोभां दधाना जिनपवरयशःश्रीशरन्मेघजालं ॥
आरादुज्जृंभितापं शमयति सहसेत्यंबरश्रीस्तदानीं ।

---

१ मदनः ' शंबरारिर्मनसिजः कुसुमेषुरनन्यभूः ' इत्यमरः । २ शंबराणि जलानि । ३ शोभन—खरांशुवैभवः सूर्यः । ४ सदा—अगति स्वभावः मोक्षस्वभावः जिनः । पक्षे सदागतिर्वायुः ' सदागतिर्गंधवाहे निर्वाणेऽपि सदीश्वरे इति विश्वलोचनः । ५ पावनरीतिं परिशुद्धत्वं; अग्निमित्वं । ६ सूनाश्रियं पुष्पश्रियं, पक्षे शोभन ऊनश्रियं इति ध्वनिः । ७ कल्पवृक्षाः । ८ तापं पक्षे उज्जृंभित—आपं ।

मेघाटोपैर्विविक्तं विमलतरलसद्रूपमेषा बभार ॥४५॥

सा किल साकेतपुरी सुरतरुकुसुममेदुरतया विधृताविमलदुकूलेव, नभोंगणनिपतितचिरत्नरत्नरुचिरतया मणिभूषणमंडितेव, मलयजरससंसिक्तांगी तत्र तत्र कल्पितविचित्रमुक्तामयरंगवल्लीविशोभिततया व्यामुक्तमुक्तामालिकेव. प्रतिनिलयं लयविलसितगानविलासमनोरमतया स्वयं गायंतीव, समुल्लसत्पल्लवनवलवमंदानिलवंदनमालासुंदरतया निजानुरागधारां प्रकटयंतीव, व्यालोलसमुल्लसदुदस्तकेतुहस्ततया जिनजन्मोत्सवकुतूहलेन नृत्यंतीव चिरतरं चकासामास ॥

जिनास्त्रिलोकीजनवंद्यपादो जगद्गुरुः सोऽयमजायतात्र ॥
इतीव सत्केतुपटावृतां तां पुरीं न पस्पर्श रविः स्वपादैः[1]॥४६॥
भवनामरभवनेषु प्रादुर्भूच्छंखसंकुलारावः ॥
भो भो भो इति मरुतां जिनजन्ममहं वदन्निवानंदात् ॥४७॥
व्यंतरभेरीरावो लोकं व्यालोलयस्तदाऽजृंभत् ॥
जिनजन्मोत्सवहर्षान्मुक्तिश्रीविकसदट्टहास इव ॥४८॥

कंठीरवकंठरवो ज्योतिष्काणां गृहांगणे जातः ॥
आशासु कुंजरान्द्राग्विनिर्मदांस्तानविंदुकांश्चक्रे ॥४९॥
कल्पामरवरघंटाघोषोऽभून्मोक्षसच्छ्रियो हर्षात् ॥
नृत्यंत्याश्चरणरणन्मणिनूपुरशब्दसंशयनिदानं ॥५०॥

तदानीं उदारजिनरजनीकरशुभोदयलीलावेलोत्कूलितप्रमदपारावारचंचद्वीचिनिसंचयेनेव, विश्वातिशायिमाहिम्नि जगद्गुरौ जाते को वान्यस्य राज्यमहिमेति प्रभावशक्त्या घातेनेव, तत्कालजृंभितविविधदुंदुभिप्रभृतिवाद्यरवपूरितलहरीभरेणेव, आद्योदितस्य जिनराजस्य सकल-

---

[1] स्वकिरणैः। पादोऽस्त्री चरणे मूले तुरीयांशेऽपि दीधितौ इति विश्वलोचनः ॥

सिंहासनपराभवप्रवीणं सिंहासनमुदेष्यतीति भयेनेव निर्लिंपपतीनां अकंपनानि सिंहासनानि चकंपिरे ॥

सुराधिपतिरादराच्चलनकारणं निश्चितुं
दृशां दशशतैरपि प्रगुणमक्षमस्तत्क्षणं ॥
उदीतविमलावधिप्रथितलोचनेन स्वयं
जिनाधिपविभूदयं हृदि विवेद तत्कारणं ॥ ५१ ॥

ततः पुरंदरः पीठात्प्रजवमुत्थाय, तद्दिशि सप्तपदानि गत्वा, नत्वा च, तमभिषेक्तुमना मनानितरमोदेन घनगर्जनतर्जनपटीयसीं प्रस्थानभेरीं प्रदापयामास ॥

चिराच्छयालुं सद्धर्मं क्षणादुन्निद्रयन्निव ॥
त्रिलोकीं पूरयामास तारो दुंदुभिनिस्वनः ॥ ५२ ॥
ततः शक्राज्ञया देवपृतना निर्ययुर्दिवः
तारतम्येन सद्ध्वाना महाब्धेरिव वीचयः ॥५३॥
चतुर्णिकायत्रिदशास्तदानीं जिनेंद्रजन्मोत्सवकौतुकेन ॥
विनिर्ययुर्भूषणभूषितांगा दिशामधीशाश्च दश प्रचेलुः५४

तदनु सुपर्वराजोऽपि सुरहिततया, कुवलयानंदसंदायकतया सत्पथप्रवृत्ततया, सकलकलोज्ज्वलतया च पर्वराज इति कविभिरुत्प्रेक्ष्यमाणः सौधर्मकल्पशतक्रतुः, अगाभिस्त्यांचितमपि नागाभिस्त्यांचितं, नागमपि मदाल्हादिनमपि न मदोल्हादिनमैरावणमारुह्य, शच्या सह कृतप्रस्थानः, सामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालाभियोग्यकिल्बिषसंदोहपरिवृतः, सुरभिलसुरतरुकुसुमपूरितपात्रपवित्रकरकिंकरनि-

---

१न मदाल्हादिनमिति विरोधः। नमतां आल्हादिनमिति तत्परिहृतिः॥

करानुगम्यमानतया तदीयविरहं सोढुमशक्नुवद्भिः क्रीडावनैरिवानुगम्यमानः, परस्परघट्टनरणन्मणिभूषणवाचालितकुचकुंभैः कलितकांस्यतालध्वनिभिरिव दृश्यमानैः गगनपयोधिपयोजशंकावहवदनाविराजितैर्नृत्यद्भिः सुरांगनाजनैः परिनिष्क्रियमाणपुरोभागः, नभस्थजलधितरंगमकरशंकाकरैस्तुरंगस्तंबेरमैर्निबिडितसावधिप्रदेशः क्रमेणांबरतलादवततार ॥

संमर्दाद्गलिता नटद्दिविषदां वक्षःस्थलप्रोल्लस-
न्माला मौक्तिकराजयः क्षितितले पेतुः सशोभांचिताः ॥
व्योमाभोगचलत्करेणुचरणप्रक्षेपचूर्णीभव-
न्नक्षत्रप्रचया इव प्रतिदिनं निःसीमकान्त्युल्बणाः ॥
पुरंदरपुरांतरान्नभसि संपतंती तदा
जिनेश्वरगृहावधित्रिदशपद्धतिर्भेदुरा ॥
सम्मुज्जिगमिषोर्दिवं तदुरुकीर्तिलक्ष्म्याः पद-
क्रमाय परिकल्पिता मणिमयीव निःश्रेणिका ॥ ५५ ॥
स्फटिकरुचिरसालं केतुमालाविलास-
स्थगितगगनभागं तत्पुरं संपरीत्य ॥
सुरवरपृतनास्तास्तस्थुरापूर्णबिंबं
शशिन इव परीतास्तारका व्योमसीम्नि ॥५६॥

ततश्चतुर्णिकायत्रिदशाध्यक्षसमेतस्सहस्राक्षः साकेतपुरलक्ष्मीवदनायमानं, गगनतरुमंजरीभिरिव तर्जयंतीभिः सुरपुराश्रियं पताकाभिरुपशोभमानं, चंद्रबिंबमिव सकलकलं, वृंदारकवृंदमिव सदामंगलमादधानं मंजुलास्यविराजितं च, विजिगीषुराजबलमिव पुरतोरणश्रीवि-

---

१ सदा मंगलपुरं । सदामं मालासहितं गलं कंठं । २ मंजु लास्यं नर्तनं तेन विराजितं पुरं । मंजुलं आस्यं तेन विराजितं देवसमूहं । ३ पुरतोरणशोभितं पुरं । पक्षे पुरतः रणश्रीः युद्धरंगश्रीशोभांचितं विजिगीषुराजबलमिव ।

राजमानं सर्वतोमरशोभितं च, वनोज्ज्वलमपि नवनोज्ज्वलं, शिवांचितमपि विभवांचितं, सशालमपि विशालं नाभिराजसदनमासाद्य, शचीदेवमितः प्रेषयामास ॥

अरिष्टगेहं तदनु प्रविष्टा सुरेन्द्रपत्नी सहसा ददर्श ॥
पुत्रेण जुष्टां जिनमातरं तां संध्यां नवार्केण युतामिव द्यां॥५७॥

तदनु भक्तिरसपरीवाहेन प्लाविता पुरंदरवनिता समुन्नतवंशपोतमवलंबितुकामा समीपमासाद्य रूपसंपदा मारं कुमारमभिजातमपिनाभिजातं, रोचितवृत्तिमपि नरोचितवृत्तिं,सलक्षणमपि विलक्षणं, विलसंतमप्यविलसंतं तनयं तं मायानिद्रामोहिताया मरुदेव्या अंके प्राचीव पूर्वपयोधिवीचेः प्रतिबिंबं समर्प्य भानुमन्तं क्षणात्स्वीचकार ॥

स्पर्शं स्पर्शं कौतुकात्कोमलांगं
दर्शं दर्शं तस्य दृग्भ्यां मुखाब्जं ॥
उन्नद्वंशं पोतमेषाश्रितापि
पौलोमी द्राक्संमदाब्धौ ममज्ज ॥ ५८ ॥

तदनु द्यौरिव बालभानुमुद्यन्तमर्हंतमादाय व्रजंती मंगलधारिणी-

---

१ सर्वतः अमरशोभितं पुरं । पक्षे सर्वतोमरायुधैः शोभितं राजबलं। २ नवनेन स्तुत्या उज्ज्वलं । ३ विगत–ईश्वरांचितामिति विरोधः। पक्षे विभवेन ऐश्वर्येण अंचितं युक्तं । ४ शालाभिः वेश्माभिः सहितमपि विशालं इति विरोधस्तत्परिहारः विशालं विस्तारसंयुक्तामिति । ५ नावं पक्षे उन्नत गोत्रोत्पन्नं जिनबालकं जिनं । ६ न अभिजातं सत्कुल प्रसूतं न इति विरोधः । पक्षे नाभिराजेन जातं । ७ रोचितवृत्तिर्न इति विरोधस्य परिहारः नराणां मनुष्याणां उचित वृत्तिः । ८ विगतलक्षणमिति विरोधः पक्षे विशेषलक्षणयुक्तं ॥ ९ विलसंतमपि शोभमानामिति अविलसंतमशोभमानामिति विरोधः। तत्परिहारः आविलसंतं भविष्यदर्हत्पदेन शोभमानं ॥

भिर्दिक्कुमारीभिस्तरंगितपुरोभागा सेयमिंद्राणी पाकशासनस्य करे पूर्वगिरेः सानौ द्युमणिं प्राचीव समर्पयामास ॥

गीर्वाणेंद्रस्त्रिजगतां गुरुमादाय सादरं ॥
संददर्श स तद्रूपं संप्रीतिस्फुरितेक्षणः ॥ ५९ ॥

त्वं लोकाधिपतेस्त्वमेव हि गतिर्भक्तिस्पृशां मादृशां
राजत्केवलबोधनामरमणेः पूर्वाचलं त्वां विदुः
श्रीमन्नाधिपदे तनोति विनते द्राक् संपदं त्वद्रुचिः
सिध्यत्यत्र जने सुदृष्टिमहिते भव्ये समाधिस्ततः ॥६०॥

स्तुत्वेति जंभद्विषता जिनोऽयं न्यधायि मूर्ध्नि त्रिदशद्विपस्य॥
जयेश नंदेति वदद्भिरुच्चैः करांगुलिस्तत्र समस्तलेखैः ॥६१॥

तितीर्षुर्भववाराशिं जिनपोतं समाश्रितः ॥
करं मेरुप्रयाणाय चालयामास वासवः ॥६२॥

तदनु कौतुकवशेन नभोंऽगणमुत्पतितैर्भूषणगणप्रभाभिः सुरचापानि तन्वद्भिर्जयघोषणमुखरमुखैर्बर्हिर्मुखैः कवचितपुरोभागः, गंधर्वसमारब्धसंगीतानुसारिभिः कलितकुतुकधोरणीभिरुत्क्षिप्तभ्रूपताकामिश्चलत्कुचकुंभाभिरप्सरोभिर्विरचितनाट्यविलासः, संघट्टक्षुण्णजलधरैर्विमानवरैर्निरंतरगगनांतश्चलदैरावणद्वात्रिंशदाननविलसदष्टदंतसमुदंचितसरोवरसमुज्ज्वलद्वात्रिंशद्दलाविलसितकमलदलेषु नटंतीनां सुरलासिकानां लास्यान्यवलोकनेनांगीकुर्वाणः सुरनिकरकरांबुरुहमुकुलीकरणचतुरं मंदस्मितफेनिलप्रमदपारावारपरिवर्धनतत्परं स्वांकालंकारं

१ मनःपीडायाः स्थानभूते। २ इंद्रेण। ३ ऐरावणस्य। ४ देवैः 'बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः इत्यमरः'।

जिनचंद्रिं वक्षसा भुजाभ्यां चावलंबमानो जन्माभिषेकलालसमानसः सौधर्मपतिर्नभोमार्गेण ससैन्यः प्रतस्थे ॥

तूर्यारावप्रसरमुखरे व्योमभागे तदानीं ।
गद्यैः पद्यैर्ललितमधुरं नाकनाथैः प्रक्लृप्तैः ॥
जैनं स्तोत्रं श्रवणविषयं नाभवत्किंतु लेखैः ।
आसीज्ज्ञातं विचलदधरस्फारलीलायितेन ॥ ६३ ॥

ईशानवासवधृतं धवलातपत्रं
प्रोद्भूतहेमकलशं प्रगुणं व्यतानीत् ॥
जन्माभिषेककुतुकेन समागतस्य
चंद्रस्य हस्तधृतसत्कलशस्य शंकां ॥६४॥

तदा खलु सानत्कुमारमाहेंद्रनाथकरकनीरेजकलितचारुचामरपंक्तिः जिनाभिषेकादरमेदुरतया समनुसृतपयःपारावारवीचिपरंपरेव, समुत्सुकमुक्तिलक्ष्मीप्रहितकटाक्षधारेव, भगवत्सेवार्थमनुप्रवहंती सुरस्रवंतीव च विरराज ॥

तत्र किल विचित्रविविधवाहनान्याधिरूढेषु भवनव्यंतरज्योतिष्ककल्पनाथेषु ससैन्येषु जिनमभितः प्रचलितेषु,केचित्किरीटघटितपद्मरागप्रभाबालातपरुचिरवदनसरोजतया प्रचुरानुरागमंतरमेयत्वेन बहिरपि प्रसृतमुद्वहन्त इव, अपरे च विचलदेकावलीतरलमणिघृणिश्रेणिदंतुरितभुजांतरतयांतःप्ररूढजिनभक्तिनिःसारितहृदयस्थितमोहतिमिरनिकरमेदुरा इव, केचन तपनबिंबे रक्तोत्पलधिया धावमानं मत्तद्विपं निजवाहनं निवर्तयन्तः, परे पुनः सैनिकसंमर्दितपांडुरजलधरखंडेषु दध्योदनभ्रांत्या संभ्रांतान्बिडालांस्ताडयन्तोऽन्ये च पुनस्तरलमुक्ताहारविसृतकांतिधारासु मृणालिनीशंकया संकुलान्हंसान्सान्त्वयंत,

१ एकावल्येकयष्टिकेत्यमरः । २ तरलो हारमध्यगः इत्यमरः ।

इतरे तावत्तारापथसंचरत्सुरसिंधुरकरगलितफूत्कारकणगणांस्तारानिकरान्मन्यमाना, एके च सम्मर्दसंतृटितभूषणमणिगणाज्ञानतः संचेलुः॥

पुरः प्रवृत्ता सेनायाः प्रतीहारपरंपरा ॥
सुराद्रिं प्रापयामास सुरानीकं शनैः शनैः ॥६५॥

तदानीं सौधर्मेंद्र ईशानेंद्रादीन्प्रत्येवमुवाच—

हेमभूमिधरोऽप्येष महारजतशोभितः।
महतीं रीतिमादत्ते बहुलोहस्य गोचरः ॥६६॥

किं च—

अगाभिख्यांचितोऽप्येष नागाभिख्यांचितो गिरिः॥
तथापि नमदानंदी मदानंदी च सोऽपि सन् ॥ ६७ ॥

असौ किल वृंदारकसंदोहसेवितपादः, सकलदिगंबरोच्छ्रितमहिमा, सुवृत्तरत्नमंडितः, कल्याणांचितो, जातरूपधरो गिरीशोऽयं मंदरागः, संततानिष्पतत्कल्पतरुपुष्पवृष्टिर्दिव्यध्वनिशोभितः, प्रथिताशोकसंपदं दधानस्तथा चामरव्रजाविराजितः, स्फारदंडोज्ज्वलपुंडरीकमंडितः,

---

१-२सुवर्णभूमिधरोऽपि महा-अधिक-रजतेन रौप्येण शोभितः इति विरुद्धं। परिहारःमहाराजतं सुवर्णं। ३-४ बहुलोहस्य अयसः गोचरोऽपि महतीं रीतिं आरकूटं [पितळ इति महाराष्ट्रभाषायां] स्वीकरोतीति विरोधस्त त्परिहारः। रीतिं परिपाटीं सज्जनपद्धतिमित्यर्थः। पक्षे बहुल-ऊहस्य गोचरो विषयः। ५-६ अगाभिख्यांचितोपि न अगाभिख्यांचित इति विरोधे परिहारः नागाभिख्यांचितः गजशोभायुक्तः। ७-८ न मदानंद्यपि मदानंदी. ति विरोधे नमतां जनानां आनंदी मदानंदी चेति परिहारः। ९ सेवितचरणः प्रत्यंतपर्वतश्च। १० दिश एव अंबरं वस्त्रं येषां ते तेषु उच्छ्रितमाहात्म्यः पक्षे सकलदिगाकाशेषु व्याप्तमाहात्म्यः। ११ मंगलगुणैः युक्तः पक्षे सुवर्णयुक्तः। १२ गिरां ईशः। १३मंदप्रीतिः मंदरपर्वतश्च। १४ दिव्यध्वनिना शोभितः, दिवि अध्वनि शोभितः। १५ च अमरव्रजेन शोभितः, चामरसमूहेन शोभितश्च।

विचित्रसिंहासनोज्ज्वलः प्रभामंडलपरितः सुरानकरवतुलितघनाराव इति युक्तं किं भूयो मणिगणांकितः, पिहितदिगंबरदर्शनः, सितांशुकं दधानः सर्वोत्तराशामाश्रितः, कांतारसामोदो, लतांगीकृतरुचिः, सदारामांचितैः, सुरागख्यातः इति विरुद्धं उपलक्ष्यते ।

अपि च—

पुष्यत्सुमनोवितततमंदारागस्य मंदरागस्य ॥
विलसत्प्रवालपंक्तेः केवलमाकारतो भेदः ॥ ६८ ॥

एष किल मेरुरूपशोभितस्तरूपशोभितो जातरूपशोभितश्च । गोपमहितोऽगोपमहितो नागोपमहितो नानागोपमहितश्च॥ अपि च । अत्र च सुरांगनागानमुपवनं च मरुत्पूरितमंजुगुंजद्वंशं सदालयांचितं वि-

१ पिहितं निराकृतं दिगंबरजैनमतं येन इति विरोधे पिहितं आच्छादितं दिशां आकाशस्य चावलोकनं येन। २ श्वेतवस्त्रं दधानः, सिताः अंशवः यस्य सः सितांशुः चंद्रः । ३ सर्वेभ्योऽपि उत्तरा बलिष्ठा आशा यस्येति विरोधे सर्वेषां उत्तरां दिशं आश्रित इति परिहारः । ४ कांतायाः रसे प्रीतौ आमोदो हर्षो यस्येति विरोधे कांतारेण उद्यानेन सामोदः सुगंधः इति । ५ लतांग्यां ललनायां कृता रुचिर्येन । लतानां अंगीकृता रुचिर्यस्य । ६ सदारामांचितः स्त्रीयुक्तः आरामांचितः । ७ सुरागैः कल्पवृक्षैः ख्यातः सुरागेण प्रेम्णा च ख्यातः ।८ देवैः । ९ मंदार अगस्य। १० मेरोश्च ।११ देवसमूहेन पूरितमनोज्ञध्वनियुक्तान्वयं सुरांगनागानं। वायुना पूरितमनोज्ञध्वनियुक्तमुपवनं । सत् आलय—अंचितं,सदालय अंचितं गानं। विविधतालवृक्षसंगतं उपवनं । विविध--ताल-संगतं गानं । सुरागैः कल्पवृक्षैः महितं । शोभनरागेण महितं । शृंगारादिरसेन अलसं सदृशीकृतकोकिलालापं । आम्रवृक्षैः संभावितकोकिलालापं वनं ।

विधतालसंगतं सुरागमहितं रमालसंभावितकलकंठालापं च ॥

अत्रत्योपवनेषु सारसंगतान्यपि विसारसंगतानि, मरालीम-हितान्यपि अमरालीमहितानि, कूर्मितामुपगतान्यपि सूर्मितामुपगतानि । बहुलापांन्यप्यपापानि सरांसि विलसंति ॥

इत्यादिकोमलवचोविसरैः सुमेरुं
व्यावर्ण्य निर्जरपतिः सुरशैलमूर्ध्नि ॥
आसाद्य पांडुकवनं पृतनानिवेशं
तत्राततान परितः परितोषनिघ्नः ॥ ६९ ॥
वाहिनीं विनिवेश्यात्र वासवः आप निर्मलां ॥
तस्य प्रागुत्तराशायां पांडुकाख्यां महाशिलां ॥ ७० ॥

या किल महीमानिनीमस्तकायमानमहामेरूपरि लसितकबरी-भरशंकाकरपांडुकवनस्य सितकेतुद्युतिमुन्निद्रयंती, सततमवलंबरहितां-बरतलसंचारसंजातश्रांतिविश्रांत्यै सुरभिसमीरकिशोरमनोरमपांडुकवन-मुपगतेवाष्टमींदुकला पांडुकवनलक्ष्मीमौक्तिकशुक्तिरिवात्यंतनवदातपर्यं-तभागयोर्जिनाभिषेकाय सौधर्मैशानेन्द्रयोर्विष्टरं मध्ये च भगवतः सिंहासनं बिभ्राणा मंगलद्रव्यपरिशोभिता [illegible] परितः परिस्फुरद्रत्नकिरणपरीततया सुरचापमध्यगतशशांककलाभामनुकुर्वन्ती विद्योतते ॥

तत्र किल देवराजो विविधमणिखचितविचित्रस्तंभसभृतं

---

१ कमलसंगतानि । २ जलसंगतानि च ३ हंसीसहितान्यपि । ४ देवपंक्तिमहितानि । ५ कच्छपसमूहमुपगतानि । ६ शुभलहरीमुपगतानि। ७ बहुलजलानि । ८ पापरहितानि निर्मलानीत्यर्थः । ९ आनंदायत्तः ।

वस्त्रांगमहीजसमुद्भूतवसननिर्मितवितानविराजितं तारातरलमुक्तामाला-विभूषितमवलंबितसुरभिकुसुमदामावकीर्णं चतुर्णिकायामरेंद्रवृंदसंकीर्णम-भिषेकमंडपं विधाय तत्र सिंहविष्टरे जिनार्भकं पूर्वाभिमुखं निवेशयामास ॥

तदा दुंदुभिनिध्वानो निरुद्धाशेषदिक्तटः ॥
समुज्जजृंभे संभूतघनगर्जनतर्जनः ॥ ७१ ॥

* इत्यर्हद्दासकृतौ पुरुदेवचंपूप्रबंधे चतुर्थस्तबकः ॥ *

पंचमस्तबकः ।

तदनु जिनेंद्रजन्माभिषेकसंभृतादरजंभालंभैननिदेशपरवशः किंनरेशः कौतुकवशेन सर्वतः समापततो दिशामधीशान्सपरिवारान् करचलितमाणिदंडेन तन्मंडपे हठाद्यथोचितं विनिवेश्य, भो भो मारुता निरंतरमवकरनिकरमपसारयत । अये मेघकुमाराः सुगंधिशीतलगंधोदकवृष्टिं कुरुत । हे दिक्कुमार्यो मुक्तामयरंगवल्लीभिर्नानाविधपत्रलताचित्राणि विरचयत।अयं किलेशाननाथः स्वयमेव धवलातपत्रं धत्ते । तदीयमृगलोचनाः पुनर्मंगलद्रव्याणि तरंगयंतु । सनत्कुमारा जिनार्भकपरिसरे बालव्यजनानि वीजयंतु। देव्यश्च बलिफलकुसुममालागंधधूपाद्यैः पात्राणि पूरयन्तु । नर्तकाः पुनः पटुपटहमृदंगादीनि सज्जयन्तु। वाणी च वीणां गायतु। सुरलासिकाश्च लास्यलीलामुल्लासयन्तु इत्यादिक्रमेण त्रिदशपतीन्भगवज्जन्माभिषेकसमुचितकृत्येषु नियोजयामास ॥

१इंद्रः २अवकरनिकुरुंबे मारुतेनापनीते।कुरुत घनकुमाराःसाधुगंधोदवृष्टिं ॥ तदनु च मणिमुक्ताभंगरंगावलीभिर्विरचयत चतुष्कं सत्वरं दिक्कुमार्यः ॥ ५ ॥ अयमयमिह धत्ते छत्रमीशाननाथस्तदनुगतमृगाक्ष्यो मंगलान्युत्क्षिपन्तु ॥ जिनसविधममर्त्या नर्तिताबालबालव्यजनविधिसनाथाः संतु सानत्कुमाराः ॥ ६ ॥ बलिफलकुसुमस्रग्गंधधूपाक्षताद्यैः प्रगुणयत विचित्राण्यत्रपात्राणि देव्यः॥ सलिलमिह पयोधेरेष्यति व्यंतराद्याः पटुपटहमृदंगादीनि तत्सज्जयंतु ॥ इति श्लोकाः उपर्युक्तगद्यसमाना धर्मशर्माभ्युदयकाव्येऽष्टमसर्गे उपलभ्यन्ते ॥

व्याकीर्णप्रचुरप्रसूननिकरे कर्पूरधूलीमिलद्
गंधक्षोदमनोहरे सुरभिले तन्मंडपे संगताः॥
भृंगाः कर्तुमुपेयुषां भगवतो जन्माभिषेकोत्सवं
त्रुट्यच्छृंखलकालितुलनां व्यातेनिरे व्याततः ॥१॥
ततो जिनार्भकस्यास्य वामदक्षिणभागयोः॥
सौधर्मैशाननाथौ तावासने स्वेऽधिरोहताम् ॥ २ ॥

तदनु स्वयंभुवः पयःपूरधवलशोणितपवित्रं गात्रं क्षीराब्धि-रेव स्प्रष्टुमर्हति नान्यः स किल निम्नगानामधीशोऽतिवृद्धोऽयमधिक-तरजरसाक्रांतमूर्तिर्द्विपदरहितश्चिरममृतांधोजनक्षुभितः कथमत्युन्नतमिमं शैलमधिरोहत्विति पर्यालोच्य तदधिरोपणाय परिकल्पितनीलोत्पलसो-पानपंक्तयः, सौवर्णकपिशकलशमालां करे निदधाना नाकिजना गगनां-गणे निरंतरनिचितसांध्यबलाहकविलासं तन्वानाः, सौधर्मैशाननाथसिं-हासनप्रदेशादारभ्य पयः पारावारतीरपर्यन्तं पांक्तिशो द्विधा समवस्थिताः, प्रवालपरिशोभितं घनपुष्पोज्ज्वलमिदमपि पांडुकवनं इति मत्वा वना-द्वनांतरं प्रतिनिवृत्ताः पात्रांगसुरद्रुमा इव व्यराजंत ॥

मुक्तादामपरंपरावृतमुखान्गांगेयकुंभान्करे ।
कुर्वाणास्त्रिदिवौकसो जलनिधिः संवीक्ष्य तीरागतान् ॥
भूयस्ते भुजगेंद्रवेष्टनलसन्मंदराचलान्बिभ्रतः

---

१ बहलमलयजन्मोन्मिश्रकर्पूरपांसुप्रसरपरिमलांधाः श्रेणयः षट्पदानां ॥ जिनपतिमभिषेक्तुं वांच्छतां त्रुट्यदनोनिगलवलयतुल्या निर्लुठन्ति स्म तस्मिन्॥ धर्मशर्माभ्युदयेऽष्टमसर्गे दशमः श्लोकः उपर्युक्तं श्लोकमनुरति । २ किसलयेन, विद्रुमेन ३ जलोज्ज्वलेन, निबिडपुष्पोज्ज्वलेन च॥ ४ मंदरपर्वतान् ।

प्रामा इत्यधिकाद्भयादिव चलेद्भंगेश्वकंपे तदा ॥२॥

यः किल वाहिनीपतिरिव वाहिनीपतिश्चलितविमलतरवारिशोभितश्चापांचितो घनकीलालकलितमूर्तिरुद्दंडकांडमंडितः पुरो नर्तितैकबंधः पृथुलहरिजालकोलाहलमुखरितदिक्तटश्च, किं त्वयं बहुभंगेषु सत्स्वपि प्रगर्जत्येव स तु भंगे सति पराजयते इति विशेषः ॥

यः खलु भुवनपतिरिव भुवनपतिरिति शोभनैक्रमकरः, सर्वतोमुखसंपदाढ्यः स्वर्णस्थितिसंपन्नः, परिस्फुरद्रत्नमंडितश्चंचदूर्मिकोज्ज्वलः समुद्रश्च किं तु नदेशविख्यातः देशाविख्यातो न वसुधाविभवहेतुर्वसुधाविभवहेतुर्नक्षत्रपबंधुः क्षत्रपबंधुर्गरोल्लासनिदानं नगरोल्लासनिदानं

---

१ चलल्लहरीभिः । २ सेनापतिरिव । वाहिनीनां नदीनां पतिः समुद्रः । ३ विमलतर–वारि, सेनापतिपक्षे विमलं-तरवारि । ४ च अपां चितः जलपूर्ण इत्यर्थः पक्षे चापांचितः धनुषा युक्तः । ५ कीलालं रुधिरं जलं च । ६ दीर्घबाणालंकृतः पक्षे विपुलजलमंडितः । ' कांडोऽस्त्री वर्गबाणार्थनलावसरवारिषु ' इति विश्वलोचनः । ७ नर्तिताऽपमूर्धकलेबरः नर्तितजलश्च । ८ पृथुल-हरिजालं पृथुललहरीजालो । ९ जगत्पतिरिव, पक्षे भुवनं जलं तस्य पतिः सागर इत्यर्थः । ११ शोभन-क्रमकरः, शोभ:नक्रमकरः । ११ सर्वतो मुखा चासौ संपत्तयाढ्यः.पक्षे सर्वतो मुखं जलं तदेव संपत्तयाढ्यः । १२ स्वर्ण–स्थितिसंपन्नः पक्षे सु अर्णस् स्थिति संपन्नः शोभनजलभृत इत्यर्थः । १३ ऊर्मिका अंगुलीयकं, लहर्यश्च । १४ नदानां ईशस्तेन विख्यातः । १५ न वसुधाविभवहेतुः नवसुधाविभवहेतुर्नवपीयूषोत्पत्तिनिदानं । १६ महीवैभवकारणं च । १७ नक्षत्राणि पाति इति नक्षत्रपश्चंद्रस्तस्य बंधुः सागरः । १८ क्षत्रं पाति इति क्षत्रपाः राजानस्तेषां बंधुः । १९ गरं विषं ।

रसैसहितो नरसहित इति विशेष: ॥

य: पुनर्धार्मिक इव सज्जनक्रैमकर:, सिंधुरबंधनप्रदेश इव वौरिगतानेकनाग:, सत्पुरुष इव गोत्रातिशार्यै:, पृथ्वीपातीनिलय इव प्रदृश्यमानमहापात्रै:, गणिकासमूह इव घनतरुणांचितैसाविधप्रदेश:, श्रीजिनराज इव विकासितकुँमुदपराग:: प्रकटितगांभीर्यमहिमा च विषराशिर्प्यमृतराशिरतिवृैद्धोऽपि कांतौरागांचित: गजते ॥

कनककलशजालं क्षीरवार्धौ निमज्जत् ।
विशदरुचिरमुक्तातारकाभि: परीतं ॥
सकलकलमुदंचच्चंद्रसाम्यं प्रपेदे ।
धवलमधुरदुग्धाधौतसज्ज्योत्स्नयेद्धं ॥४॥
अथ सुरकरैर्नीतान्क्षीराब्धिसज्जलपूरितान् ।
कनककलशानेतावद्रौ तदा विकृतैर्गुणै: ॥
दशशतमितैर्मोदात्स्वीकृत्य मूर्ध्नि जगद्गुरो- ।
र्जयजयजयारावै: सार्धं न्यपातयतां तदा ॥५॥
ततो जय जयारावमुखरीकृतदिक्तटा: ।
कल्पेश्वरास्तदा हर्षात्समं धारा न्यपातयन् ॥६॥

सा किल पयोधार कुंभस्थलायमानमिलितकनककुंभद्वयविगलिततया-

---

१ रसो जलं । २ सज्ज—नक्र-मकर:, सज्जन—क्रमकर: । ३ वारी तु गजबंधनीत्यमर: । पक्षे जलगतानेकजलेभ: । ४ गोत्रमन्वय: पर्वतश्च । ५ देवसमूहेन नीयमानपात्र: । ६ घनतर-तरुण अंचित घनतर-तरुण अंचित । ७ कुत्सितमते अपराग:, जिन: । कुमुदपराग: समुद्र:। ८ विरोधपरिहार: एवं विषं जलं । ९ सुधा । अतिशयेन जरन्नपि कांतारागांचित इति विरोधे परिहार कांतार—अग—अंचित: ।

खंडलशुंडालशुंडादंडशंकामंकूरयंती जिनार्भकमुत्संगे वहंत्याः पांडुकवनलक्ष्म्याः कनककुंभकुचयुगलव्यामुक्तमुक्ताहारकांतिझरी तच्छिरसि पततीति विद्याधरनिकरेणोत्प्रेक्षमाणा वदनरुचियशोवैशद्याभ्यां विजितयोः सेवार्थमागत्य नभसि सन्निहितयोर्जंबूद्वीपसंगतयोः सुवर्णवर्णभगवद्दिव्यदेहकांतिसंक्रांतिवशेनारक्तमंडलयोः शशांकयोर्बिंबयुगलान्निःसरंती कौमुदीति पश्यतां मतिं जनयंती, अयं किल जिनार्भकः परमहिमांचितः, सर्वसुपर्वजनसेव्यमानपादो महीधरसानुचरविद्याधरपरिवृतः, सकलदिगंबरोन्नतः स हिमालयो गिरीश इति मत्वा समापतंती सुरस्रवंतीव च व्यराजत ॥

सैषा पांडुशिला विपांडुरलसत्कंदस्य लीलां दधे
तत्रायं जिनपोतकः समतनोत्पुण्यप्ररोहश्रियं ॥
धारा क्षीरमयी रराज विचलत्कांडश्रियं बिभ्रती
कुंभाः पुण्यलताफलालितुलनां व्यातेनिरे व्याततः ॥७॥
यद्वा सा व्यतनोज्जिनांगविसरत्कांत्या परीता पयो—
धारा प्रोद्धतरुक्मकांडतुलनां हेम्ना समानच्छविः ॥
दूरं व्योम्नि समुद्गता जलकणाश्छत्रश्रियं तेनिरे
तन्मध्ये कलशश्रियं समतनोत्कुंभस्तदा कश्चन ॥८॥

अयं खलु जिनबालकबर्लाहको बहुधाराराजितो हानिदाघं शमयति,

---

१ पर—महिमांचितः उत्तममाहात्म्योपेतः । २ सर्वामरजनसेव्यचरणः। पक्षे सर्वामरजनसेव्यप्रत्यन्तपर्वतः । ३ सकलदिशाकाशमभिव्याप्य उन्नतिं गतः पक्षे सकलमुनिषु उन्नतिं प्राप्तः । ४ हि मालयो माया लक्ष्म्या आलयः पक्षे हिमालयो नाम पर्वतः । ५ मेघः बहुधाराराजितः पक्षे बहुधारा राजितः शोशुभ्यमानः । ६ हा— निदाघं, पक्षे हानिश्च दाघश्च पापं च ।

कीर्तिमुत्पादयति, धर्मामृतवर्षेण भव्यमानसस्य समुल्लासं करिष्यतीति च युक्त, तथाप्यसौ पंके[1] नाशयति सदामरालिसंतोषं विशेषयति, चंच-लांनंदं[2] त्यजति, समुज्जृंभितापं[3] मेघाटोपं निर्मूलयति तथा स्वयमधः-स्थितः सन् ऊर्ध्वं घनपुष्पवृष्टिं[4] संपादयिष्यतीति विचित्रघनाघनोऽयं सकलभुवनभृतामाधिपत्येऽभिषेक्तव्य इति मत्वा किल सुरेंद्राः क्षीर-दाराशिपयःपूरेण समाच्छिषिंचन् ॥

मरुद्भेरीगर्वीरितरसुरवादित्रनिनदैः
जयारावैर्नृत्यत्रिदशसुदतीनूपुररवैः ॥
तथा वंदिव्रातैः पठितजिनराजस्तुतिरवैः ।।
अभून्छब्दाद्वैतं परकथितमध्यक्षविषयं ॥ ९ ॥

तदानीं खलु प्रजवं प्रचालितः प्रचुरतरपयःप्रवाहः क्वचिद्विचित्र-रत्नकांतिसंगततया द्रवीभूतेंद्रचापशंकाकरः, क्वचन विद्रुमप्रभारंजि-ततया एकत्र निलीनघनतिमिरशंकाकरः, क्वचिन्मरकतमणिघृणिसंग-ततया हरितांशुकच्छायः, एकत्र प्लावितानां सुरसैनिकानां क्षीराब्धि-मज्जनमिव विदधानः, पत्रशाखाशिखाप्रदर्शनानुमीयमाननंदनवनकर्षणः समेरुमभितः प्रससार ॥

किं रौप्याद्रिरयं घनः किमु सुधाराशिः क्वचित्संगतः
किंवा स्फाटिकभूधरः किमथवा चंद्रोपलानां चयः ॥
आहोस्वित्त्रिजगच्छ्रियो धवलितः सौधः सुधासेचनैः

---

१ पंकं कर्दमं पापं च 'पंकोऽस्त्री कर्दमे पापे' इति विश्वलोचनः । २ चंचलायाः आनंदं पक्षे अनित्यं आनंदं । ३ समुज्जृंभितापः यस्मात् एतादृशं मे अघाटोपं पापविस्तारं । पक्षे समुज्जृंभिताः आपो जलानि यस्मिन सः । मेघाटोपं—जलदविस्तारं ॥ ४ निबिडपुष्पवृष्टिं पक्षे जलवृष्टिं । 'घनपुष्पं मेघरस' इत्यमरः । ५ विजयार्धपर्वतः ।

इत्थं व्योमचरैर्व्यलोकि कनकक्षोणीधरः कौतुकात्॥१०॥

तदानीं गगनमुत्पातिताः प्रचुरतराः कुंदावदाता मेरुमहीभृतः श्वेतातपत्रविभ्रमं तन्वानाः, गगनलक्ष्म्याः सुपर्वजनसंमर्दवशेन स्फुटित-मुक्ताहारमणिसंदोहसंदेहं संदधानाः, श्रीमदर्हत्कीर्तिलताबीजराजि-शंकासंपादका नभोऽगणपुष्पहारायमाणाः, दिक्सुंदरीकर्णपूरायमाणाः स्नानपयःपूरशीकरनिकराः क्रमेण निबिडिताः प्राप्तज्योतिर्लोकास्तत्र तारागणेषु क्षणं पयःस्रवणशालितया करकाशंकां, क्षणमुन्मज्जन-वत्तया बुद्बुदमतिं, क्षणं डिंडीरखंडमंडिततया शुक्तिकाशकलसंगत-मुक्तामणिविभ्रमं, क्षणं संजवनसमाकृष्टनंदनवनतरुशाखाशिखालग्न-तया कुसुममनीषामुत्पादयंतस्तपनबिंबे क्षणं कृतजलाकर्षणतया महां-स्तप्तायःपिंडः पानीयं पायित इति संभावनां, क्षणं कोकनदबुद्धिं तन्वानाः, सुधाकरबिंबे च क्षणं जरन्मरालमतिं, क्षणं शंखशंकां, क्षणं कुमुदधियं, क्षणं घनफेनपुंजधिषणां विदधानाः, अनुप्राप्तमहीतलाः जिनचंद्रोदयाविधृतसकलचंद्रकांताशिलागलितपयःप्रवाहा इव, जगद्गुरु-संगतरंगिताः सुरमहीभृतः संमदाश्रुपूरा इव प्रस्रुताः स्वच्छतरप्रवाहाः, अयं भुवनैकपालकः सगोत्ररक्षणदक्षः पारावारः सुरेंद्रभीतानां मही-धराणां शरणमिति मत्वा गिरिराजेन सुमेरुणा सागरायोपदीकृता निर्मल-

---

१ मेरुपर्वतः। २ शीकरोऽम्बुकणाः स्मृताः ३ वर्षोपलस्तु करका इत्यमरः। ४ चक्रवर्ती, जलसंरक्षकश्च। ५ गोत्रया पृथ्व्या सहिताः सगोत्राः राजानस्तेषां रक्षणे दक्षः। पक्षे गोत्राः पर्वताः तेषां रक्षणे दक्षः। यदा सुरेंद्रः पर्वतपक्षान्पाटयितुमुद्यतोऽभूत्तदा केचन पर्वताः समुद्रं शरणं गता इति कथात्रानुसंधेया।

पटनिकरा, इति शंक्यमानास्तरंगिणीकांतमवापुः।

शुद्धांबुस्नपने निष्ठां गते गंधांबुभिः शुभैः॥

ततोऽभिषेक्तुमीशानं शतयज्वा प्रचक्रमे ॥११॥

चंचच्चंदनकल्पकद्रुकुसुमैः कर्पूरचूर्णैस्तथा ।

संमिश्रा सुरहेमकुंभविगलच्छ्रीगंधपाथोझरी ॥

क्षीरांभोधिपयःप्रवाहधवलं मेरुं हिमानीगिरिं

मत्वा तत्र समापतंत्यातितरां गंगेव तुंगा व्यभात्॥ १२॥

तस्यां खलु गंधोदकनिम्नगायां जिनार्भकादिव्यदेहसौगंध्यसंजात-लज्जाभरेणेवावाङ्मुखतया प्रवहन्त्यां, कृतावभृतमज्जनाः सुरजनाः धूपदीपगंधाक्षतादिभिर्देवदेवं पूजयामासुः ॥

नटत्सुरवधूजनप्रविसरत्कटाक्षावलिं ।

कपोलतलसंगतां त्रिभुवनाधिपस्यादरात् ॥

सुराधिपतिसुंदरी स्नपनतोयशंकावशात्

प्रमार्जयितुमुद्यता किल बभूव हासास्पदं ॥१३॥

तदनु सा किल पुलोमजा भगवदंगसंगतजलकणगणं विमलदु-कूलांचलेन संमार्ज्य, त्रिभुवनातिलकस्य तस्य ललाटतटे तिलकं परिकल्प्य, निसर्गरंध्रयोः श्रवणपुटयोः किमपि तत्वरहस्यमधिगंतुमुपागत-

---

१ इंद्रः। २ विशदमणिमयाभ्यां वज्रसूचीविभिन्नश्रवणयुगमिताभ्यां कुंडलाभ्यां स रेजे॥ किमपि समधिगन्तुं तत्त्वविद्यारहस्यं सुरगुरुभृगुपुत्राभ्यामिव ज्ञानसिंधुः॥ त्रिगुणवलितमुक्तातारहारापदेशादुरसि वरणमालाः प्रक्षिपन्त्यस्तदानीं॥ अहमहमिकयोर्वी श्रीश्च मुक्तिश्च तिस्रः स्वयमपि वृणते स्म प्रेमवत्यस्तमेकम् ॥ निरुपममणिमाला तन्मुखेंदोरुपान्ते विगलदमृतधाराकारमुन्मुद्रयन्ती ॥ शशिनममलकान्त्याक्रम्य बंदीकृतानां विततिरिव विरेजे तत्प्रियाणामुडूनाम् ॥ उपरितनं गद्यखंडं धर्मशर्माभ्युदयाष्टमसर्गस्थश्लोकानुकारीति प्रतिभाति ॥

मिव शुक्रसुरगुरुयुगलं तस्यामानवचरितं तन्मुखस्य च महादर्शलीलां च प्रकटयितुमायातमिव चंद्रसूर्ययुग्मं माणिकुंडलाद्वितयं संयोज्य, गलशंखगलितमुक्ताभिरिव मुखशशिना राकासुधाकरं कलाचातुर्गुण्येन विजित्य बंदीकृताभिरिव तत्प्रियाभिस्तारकाभिर्मुक्ताधिकसंपदमयमनुभविष्यतीति प्रकटयंतीभिर्मौक्तिकपरंपराभिर्घटितां कीर्तिर्लक्ष्मीभिर्मुक्तिलक्ष्मीभिरार्हन्त्यलक्ष्मीभिरिवाहमहमिकया समर्पितवरणमालाञ्चितयशंकाकरीं त्रिगुणवलितमुक्तामालां कंठदेशे समर्प्य, करसरोजानुरागसमायाततपनशंकाकरमणिकंकणं करयोः कल्पयित्वा, नाभिजघनरुचिहृत्तया,[1] सद्वृत्तरत्नशोभिततया,[2] कल्याणगुणगुंभिततया[3] मणिकिंकिणीकलापस्य मध्यस्थता युक्तेति मध्यप्रदेशे तमर्पयित्वा, संसारसागरस्य तारकमिदं चरणयुगलमिति नखच्छलेन समाश्रितानां तारकाणां ततिमुल्लासयितुं सन्निहितेनेव, यद्वा कांत्या कामितार्थप्रदानस्फूर्त्या च सुरांगतामिदं[4] बिभर्तीति मत्वा तत्प्रादक्षिण्यक्रममुपगतेनेवाथवा प्रौढशोभनखाश्रिततया[5] सत्समूहसेव्यतया[6] शुभकरतया तिमिरनिकरनिराकरणचतुरतया च पदयुगं मम बंधुतां स्वीकृत्य मम विप्रियं पंकजातं[7] निर्मूलयतीति स्नेहादुपगतेनेव शीतकरबिंबेनेव घनवज्रनूपुरेणांघ्रिद्वयमलंचकार ॥

---

१ नाभिप्रदेशजघनप्रदेशानां मनोहरतया । २ वर्तुलरत्नशोभितया । ३ स्वर्णतंतुयुक्ततया । मंगलगुणयुक्ततया । ४ सुराणां अगः कल्पतरुरित्यर्थः । पक्षे आरक्तवर्णत्वं । ५ प्रौढ शोभन– खाश्रिततया प्रौढशोभ– नखाश्रिततया च । ६ सतां सज्जनानां समूहः । पक्षे सतां नक्षत्राणां समूहः ७ पंकजातं दिनविकासि कमलं । पक्षे पापसमूहं

एवं शच्या भूषितं देवदेवं
पायं पायं लोचनैस्ते सुरेंद्राः ॥
आनंदाब्धौ मज्जनोन्मज्जनाब्धा
इत्थं स्तोतुं प्रारभन्ते स्म भक्त्या ॥ १४ ॥

भजार्थस्त्वां लोकाधिप! तव पदांभोजयुगलं।
श्रितो भूपो नृणां द्विपद इति कीर्तिं स भजते ॥ १५ ॥
नरो यस्त्वत्सेवाविमुखहृदयस्तं बुधवरा ॥
चतुष्पादं प्राहुर्वत विमलकारुण्यजलधे! ॥ १६ ॥
तव देव! पादपद्मं यो देही भजति विमलतरभक्त्या ॥
अत्र परत्र च चित्रं शब्दं देहीति स खलु विजहाति ॥ १७ ॥
बहुलंघनैरपि विभो! दुर्वारं जिनप! भवमयं रोगं ॥
त्वन्नामकीर्तनौषधसेवनतः सज्जनाः प्रशमयन्ति ॥ १८ ॥
त्वन्नामकामधेनुः सुरवा गोग्रमकामरुचिहेतुः ॥
सुपदा शोभनवर्णा जिननाथ! समस्तकांक्षितं सूते ॥१९॥

इति स्तुत्या सह जिनाभिषवं समाप्य दुंदुभिनादकाहलीकलकलजयघोषणादिभिर्मुखरितादिङ्मुखास्ते पुरंदरप्रमुखा बर्हिर्मुखाः साकेतपुरागमन

---

१ हे जिन यो नरस्त्वत्पदकमलयुगं भजते स नृणां भूपो भवति। स एव द्विपद इति कीर्तिं प्राप्नोति । यस्तु त्वत्सेवाविमुखः स चतुष्पाद् पशुरिति विद्वांसो ब्रुवन्ति । २विमलभक्त्या तव पदयुगं भजन्देही–प्राणी आश्चर्यमिदं देहीति शब्दं परित्यजति अर्थात् देहीति लोकानां पुरतः [याचनावचनं] नोच्चारयति । अथवा देहीति शरीरीति शब्दं विजहाति इत्यस्य मुक्तो भवतीत्यर्थः ३ त्वदीयं नामैव कामधेनुः । ४सुशोभनो रवः ध्वनिस्तेन युक्ता । ५ शोभनचरणोपेता मधुरशब्दोपेता । ६ मनोहरश्वेतादिवर्णा । मनोहराक्षरोपेता च ।

समुखा गगनतलमुत्पत्य क्वचिन्मणिभूषणगणकांतिबालातपेन हर्षित-चक्रवाकाः, क्वचिन्मुक्तामरीचिवीचितोषितचकोराः क्रमेण सुगंधिगंध-वहस्तनंधयव्यालोलविमलपताकापटैः सुरनिकरमाव्हयंतीमिव विलसंतीं साकेतपुरीं अभितः ससांगबलानि निवेश्य, प्रविश्य च तत्र निराकृत-सुरालयं नाभिराजालयं सुरविरचितविविधमणिगणरुचिनिचयरुचिर भ्रमरततिविततसुरतरुकुसुमसुरभितश्रीगृहांगणशोभितसिंहविष्टरे तं जि-नार्भकं निवेशयामासुः ॥

सुतमुखनिशाधीशालोकप्रवृद्धमुदंबुधि-
प्रवरजठरे मग्नाविंद्रो जगत्पितराविमौ ॥
स्मितयुतमुखः सर्वं वृत्तं निवेद्य तदादरात् ॥
प्रमदजलधेः पारं तौ दंपती द्रुतमानयत् ॥ २० ॥

तदनु महार्घमणिभूषणमाल्यवसनादिभिर्मरुतां पतिर्मरुदेवीनाभि-राजौ पूजयित्वा युवां खलु जगद्गुरोरपि गुरुतया महापूज्यौ पुण्यध-नकोशायमानौ जिनतपनसदुदयपुरंदरकाष्ठापूर्वाचलावित्यादिप्रकारेण तुष्टाव ॥

नाभिक्ष्मारमणस्तदा समतनोत्तज्जातकर्मोत्सवं ॥
शक्रस्यानुमतेः प्रमादवशगैः पौरैः समं सादरैः ॥
यस्मिन्वाद्यरवैरपूर्यत जगत्स्वेष्टैस्तथाशार्थिनाम् ॥
मोदैः पौरजनस्य चित्तसरणिर्नेत्रं प्रमोदाश्रुभिः ॥२१॥
तत्तादृक्षमहोत्सवे पुरजनान्मोदांबुराशेः परं
पारं प्राप्नवतो निरीक्ष्य बहुधा सोऽयं सुराणां विभुः ॥
आनंदोद्यतनाटके कुतुकताभिरं दधेऽसौ चिरा-

दानंदं निजमांतरं प्रकटयन्नुन्मस्तकं निस्तुलं ॥ २२ ॥

वक्ता नाट्यागमानां कुलिशधरवरो नाटके सन्नटोऽभूत् ॥
यस्मिन्नाभिक्षितीशप्रमुखनरसुराः प्रेक्षकाः श्रीजिनेशः ॥
आराध्यो रंगभूमिस्त्रिभुवनवलयं तत्फलं तु त्रिवर्ग—
प्राप्तिस्तन्नाटकस्य त्रिदशकृततनुतेर्वर्णने को नु शक्तः ॥२३॥

अथापि कविजनसमुचिताचारानुसारेण किंचिद्व्यावर्ण्यते ॥

स खलु मघवा घनौघसंघातविघाताय समाहितः सकलबलारिप्रमुखसुराधिपप्रकटमुकुटतटघटितजंभारिमणिजृंभमाणमेचकरुचिनिचयबलाहकविलसितचलाचलशंपाकुलशंकामतिसंपादकव्यामुक्तमुक्ताफलनिरर्गलनिर्गलत्प्रभापटलपुनरुक्तनखचंद्रचांद्रिकानंदितपुरीजनसुरीजननयननीलोत्पलस्य भगवतो जिनराजस्य चारितमाधिकृत्य प्रवृत्तं, प्रदीप मिव प्रकटितदशावतारं, पांडुकवनमिव जन्माभिषेकसंगतमेकनेत्रांचितमपि सहस्रनेत्रांचितं किमपि रूपकमभिनेतुं प्रवृत्तः कृतमंगलालंकारो मूर्तिमानिव नाट्यागमः, कामिनीमिव सदामरालिसन्नुतमृदुपदन्यासां सुवर्णालंकारशोभितां च, मुक्तावलिमिव सुगुणां सुनायकां

---

१ विपुलपापसमूहविनाशाय। २ इंद्रः । ३ इंद्रनीलमणिः । ४ प्रकटितानि दशावताराणि दशजन्मानि यस्मिन् तत्। पक्षे प्रकटितः दशाया वर्तिकाया अवतारो यस्मिन्। ५ विरोधः परिन्हियते एकनेत्रांचितं एकनायकोपेतं सहस्राणि नेत्राणि नयनानि यस्य सहस्रनेत्रः इंद्रस्तेन युक्तं । ६ सदा मरालिपक्षिसन्नुतमृदुपदन्यासा कामिनी । अमरालिभिः देवपंक्तिभिः संस्तुतमृदुशब्दरचनोपेता नांदी ७ हेमाभरणशोभिता कामिनी। शोभनाक्षरोपेता उपमाद्यलंकारोपेता नांदी । ८ शोभनतंतूपेता । शोभनकान्त्योजःप्रसादादिगुणोपेता नांदी च । ९ मध्यमण्युपेता । शोभननायकपरा नांदी । 'नायको नेतरि श्रेष्ठे हारमध्यमणावपि' । इति विश्वलोचनः ।

सद्वृत्तरत्नमंडितां च, अनुपमामपि उपमांचितां, बुधजनकलितश्लाघा-मपि विबुधजनकलितश्लाघां नांदीं प्रयुज्य रंगमवतीर्णः पीतावशेषं नाट्यरसं स्वयं विभजन्निव पुष्पांजलिं चिक्षेप ॥

पुष्पांजलिः पतन्रेजे मत्तालिभिरनुद्रुतः ॥
नेत्रौघ इव वृत्रघ्नः कल्माषितनभोङ्गणः ॥२४॥

ततः किल नानाविधवाद्यमुखरीकृतादिगंतरे, तद्रंगस्थलांतरे मरसमुद्ध-ताभिनयप्रायमारभटीयवृत्तियुक्तं तांडवमारभमाणः, परितः प्रसृतया कटाक्षधारया यवनिकाविभ्रममुद्भावयन्, व्यालोलमुकुटव्यालग्नरत्नप्रभा-भिर्दिशि दिशि सुरचापशंकामंकूरयन्, चंचलमुक्तामणिभिरभिनभः स्थलं सौदामिनीसहस्रभ्रमं संपादयन्, निजभुजशाखासहस्रे कलितनर्तनान-प्सरोजनान्क्षणं गूढं क्षणं प्रकाशं च संचारयन्क्षणमेकः, क्षणमनेकः, क्षणं व्यापी, क्षणमणुः, क्षणमदूरे, क्षणं दूरे, क्षणं दिवि, क्षणं भुवि, विल-समानः परितो नाट्यरसमुत्तरंगयामास ॥

तदा तादृङ्नाट्ये विलसति बलारातिकलिते ।
भुजोल्लासक्षुभ्यज्जलदविगलद्वारिपृषतां ॥
सुरश्रेणीवृष्टप्रचुरकुसुमानां च पततां ।
विशेषो विज्ञातो मधुकरवितत्या विततया ॥ २५ ॥

अयं किल वज्रधरः पुरा शिलामयान्पुंरूपान्धरान्बिभेदाहं किल-

---

१ वर्तुलरत्नशोभिता ।, शोभनहरिण्यादिवृत्तोपेता नांदी च । २ अनुपमा अपूर्वा उपमालंकारेण युक्ता च । ३ विद्वज्जनप्रशंसोपेता । ४ देवजनकृतप्रशंसायुक्ता । ५ इंद्रस्य । ६ जलकणानां 'पृषन्ति बिंदुपृषताः पुमांसो विप्रुषः स्त्रियां ' इत्यमरः । ७ विस्तारं प्राप्तया । ८ पुल्लिंगरूपान्

मृण्मयी स्त्रीरूपा धरेति मत्वैव पुरंदरपरिचिंतेन क्लीबेनापि बहुधा चलेन नाट्येन पुंरूपा एव अचलाः कंपिता अहं तु स्त्रीरूपा चलेति मत्वा किल काश्यपी तदा कंपमाससाद ॥

तालशोभि ललिताप्सरोज्ज्वलं चित्तहारि ततवेणुनिःस्वनं ॥
हंसकध्वनिमनोरमं बभौ तद्यथोपवनमिंद्रनर्तनम् ॥ २६ ॥

तदानीं अन्यमपि दृश्यानुगुणतयैव गंधर्वा एवं प्रकटयामासुः ॥

धिक्तां कुतीर्थराजिं धिक् तां तत्कल्पितां मतप्रौढीं ॥
धिक् तांस्तत्त्वप्रकटान् धिक् तान्ये नात्र संगता भगवन् ॥२७॥
धर्माध्वानि चिंतकृतां मंदनांतकृतां भवार्तिकृंतकृतां ॥
मुक्तिश्रीकांतकृतां प्राप्स्यासि संत्रातसकलजंतुकृतां ॥२८॥
मुक्तिश्रीनेपथ्यैः सुरनरपथ्यैः प्रतीतसद्रथ्यैः ॥
कर्मारिविजयरथ्यैर्दिव्यध्वनिभिर्भविष्यसि सुतथ्यैः ॥२९॥
एवं नाकाधिराजस्य नर्तनं पुण्यवर्धनं ॥
दृष्ट्वा नाभिमहीपालो देव्या सह विसिष्मिये ॥ ३० ॥
वृषो धर्मस्तेन त्रिभुवनगुरुर्भाति यदयं ॥
ततो नाकाधीशो वृषभ इति नामास्य विदधे ॥
जनन्या सुस्वप्ने विबुधनुतनाकावतरणे ॥
तया दृष्टः श्रीमान्वृषभवररूपः स इति वा ॥ ३१ ॥

---

१ पृथ्वी । 'क्षोणिर्ज्याः काश्यपी क्षितिः' इत्यमरः । २ तालो नाम वृक्षविशेषः ताडवृक्ष इति महाराष्ट्रभाषायां पक्षे तालः कालक्रियामानं : । ३ अप्सरसो देवांगनाः पक्षे सरांसि । ४ वंशवाद्यविशेषः । ५ हंसपक्षिणः पक्षे नूपुराणि । ६ नेपथ्यैः आकल्पैः 'आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनं' इत्यमरः । ७ देवमनुजहितकरैः । ८ रथ्याभैः । ९ यथार्थैः

तदनु पुरुहूतस्तस्य जगद्गुरोः मज्जनमंडनसंस्कारक्रीडनादिचतुरान् देवी-निकरान् समानवयोरूपवेषान् प्रकटितमनोविनोदनतत्तद्विकृतिसमुन्मेषान्सुरकुमारविशेषांश्च परिचर्यायां नियोज्य निखिलनिर्जरबलेन सह निजभवनमुपजगाम ॥

जिननंदनद्रुमोऽयं सिक्तो देवैः स्वकालवालेद्धः ॥

स्मितकुसुमानि दधे द्राक् तन्वानस्तत्र कांचनच्छायां ॥३२॥

अलममितफलप्रदानचतुरस्य निरवधिकश्रीविराजितस्य विजितमारस्य जिनकुमारस्य सुमितफलप्रदानचतुरैः सूनश्रीविराजितैः स्वयमेव पंचतामुपगतैः कल्पद्रुमैरुपमानवार्तया ॥

जिनबालशीतरश्मिर्जीवंजीवं प्रति प्रहर्षकरः ॥

स्मितचंद्रिकां वितेने सकलकलावल्लभः सदानंदी ॥ ३३ ॥

अलं अलं सिद्धांतविदितमहिम्नः कलंकरहितस्य दोषकथातीतस्य विमलमतेर्जिनबालस्य पूर्वपक्षविदितमहिम्ना सकलंकेन दोषाकरेण जडव्युत्पन्नेन चंद्रेणोपमित्या ॥

सर्वतो सुखसमृद्धिसमेतो मानसस्य परितोषणहेतुः ॥

द्रागबभार जिनपोतपयोदो हासकांतिमथविद्युतमिद्धां ॥३४॥

कृतं निश्चलानंदसुंदरस्य सकलभुवनोद्धरणदक्षस्य समाश्रितानाममृतप्रदस्य निखिलमनोहरदिव्यध्वनिं प्राप्स्यतो जिनार्भकस्य चंचलानंदसुंद-

---

१ शुश्रूषायां । २ स्व-काल-वाल-इद्धः, आत्मनः कृष्णकेशेन इद्धः भगवान् ॥ पक्षे स्वक-आलवाल-इद्धः नंदनद्रुमः ॥ ३ सुवर्णकान्ति, अनिर्वचनीयां छायां । ४ सु-ऊनश्रीः इति ध्वनिः पक्षे पुष्पश्रीः । ५ पंचता मरणत्वं पक्षे पंचसंख्यात्वं । 'पंचता मृत्युमात्रेऽपि पंचभावेऽपि पंचता' इति विश्वलोचनः। ६ चित्तस्य पक्षे मानसरोवरस्य। ७ मोक्षप्रदस्य ।

रेण सकलभुवनान्यधः पातयता समाश्रितानां विषप्रदेन कठोरगर्जनेन जलदेनोपमया ॥

पीठबंधः सरस्वत्या लक्ष्म्या हसितविभ्रमः
कीर्तिवल्ल्याविकासोऽस्य मुग्धास्मितमयोऽभवत् ॥३५॥
मुखवारिजं विलोलं नयनभ्रमरं स्फुटाधरोष्ठदलं ॥
दंतांशुकेसराढ्यं स्मितमकरंदं दधे कुमारस्य ॥ ३६ ॥

एतन्मुखं वारिजं च कृतराजविद्वेषतया लक्ष्मीनिवासभूततया च समानं अथापीदं वदनं मन्मनवचनामृतविशोभितं रत्नभूषणैरलंकारमाश्रितं सुमनोजनसेवितं च, नलिनं पुनर्विषजातविख्यातं स्वर्णस्फूर्तिमधिगतमपि सर्वतोमुखसंपदाढ्यमपि बहूर्मिकाहंसककर्णिकादिकालितमपि अपाढ्यगुणालमिति शब्दमभिगम्य मार्गणानां पंचतामेवाशासमानस्य विषमायुधस्य मार्गणतामुपगतं मधुपसेवाकरमिति न दृष्टांततामर्हति । किंबहुना संध्यारागरंजितनभःस्थले बालचंद्रचंद्रिकापूर इव, पद्मरागघटितप्रदेशे स्फाटिकमणिप्रभाप्रसर इव, समुल्लसत्पल्लवतल्लजप्रत्यग्रकुसमसुषमाप्रसर इव, विकचकोकनदे राजहंसरुचिरिव कुंकुमालिप्तप्रदेशे मलयजरस इव तस्य जिनबालस्याधरबिंबे स्मितच्छविराविरास ।

तन्मुखकांतिपयोधौ स्मितचंद्रः स मुदाब्धिवृद्धिकरः ॥
पित्रोर्मन्मनवाणीपीयूषं चाविरास सुरसेव्यम् ॥ ३७ ॥

उत्तानशयनमुपगतस्य नरनायनंदनस्य मुष्टिद्वयं केषांचिद्वदनसुधाकरकांतिसंक्रांतिमुकुलितबहुनालोदंचितकरकमलयुगलशंकामन्येषां

---

१ अधिकतरंगहंसपक्षियुक्तपुष्पकलितं पक्षे मुद्रिकापादकटककर्णकुंडलयुक्तमिति ध्वनिः । २ याचकानां बाणानां च ।

च कर्मारिविजयसन्नद्धानियुद्धार्थमाबद्धमुष्टियुगमतिं, परेषां च वक्षःस्थलविलसितमुक्ताहाररुचिसुरापगासंजातसुवर्णसेराजद्वयंसभावनां, इतरेषां पुनर्देहकांतिकलशंवरुणालयतरुगविद्रुमवल्लिकापल्लवतल्लजद्वंद्वाभियं च संपादयामास ॥

ईमं चुचुंब मुक्तिश्रीर्ध्रुवं रागात्कपोलयोः ॥
* तांबूलस्य रसः सक्तो यत्कुंडलरुचिच्छलात् ॥ १८ ॥

इयं खलु मेदिनी मामकीनपादस्पर्शादपापा निष्पंका च जायेत चेत्कदा कथं सारसंस्यसमृद्धिर्भवितेति मत्वा किल मत्पितुर्नाभिमहीकांतस्य पत्नीत्वेन मम जननी मेदिनीति बुद्ध्येव मणिभूमिषु भूपतिसुतश्चंक्रमणं जानुभ्यां चमदकुरुत ॥

स्खलत्पदं बभौ तस्य वचनं गमनं तथा ॥
आद्यं पुनर्मनोहारि परं नूपुरराजितं ॥ ३९ ॥
× प्रवेपमानाग्रपदं नृपात्मजश्चचाल देवीजनदत्तहस्तः ॥
नखप्रभाभिर्मणिकुट्टिमांगणे तन्वन्प्रसूनास्तरणस्य शंकां ॥ ४० ॥
धूलिकेलीं ततानायं नालीकनिभलोचनः ॥
सुराधीशसुतैः साकं धरापालस्य नंदनः ॥ ४१ ॥

एवं बाललीलामतिक्रांतः कौमारवयसि सुरकुमारैः परिवृतः

---

१ क्षीरसमुद्रः । २ जिनबालकं । ३ अपगताः आपः जलानि यस्याः अपापा, पापरहिता च । ४ पापरहिता कर्दमरहिता च । ५ कमलस्य, पक्षिणो हंसस्य वा । 'सारसं पंकजे क्लीबं सारसः पक्षिचंद्रयोः' इति विश्वलोचनः । ६ संचारः । ७ स्खलितं पदं, वर्णसमूहात्मकं वचनं स्खलत्पादं गमनं च ।

* आत्सुक्यतुन्ना शिशुमप्यसंशयं चुचुंब मुक्तिर्निभृतं कपोलयोः ॥
माणिक्यताटंककरप्रदेशतस्तथाहि तांबूलरसोऽत्र संगतः ॥
× क्रमेण सोऽय मणिकुट्टिमांगणे नखस्फुरत्कांतिझरीभिरंचिते ॥
स्खलत्पदं कोमलपादपंकजक्रमं ततान प्रसवास्तृते यथा ॥

सहोत्पन्नमतिश्रुतावधिलोचनः सकलविद्यापारावारपारदृश्वा प्रत्यक्षीकृतसकलवाङ्मयः पृथ्वीपतितनयः कदाचिद्व्यालोलमुक्ताकलापः कलितमधुरालापः, संगीतप्रसंगेन, कदाचिदाबद्धकाविपुंडरीकमंडलः काव्यप्रबंधरचनेन, कदाचित्काव्यसागरनौकासकाशछंदोविचितिचारुतरलक्षणप्रसरादिपरीक्षणेन, कदाचित्कवितावितानालंकारायमाणोपमाद्यलंकारविवेचनेन, कदाचिदक्षरच्युतकमात्राच्युतकार्बिंदुच्युतकाचित्रबंधविवेकादिशब्दालंकारकल्पनया, कदाचिन्मंथानभूधरमथ्यमानपयःपारावारगर्भसमाविर्भूतलहरीपरंपरागर्वसर्वंकषवचनप्रपंचः वावदूकैः समं वादकलया, कदाचिन्मधुरवाद्यगोष्ठीभिः, कदाचिद्वीणागोष्ठीभिः, कदाचिच्छुकशिखंडिहंससारसक्रौंचकरिकलभमल्लाद्यनेकाकारविकृतामरकुमारपरिपाठनपटुनटनमृदुकूजितकेकारारोहणाद्यनादिनानाविधविनोदैः,

कदाचित्समागतप्रकृतिजनरंजनवचनगुंफेन कदाचिदमराधिपप्रहितसुरतरुप्रसूनविरचितसुरभिदामांबरभूषणः सुरभिलेपनो मेघकुमारकल्पितधारागृहेषु जलकेलिविनोदेन, कदाचिन्नंदनवनसमाने क्रीडावने पवनामरमंदमंदवलनविरजीकृते वनक्रीडाव्यापारेण कालं निनाय ॥

इत्यर्हद्दासकृतौ पुरुदेवचंपूप्रबंधे पंचमःस्तबकः ॥

अथ षष्ठः स्तवकः ।

क्षोणीकल्पतरोर्जिनस्य तदनु प्राज्यप्रभावश्रियः
छायां कांचनमंजुलां विदधतो नाकाधिपानंदिनीं ॥
तारुण्यामलमंजरी सुमहिता हृष्यत्त्रिलोकीजन—
प्रोद्यन्नेत्रपरंपरामधुकरश्रेणीं सदाऽतर्पयत् ॥ १ ॥

तदानीं निःस्वेदनिर्मलक्षीरगौरक्षतजसमचतुरस्रसंस्थानवज्रवृषभनाराचसंहननसुरूपसुरभिस्वस्तिकनंद्यावर्त्याद्यष्टोत्तरशतलक्षणलक्षितमसूरिकाप्रभृतिनवशतव्यंजनरंजिततप्ततपनीयनिकाशवर्णसंपूर्णपरमौदारिकशरीरस्य शस्त्रपाषाणातपवर्षाविषाग्निकाष्ठकंटकत्रिदोषसंभवामयजरादिबाधाविदूरस्य मृदुमधुरगंभीरोदारप्रियहितमितवचनसारस्य चतुरुत्तराशीतिपूर्वलक्षोपलक्षितानपवर्त्यायुषः[1] सौंदर्यविजितमारस्य तस्य नाभिराजकुमारस्य सौंदर्यमहिमानमाकलयितुं को वा कविरीष्टे:—अथापि तदीयभक्तिरेव मां मुखरयति वनप्रियमिव वासंतलक्ष्मीः ॥

तरुषु स्थितमेव पुष्पवृंदं फलहेतुर्भुवने चिराय दृष्टं ॥
सुरभूजसुमं[2] जिनस्य मूर्ध्नि स्थितमासीत् सफलं विचित्रमेतत् ॥ २ ॥

संत्यक्तुं सकलंकतां मुखतया जातं निशानायकं ॥
दृष्ट्वा तद्वनिता निशा जिनपतेः केशात्मनाऽजायत ॥
दोषाख्यामपहातुमित्युपगताशंका विशंकामहे ॥
नो चेत्तत्र कथं नवोत्पलरुचिर्हंतोत्तमश्रीरपि ॥ ३ ॥

---

१ अपमृत्युरहितायुषः । २ कल्पतरुकुसुमं ।

तस्य किल वदनं प्रोढशोभनक्षत्राधिपं सकलमहीभृन्मस्तकसेव्य-मानपादं निखिलदिगंतेषु व्यवस्थापितकरं महितशोभनवसुधाधिपतिवि-ख्यातं संवर्धितभुवनपतिं राजानमेव निजप्रौढिम्ना न जिगाय, वनवासिनं कलितमहातपस्थितिं सदा परागरुचिशोभितं कुशेशयनिकरं जिगायेति किं चित्रं ॥

भुवनत्रितयातिशायिशोभां स्फुटरेखात्रितयेन दर्शयंतं ॥
गलमस्य निरीक्ष्य हंत शंखस्त्रपया वारिनिधौ ममज्ज नूनं॥४॥
तस्य वक्षःस्थलं विष्णो लक्ष्म्या निर्वृतिमंदिरं ॥
यत्र मुक्ता विराजंते सदा शुद्धाः स्फुरद्रुचः ॥ ५ ॥
परमहिमयुत तदीयवक्षस्थलमिच्छंति हिमालयं कवींद्राः ॥
तदुचितमुरुहारकांतिगंगा यदपतदत्र परीतपद्मरागा ॥ ६ ॥
मिथ्यात्वातपतप्तो धर्मगजो नाभिसरसि निममज्ज ॥
अस्यान्यथा कथं स्यान्मदधारा रोमराजिकपटेन ॥ ७ ॥

तस्य किल करसरोरुहनिरंतरनिर्मितदानप्रभावणे स्वर्णत्वमुपगता दीना न—दीना बभूवुरिति युज्यते, ते पुनर्लक्ष्मकुमाराः कथमासन्निति सवि-स्मयमास्महे ॥

---

१ प्रौढशोभ नक्षत्राधिपं । प्रोढशोभन—क्षत्राधिपं ।२ किरणः करभागश्च । ३ शोभ—नव—सुधापतिश्चंद्रः शोभन—वसुधाधिपतिः नृपः । ४ भूपतिं समुद्रं च। ५ जलमरण्यं च। ६ सूर्यातपः ध्यानं च। ७ धूलिरिति ध्वनिः, पुष्परजांसि वा॥८ रेखात्रयेणेव जगत्रयाधिकां निरूपयंतं निजरूपसंपदम्॥ तत्कंठमालाक्ये ममज्ज लज्जया विशीर्यमाणः किल कंबुरम्बुधौ ॥ इति धर्मशर्माभ्युदये ९ सर्गे। ९ मोक्षस्थानं, संतोषस्थानं वा। १० सिद्धाः मुक्ताफलानि वा । ११ परम—हिमयुतं विपुलतुहिनयुतं पक्षे पर—महिमयुतं लोकोत्तरमाहात्म्ययुतं। १२ रत्नं, कमलं वा॥ १३ जलं दानं वा॥१४कांचनत्वं जलं वा॥१५लक्ष्मयुक्ताः कुमाराः।

आस्थितो दक्षमवाञ्जिनचंद्रो निष्कलंकाविदितो भवितेति ॥
नूनमिंदुरकरोदशभावांस्तस्य हस्तनरवरूपमुपेत्य ॥ ८ ॥
सदाखंडलाभिरव्यमाक्रांतनेत्रं वलग्नं बलग्नं वरस्यास्य विभः
स्फुरद्रत्नकांचीसुवज्रायुधाढयं स्वराजत्वजुष्टं धनश्रीसमेतं॥९॥

तस्य खलु सक्थिदंडः करभकलभकरकदालिखंडाश्च परस्परं समानाः परंतु ते कांतिकल्लोलैरुरवः अयं तु मुख्यवर्णदैर्घ्यवशादूरुरिति विशेषः॥

पादांगुष्ठनखांशुराजिकलितं जंघायुगं श्रीपतेः
हेमस्तंभशिखानिखातरजतश्रीशृंखलाशालिनीं ॥
डोलां हंत जहास हर्षविहरत्सद्धर्मलक्ष्म्यास्तथा ॥
कंदर्पद्विरदस्य बद्धनिगलामालानलीलां दधे ॥ १० ॥
इष्टार्थदानाद्वर्णाच्च सुरांगौ चरणौ विभोः ॥
अथापि पल्लवं चित्रमधश्चक्रतुरुज्ज्वलं ॥ ११ ॥

तदनु नाभिराजनरपालतनयस्य यौवनारंभमेवं विजृंभितं समीक्ष्य वीतरागस्य विवाहप्रारंभो दुर्घटः। एष किल हठान्मर्य्यादातीत इव मत्तदंतावलस्तपसे वनं प्रविशेत्। तथापि काललब्धिरस्य प्रतिहारी समागमिष्यति तावत्पर्यंतं लोकानुरोधेन पवित्रचरित्रं कलत्रं परिणाययितुमुचितमिति संचिंत्य समासाद्य च समीपं देवस्य ससांत्वमेवमवोचत ॥

---

१ प्रशस्तं इंद्रनामधेयं, सदासंपूर्णशोभं । २ नयनं वज्रं च । ३ मध्यप्रदेशः 'मध्यमं चावलग्नं चेत्यमरः' । ४ इंद्रं । प्रकाशितरत्नमयकांचीकलाप एव वज्रायुधं । ५ स्वर्गप्रभुत्वेन युक्तं शोभनप्रकाशेन युक्तं च ॥ ६ 'सक्थिक्लीबे पुमानूरुरित्यमरः' ७ मणिबंधादाकनिष्ठं करस्य करभो बहिः ॥ ८ कल्पवृक्षौ शोभनारुणवर्णौ ॥

त्रिभुवनपते ! देव ! श्रीमन्स्वभूरासि हेतवः
तव वयमिहोत्पत्तौ पूर्वक्षमाधरवद्भवेः ॥
इति हृदमथाप्यस्मद्वाणीं न लंघितुमर्हासि
त्रिदशविनुतो यस्मात्तस्माद्गुरूननुमन्यसे ॥ १२ ॥
मतिं विधेहि लोकस्य सर्ज्जनं प्रति संप्रति ॥
तथाविधं त्वामालोक्य लोकोप्येवं प्रवर्ततताम् ॥ १३ ॥

ततः सुरनिकरवंदितचरण! त्रिभुवनरमण ! धर्मवल्लिकामतल्लिका-बीजपरंपरायमाण ! प्रजासंततिसंमुत्पत्तये कांचन कांचनवल्लीसरूपां सौंदर्यवैभवनिरस्तरतिमदाटोपां विधृतमणिकलापां त्रिजगति धन्यां कन्यां परिणेतुमर्हसीति ॥

अंगीचक्रे परमपुरुषः सस्मितस्तस्य वाचं ॥
दाक्षिण्याद्वा पितृविषयकात् किं प्रजानुग्रहाद्वा ॥
तस्य ज्ञात्वाभ्युपगममथो भूपतिर्वीतशंको ॥
हर्षाच्चक्रे परिणयविधिं देवराजानुमत्या ॥ १४ ॥
तन्व्यौ कच्छमहाकच्छजाम्यौ सौम्ये पतिंव्रते ॥
यशस्वतीसुनंदाख्ये स एनं पर्यणीनेयत् ॥ १५ ॥

तदानीं खलु साकेतपुरलक्ष्मीविलासमणिमुकुरायमाणे नूतनवितानविततिविलंबिनानामणिगणघृणिपूरनिमग्नसुरनिकरे विविधवाद्यरवमुखरितदिगंतरे परितः परिस्फुरन्माणिदीपप्रभाविसरे :नवरत्नचयविनिर्मितविवाहमंडपांतरे विलसमानमंगलद्रव्यसंगतशातकुंभमयपूर्णकुंभलंभितमाणिवेदिकामध्ये ताभ्यां कन्यामाणिभ्यां पुरुदेवः चंद्रिकाप्रसन्नताभ्यां

---

१ ' जामी स्वसृकुलस्त्रियोः ' इत्यमरः । २ द्विकर्मकोऽयं धातुः ।
३ ज्योत्स्नानिर्मलताभ्यां ।

गगनतल इव निशाकरो विरराज ॥

सौंदर्यस्य तरंगिण्यौ शृंगारांबुधिचंद्रिके ॥
तच्चित्तमत्तकरिणः शृंखले ते बभूवतुः ॥ १६ ॥

तयोः सौंदर्यसंपत्तिः स्वप्नबुद्धेरगोचरा ॥
गाहते सा कथंकारं गिरां पूरं कवीशिनां ॥ १७ ॥

ते खलु कन्यौमतल्लिके गुरुतरभारारोपणमेव चांचल्यानिवारणधुरीणमिति कौतुकितचेतसा वेधसा नितंबभारपयोधरव्याजेन महीधरैः संयोज्य वनितारूपतया निर्मिते विद्युल्लते इव पुरुदेवसुरद्रुमस्य समीपे सद्यस्तनगुच्छकलिते कल्पलते इव च व्यराजतां ॥

अयममरपतीनां रत्नकोटीरकोटी—
घटितपदपयोजस्तत्र ताभ्यां प्रियाभ्यां ॥
सुचिरमधिकभोगान्माप्नुवानः महर्षात्
क्षणमिव बहुकालं देवदेवः स निन्ये ॥ १८ ॥

अथ कदाचित्सौधतलविलसद्रत्नपर्यंके सुप्ता यशस्वतीमहादेवी स्वप्ने कविजनविदितां निजवदनस्य राजतां वसुधानुभवप्रदर्शनेन प्रकटयितुमिव परिप्राप्तप्रसनां मेदिनीं, कुचयुगमिव सरोस्थितिशोभितं, नितंबबिंबमिव मेखलाचितं समुन्नतं च सुराचलं, करमिव कमलसंहृचरं

---

१ 'मतल्लिका मचर्चिका प्रकांडमुद्धतल्लजौ । प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः' ॥ इत्यमरः । २ मौळिः किरीटं कोटीरमुष्णीषं पुंष्पदाम तु इति हैमः । ३ चंद्रता पक्षे नृपत्वं । ४ च— सुधानुभवः, वसुधानुभवश्च । ५ सरः सरोवरं पक्षे हारश्च । ६ रशनायुतं पक्षे कटकयुतं च 'कांच्यां शैलनितंबे च खड्गबंधे च मेखला । इति विश्वलोचनः । ७ कमलमित्रं ।

९ पु. चंपू:

प्रभाकरं, कांचीकलापमिव सकलकलं निशाकरं, पदपद्ममिव सहंसकं सरोवरं, बाहुयुगलमिव परमकरांचितं पयोनिधिं च विलोकयामास ॥

बंदिव्रातप्रकटितसुधासारधिक्कारगीतैः
वादित्राणां श्रुतिहितरवैः सा ततः संप्रबुद्धा ॥
उत्थाय द्रागमलशयनान्मंगलस्नानपूता
भेजे स्वप्नप्रकथितफलं प्रष्टुकामा स्वकान्तं ॥ १९ ॥

तमुपेत्य सुखासीना तत्र सा भद्रविष्टरे
कांताय स्वप्नमालां तां कथयामास सुंदरी ॥२० ॥

तदनु, दिव्यामललोचनविलोकिततत्स्वप्नफलस्वभावोऽसौ देवः सुमेरुस्तनि ! सुमेरुदर्शनेन चक्रवर्तिनं, कमलाक्षि ! कमलबंधुना प्रतापिनं, चंद्रमुखि ! चंद्रेण कांतिसंपन्नं, सरोजगंधि ! सरोजदर्शनेन सरोरुहवासिन्या लक्ष्म्या समाक्रांतवक्षःस्थलं, महीधरश्रोणि ! महीप्रसनेन जलधिमेखलाया वसुमत्याः परिपालयितारं, सागरगंभीरे ! सागरेण संसारसागरसंतरणनिपुणं चरमांगमिक्ष्वाकुकुलवर्धनं पुत्रशताग्रजं तनूजं परिप्राप्स्यसीति स्वप्नफलमित्थमचीकथत् ॥

इमां भर्तुर्वाचं कुवलयदलाक्षी श्रुतिपुटे
वितन्वाना वेगात्प्रमदभरमासाद्य ववृधे
यथा वार्धेर्वेला प्रविलसति राकाहिमकरे
यथा वा संप्राप्ते जलदसमये स्फारतटिनी ॥ २१ ॥

ततः सुबाहुप्रथितोऽहमिंद्रः सर्वार्थसिद्धिं समुपागतो यः ॥

---

१ कलकलः शब्दः पक्षे कलाभिः सहितः सकलकलः तं। २ मरालयुतं पक्षे नूपुरसहितं च ३ परम—करांचितं पक्षे पर—मकरांचितं।

विधेर्वशाद् व्याघ्रचरःसुरोऽयं समासदद्गर्भमरालकेश्याः॥२२॥

एषा किल भुवनपतियोषा स्वस्या वचोविलासमिव सुरसार्थ-श्लाघ्यं, मध्यदेशमिव दिने दिने प्रवर्धमानं, उदरभागमिव वलिभंग-विरहितं, कुचयुगलमिव मलिनमंडलाग्रशोभां चक्रशोभां च प्रकटीक-रिष्यमाणं, शरीरसन्निवेशमिव कोमलकलधौतरुचिं सुमित्रानंदनमपि सुलक्ष्मणमपि भरताभिख्यां प्राप्स्यमानं गर्भं बभार ॥

अंतर्वत्न्या यशस्वत्या सुखं राजेति मन्महे ॥
बुभुजे वसुधां यस्मात्तारोल्लासं ततान यत् ॥ २३ ॥
ददर्शान्तर्वत्नीं धरणिपतिरानंदभरितः ॥
पयोगर्भां केकी सलिलधरराजीमिव नवां ॥
यथा तेजोगर्भां सुरपतिदिशं कोकतरुणो ॥
यथा शुक्तिं मुक्ताफलललितगर्भामिव वणिक् ॥२४॥

ततश्च सा च यशस्वती देवी त्रिभुवनपतिना सह लीलाभवनोप-वनकृतकाचलेष्विव विजयार्धहिमवद्वलकूटेषु, निजगृहोद्यानक्रीडासरो-वरेष्विव गंगाजललवणांबुधिवेलावनसरसीसलिलेषु, विलासमंदिरपरि-सरनंदनवनलतानिकेतन इव पाटीरगिरिशिखरकोटीविलसितचंदन-

---

१ सुराणां देवानां सार्थः समूहः तेन श्लाघ्यं पक्षे सुरसैः श्रृंगारादिरसैः श्लाघ्यं । २ त्रिवलितरंगरहितं पक्षे बलवत्पुरुषनाशरहितं बवयोरभेदाद्वलिबलिः इति भवति ॥ ३ मंडलाग्रं खड्गः मंडलाग्रं स्तनमंडलचूचुकं च । ४ चक्रमिति शस्त्रविशेषः चक्रवाकश्च । ५ सुमित्रादेव्याः पुत्रमपि लक्ष्मण इति नामधेययुक्तमपि भरतइति नामधेयं गतवानिति विरोधः । तत्परिहारः—मित्रजनतोषकर मपि शोभनहलकुलिशादिसमुद्रिकलक्षणयुक्तमपि भरताभिख्यां लप्स्यमानं ॥
६ गर्भिणीं । 'अन्तर्वत्नी गर्भिणीस्याद्गर्भवत्युदरिण्यपि' ॥ इति हैमः ।

वाटीसंनिवेशे विहरमाणा, भिषक्परिषत्संपादितकल्याणामृताहारमिव षट्खंडक्षेत्रमृत्तिकां सेवमाना, सेवाभिज्ञवारांगनाशृंगारसुधासिक्तसूक्तिसरणिमिव समरालापसमुद्भटवीरभटघटापटुतरकथां शृण्वंती मृदुमधुरविदग्धमुग्धपरिहासमनोहरालापशुकसारिकावालिमिव पंजरगतकुंजराराति किशोरपरंपरां पश्यंती कानिचिद्दिनानि निनाय ॥

शाणोल्लीढे कृपाणे मणिमुकुर इव स्वाननं साध्वपश्यत् ॥
वीणागानं मनोज्ञं मधुरमिव मुदा साऽशृणोच्चापशब्दं ॥
चित्ते चक्रे चिराय प्रथमरसमिव प्रौढवीराद्भुतादीन् ॥
एषा त्रस्तैकवर्षास्थितहरिणशिशुप्रोल्लसल्लोलनेत्रा ॥ २५ ॥

तदनु चक्रधरोदयनिदानतया भृशमनवमेऽपि नवमे मासि सैषा लक्ष्मीनिर्विशेषा त्रिभुवनपतियोषा हरिहयहरिदिव पूर्वमहीभृन्मनोहराकारा विमलशोभनक्षत्राधिपोदयहेतुश्च यशस्वती देवी, भास्वंतमिव सच्चक्रानंदं कंदलयंतं कमलाधिकपरिपोषं परिस्फुरत्तेजःपरिवेषं धामं-गुरशुभंयुगुणसंपन्ने मुहूर्ते दुरुदुराव्हये योगे मनुकुलकलशजलधिकलानिधिसमुदितनयं तनयं जनयामास ॥

अजायत भुजाश्लिष्टवसुधो यदयं सुतः ॥
ततोऽस्य सार्वभौमत्वं तदा नैमित्तिका जगुः ॥ २६ ॥

---

१ अनवमेपि नवमे इति विरोधः । तत्परिहारश्चायं–न अवमः अनवमः उत्कृष्ट इत्यर्थः।२ हरिहयहरित् । इंद्रदिक् पूर्वदिगित्यर्थः।"हरिहयः स्वाराण्नमुचिसूदनः " इत्यमरः । दिशस्तु ककुभः काष्ठाः आशाश्च हरितश्च ताः। इत्यमरः । ३ उदयपर्वतः पूर्वराजश्च नाभेयनृपः। ४ निर्मलशोभा नक्षत्राधिपदिशा । निर्मलप्रकाशितक्षत्राधिपोदयहेतुः । ५ क्षीरजलधिः ।

सुतेंदुमासाद्य कलानिवासं समेधयंतं कुमुदं चिराय
श्यामा चकाशे सुदती त्रियामा सा पापचक्रव्यथनैकहेतुः।२७

स किल जिनराजः पद्माकर इव सर्वतोभुखसमृद्धिसंपन्नः समुन्निद्रशोभनतामरसहितः सदामरालिसेव्यमानः भ्रमराहितश्च पद्मबंधुनेव प्रौढशोभनखोज्ज्वलपादेन साधुचक्रसंतोषदायिना उदयमुपेयुषा कुमारेण भृशमुल्लास ॥

पितामही च तस्यामू प्रमोदं परमापतुः ॥
यथा सवेलो जलधिरुदये शीतरोचिषः ॥ २८ ॥

पुण्याशीर्वचनारवैर्मृगदृशां भूपालगेहांतरे
सानंदं प्रहतानकध्वनिभरैर्वादित्रघोषैस्तथा ॥
लेखोन्मुक्तसुमावलीमनुपतल्लोलंबकोलाहलैः
शब्दैकार्णवमग्नमेतदभवद्व्यालोललोकत्रयं ॥ २९ ॥

मंदारवनविहारी मंदं मंदं चचार पवमानः ॥
ककुभां जेता जात इति भीत इव प्रतीतादिक्पालः॥३०॥

तदानीं सरभससंचरत्परिजननिकरसंक्षोभसंचलितमहीतला, प्रतिनिकेतनं समुदस्तकेतनपटसंजातमंजुपवनसमानीतकल्पतरुकुसुमोपहारा, गंगातरंगशीकरनिकरद्विगुणितशैत्यसौरभ्यमृगमदजलच्छटासंसिक्तमधुकरनिकरझंकारमनोहारिकुसुमोपहारमंडितरथ्यांगणा, महीपतिनिवेदनसंभ्रमसंचर-

---

१ कैरवं पक्षे भूमिजनसंतोषकः। २ शोभन—तामरस—हितः पक्षे शोभनतामर—सहितः । ३ सदा—अमरालि सदा मरालि। ४ भ्रमर—हितः भ्रमरहितः । ५ प्रौढशोभ—नखोज्ज्वलपादेन पक्षे प्रौढशोभन—खोज्ज्वलपादेन ॥ प्रौढशोभनाकाशोज्ज्वलकिरणवता इत्यर्थः सूर्य पक्षे ।

वृद्धकंचुकीनिकरपुरःसरपरिवारजननिर्दयसंमर्दनिपतितकुब्जवामनवर्षधरनिकुरंबा लंबमानकूर्चबिंबविस्रस्तांतरीयवृद्धधात्रीजनपरिकलितनर्तननिरीक्षणजनितपुरजनहास्यरसा, युगपत्तरंगितमंगलसंगीतसंगतानेकमानकध्वानुगतलीलालास्यप्रसक्तकामिनीजनकमनीया साकेतपुरी वेलातीतपौरजनप्रमोदा अजायत ॥

तदानीं क्षोणीशे वितरति बहूनर्थनिवहान् ॥
सुरद्रुव्यूहो द्रागहह दिवि पंचत्वमभजत ॥
तथा चिंताश्मत्वं सुरमणिरवाप प्रकृतितो
जगाहे स्वर्धेनुः सपदि शतमन्युं दृढतरं ॥ ३१ ॥

तदनु नाभिराजकच्छमहाकच्छभूपालाः संमिलितास्तस्य कुमारस्य जातकर्मोत्सवं विधाय, निधाय च निजांके भाविसकलभरताधिपस्यास्य भरत इति नामधेयं प्रकटयामासुः ॥

तन्नाम्ना भारतं वर्षमितीहासीज्जनास्पदं ॥
हिमाद्रेरासमुद्राच्च क्षेत्रं चक्रभृतामिदं ॥ ३२ ॥
पुत्रोऽयं तनुकांतिनिर्मलजलः श्रीकुंतलालिव्रज—
व्याप्तः पादकरास्यशोणकमलो बाहामृणालद्युतिः ॥
राज्यश्रीहृदयंगमप्रविलसत्संवासपद्माकरः ॥
सामोदः समभूच्चिरं मनुकुलक्षीराब्धिमध्ये ध्रुवम्॥३३॥

स किल भरतकुमारो बंधुजनकरकमलाविहारकेलिकलहंसः सकलगुरुजननयनेंदीवरानंदशारचंद्रः सुंदरमन्मनहासितमन्मनालापलसितमणि-

---

१ मरणत्वं, पंचसंख्यात्वं च । २ चिंतया पाषाणत्वं चिंतामणित्वं च । ३ शतदुःखत्वं, इंद्रं च । "मन्युर्दैन्ये क्रतौ क्रोधे वासवे तु शतात्परः' इति विश्वलोचनः ।

कुट्टिमचंक्रमणादिभिः पित्रोरानंदं कंदलयामास ॥

कंठे मंजुलकुंजरारिनखरव्याबद्धमुक्तामणी—
माला धैर्यगुणश्रियः प्रविचलद्दोलायमानां दधत् ॥
चिक्रीड क्षितिपालबालककुलैर्व्यालोलसत्कुंडलः ॥
सानंदं पुरुनंदनो मनुकुलप्राच्याचलाहस्करः ॥३४॥

तदनु मनुकुलतिलकोऽयं बालको लोकयात्रावर्तनतत्परेण पुरुपरमेश्वरेण परिकालितान्नप्राशनचौलोपनयादिक्रमः, सवयोभिर्नरेंद्रनंदनैः सह प्रकटितपांसुविहारः, कुरंगमदकर्दमसंपादितरेखागंडितगंडमंडलः, कुंकुमपांसुपटलसांद्रामिंदूरितमस्तकः, कदाचिन्मदांधसिंधुरमारुह्य सहर्षमधिरूढौपवाह्यैरन्यैर्वयस्यैः सह प्रमदवनं प्रति प्रतिष्ठमानः, कुंचिताग्रतर्जनीनिशितांकुशः प्रविश्य च तद्वनं तत्र विचित्रकृतकाचलतुंगतमशृंगेषु व्यापारिततद्गजः, कोमलकदलीकाननेषु संभ्रमसमुत्पाटितरंभातरुगुंभं कुंभीन्द्रं संचारयन्, गंभीरतरविमलदीर्घिकासलिलेषु संप्लावयन्, विकचकमलकुलशोभितकमलाकरे सरोजवननिर्मूलनप्रचंडशुंडादंडं शुंडालमखंडं संक्रीडयन् , उद्दंडपुंडरीकषंडप्रकल्पितधवलातपत्रशुभ्रतरादभ्रमृदुलतंतुसंतानदंतुरितचामरनिकरः, समुल्लसदशोकपल्लवपरिकल्पितविजयवैजयंतीविसरः, पठनपटुबालकबंदिसंदोहजयजयानंदकोलाहलमुखरितदिगंतरः नृपभवनमवजगाहे ॥

शरीरवल्लीकुसुमायमानं तारुण्यमेतस्य ततो जजृंभे ॥
सौंदर्यलक्ष्मीविनिवासभूमेः सुवर्णखंडस्य यथा सुगंधः ॥३५॥

पितुर्यादृक् तादृक् ललितगमनं सैव च तनुः ॥

---

१ मनुकुलोदयाद्रिदिनमणिः ।

कला लीला सैव स्मितमपि तदेव द्युतिरपि ॥
वचः शीलं तद्वन्मधुरमिति सर्वेऽपि सुगुणाः ॥
तथैव प्रोद्भूताः न तु गुणविशेषो व्यलसत ॥ ३६ ॥

अयं खलु मनुकुलपूर्वाचलद्युमणिर्भूपालतनयचूडामणिर्मदन इति मानिनीभिः, सुरतरुरिति वनीपकजनैर्वैवस्वत इति विद्विषिगणैः, कलासदनमिति कोविदैर्गंधर्व इति गायकैः, स्नेह इति धनैः, अनाश्रयणीय इति दोषैः, दुर्ग्रहचित्तवृत्तिरिति चित्तभुवा, स्त्रीपर इति सरस्वत्या, जनक इति कीर्त्या, पतिरिति लक्ष्म्या, षंढ इति परकलत्रैर्जगत्पालक इति प्रजाभिरगृह्यत ॥

मनुकुलवारिजादिनकर भरतगुणाब्धिर्हि कुशलिमंकरोऽयं ॥
नक्रंदयते कमपि च तद्युक्तं भंगेरहित इति चित्रं ॥३७॥
नरजन्या लसमानो नखोज्ज्वलोऽयं तथापि भरत इति ॥
राजेति च प्रसिद्धिं गत इति चित्तेऽपि नृत्यति विचित्रं ॥३८॥

तदनु यः किल वज्रजंघभवे पुरोहितानंदनस्ततोऽधोग्रैवेयकाहमिंद्रपीठः सर्वार्थसिद्धाहमिंद्रश्च बभूव स खलु यशस्वत्यां वृषभसेननाम तनूजोऽजायत ॥

---

१ यमः २ कुशलिम–करः क्षेमंकर इत्यर्थः । कुशलि–मकरः ३ नक्रं दयते मकरजंतुं पालयति पक्षे न क्रंदयते न दुःखयति इति भावः ।४ भंगः कल्लोलः विनाशश्च।' भंगस्तरंगरुग्भेदे दंभे जय विपर्यये इति विश्वलोचनः।५ नरजन्या मनुष्यजन्मना 'जनिरुत्पत्तिरुद्भवः' इत्यमरः पक्षे न रजन्या लसमानः। निशया शोभमानो न ।६ नखोज्ज्वलः नखैरुज्ज्वलः । पक्षे न खोज्ज्वलः नभसि न उज्ज्वलः इति भावः । ७ भरतः भेषु नक्षत्रेषु रतः आसक्तः । भरत इति–नाम्ना युक्तः । ८ राजा नृपतिश्चंद्रश्च ॥

श्रेष्ठो धनमित्रोप्यधोग्रैवेयकाहमिंद्रो महापीठः सर्वार्थसिद्धाहमिंद्रश्च सोयमधुनानंतविजयो नाम तनयो बभूव ॥

शार्दूलार्यश्च चित्रांगददेवो वरदत्तनृपोऽच्युतसामानिको विजयनृपश्च भूत्वा सर्वार्थसिद्ध्यहमिंद्रःसोयमनंतवीर्यो नाम तनयोऽजायत ॥

वराहार्यश्च मणिकुंडलामरो वरसेनभूपालोऽच्युतसामानिको वैजयंतनृपश्च भूत्वा सर्वार्थसिद्ध्यहमिंद्रः सोऽयमच्युतनाम सूनुरजायत ॥

वानरार्यश्च मनोहरादिविजश्चित्रांगदभूपालोऽच्युतसामानिको जयंतमहीपतिश्च भूत्वा सर्वार्थसिद्धौ संजातोऽहमिंद्रो वीरनामा तनूभवो बभूव ।

नकुलार्यश्च मनोरथदिविजः शांतमदनमहीकांतोऽच्युतसामानिकोऽपराजितनृपश्च भूत्वा सर्वार्थसिद्धौ संजातोऽहमिंद्रो वरवीराभिधानः सूनुः समजायत ॥

इत्येकोनशतं पुत्रा यशस्वत्या जिनेश्वरात् ॥
भरतस्यानुजन्मानो बभूवुश्चरमांगकाः ॥३९॥

ब्राह्मीं तनूजामतिसुंदरांगीं । ब्रह्माथ तस्यामुदपादयत्सः ॥
कलानिधेःपूर्णकलां मनोज्ञां । प्राच्यां दिशायामिव शुक्लपक्षः॥४०

पूर्वोक्तवज्रजंघसेनानायकोऽकंपनश्चाधोग्रैवेयकाहमिंद्रो महाबाहुमहीपतिश्च भूत्वा सर्वार्थसिद्धौ संजातोऽहमिंद्रो मृगेंद्र इव कंदरागर्भं सुनंदागर्भमाविवेश ॥

व्यपगतवलिभंगं संप्रवृद्धं मृगाक्ष्याः ।
सुभगमुदरदेशं वीक्ष्य सद्वृत्तरूपौ ॥
बत सुरुचिरमुक्ताद्भुतशोभां दधाना–।
वपि मलिनमुखत्वं प्रापतुर्द्रागुरोजौ ॥४१॥

सा किल विशालाक्षी दिशावशावल्लभसकाशकरेणुराजकालितसमराविलोकनविलासमतिकौतुकेन विलोकमाना नानाविधमल्लजनानियुद्धकेलिकथामेव शुश्रूषंती क्रमेण नवमासेषु अतीतेषु बाहुबलिसमाव्हयं तनयं जनयामास ॥

विनृत्यद्वारस्त्रीचरणविरणन्नूपुररवै
स्तथा भेरीध्वानैः पटुदलितदिग्भित्तिपटलैः ॥
परीतं साकेतं पुरमभवदुत्तोरणकुलं ॥
समुद्भूते पुत्रे विमलपटकेतुप्रघटितम् ॥ ४२ ॥
वज्रजंघभवे यास्य भगिन्यासीदनुंदरी ॥
सा सुंदरीत्यभूत्पुत्री वृषभस्यातिसुंदरी ॥ ४३ ॥
स्वर्णस्फुरत्सरोजाश्रियं वितन्वंतमुदितमभ्रामितं ॥
रविमिव विभया प्राची पुतं पुत्र्या सहाभजत्सैषा ॥४४॥
तत्कालकामदेवं तारुण्यश्रीमनोहराकारं ॥
को वर्णयितुं शक्तो भुजबालिनं तं त्रिलोकरमणीयं ॥४५॥

यस्य च चंचरीकसंचयधिक्कारिणी कुंतलराजी, राजीवसुहृद्वदनप्रभा, प्रभाकरनिभकुंडलर्महो, महोत्पलच्छाविर्नयनलक्ष्मीः, लक्ष्मीनिकेतनं वक्षोवलयं, वलयाविलसितं करयुगलं, गलविलसिता मुक्तावली, वलिलयभासुरं सुभगोदरं, दरहसिततुलितमिंदुबिंबं, बिंबसहोदरमधरपल्लवं, पल्लवकोमलं पादयुगं, युगायतो भुजाविलासो, विलासवतीमनोहरा तनुलतेति ॥

१ गजराजः २ सुवर्णनिर्मितविकसितकमलकांतिं । पक्षे जले प्रकाशितकमलशोभां ।३ आकाशगतं, भ्रान्तिरहितं च ।४ कान्त्या । ५ महस्तेजः।

यस्य च बलोद्दंडो भुजदंडः पराक्रमलक्ष्मीपर्यंक इव, राज्यलक्ष्म्या उपधानखंड इव, प्रकृतिजनानामालंबन दंड इव, शत्रुबलजलधेर्मंथानदंड इव, कीर्तिलक्ष्म्याः केतुदंड इव, जयश्रीलतायाः उपघ्नदंड इव च व्यराजत ॥

धातुः शिल्पादिरम्यप्रकटनातिलकस्थानमेनं सुरूपं ।
यं दृष्ट्वा सारसाक्ष्यो रजनिकरशिलापुत्रिकावद्द्रुताः स्युः॥
शत्रुक्षोणीधुरीणा जगति सुविदिता ये तुसंग्रामसिंहाः॥
ते सर्वे ग्रामसिंहाःसपदि समभवन्संपदं संत्यजंतः ॥४६॥

एकोत्तरं शतमिमे मधुराः कुमाराः
कांत्या गुणेन विभवेन च तुल्यरूपाः ॥
ते यौवनेन भरतप्रमुखा विरेजुर्वन्या
मनोहरमदेन यथा द्विपेन्द्राः ॥ ४७ ॥

भूपा रत्नमणीघृणिप्रसरणव्याप्ताखिलाशांतराः ॥
कांत्या कोमलया जितासमशराः कारुण्यवाराकराः॥
गांभीर्येण पयोनिधिं स्थिरतया भूमिं माहिम्ना कुल—
क्षोणीध्रानतुकुर्वते स्म त इमे दानेन कल्पद्रुमान् ॥४८॥
इत्यर्हद्दासकृतौ पुरुदेवचंपूप्रबंधे षष्ठः स्तबकः ॥

---

१ श्वानः । २ जितमदनाः । ३ दयाजलधयः । ४ पर्वतान् ।

सप्तमः स्तबकः ।

अथ जातुचिदमरकुमारकरपल्लवानिलोलचामरविधूननजनितमंदगंधवहांदोलितविमलदुकूलांचलः, त्रिदशवंदिसंदोहसंस्तूयमानगर्भावतरणजन्माभिषवणप्रमुखनिसर्गमाहिमाकर्णनसमुदीर्णलज्जया किंचिदवनतवदनसरोरुहः, संततसमवनतदिविजमनुजविद्याधरव्रजमुकुटतटघटितमणिमरीचिपुंजपिंजरितोत्तुंगसिंहासनमलंकुर्वाणो वृषभेश्वरः सकलहृद्यतमविद्योपदेशाय मतिं व्यापारयामास ॥

उद्भिन्नस्तनकुड्मले मृदुरणत्कांचीकलापांचिते ॥
सिंजन्मंजुलनूपुरेद्धचरणन्यासे चकोरेक्षणे ॥
कांतिं कांचनरेणुराजिसदृशीमंगैः किरंत्यौ पुरो ॥
ब्राह्मी संसदि सुंदरी च त इमे प्राप्ते समीपं गुरोः ॥ १ ॥

ते किल बाल्यादनंतरे वयसि वर्तमाने विहारसदने मेधाविलासिन्याश्चंद्रिके विनयांबुधेः, कुलसदने शीलसंपदां, सीमाभूते सौंदर्यस्य, सकलमानवतीजननर्तनपात्रे मृदुकोमलपादविन्यासेन पुरतःप्रकीर्णरक्तांबुजोपहारश्रियं व्यातन्वाने, नखमणिदर्पणसंक्रांतनिजतनुलताच्छायाच्छलेन रूपसंपदा विनिर्जितं पादमुपाश्रितं दिक्कुमारीनिकरमिव दर्शयन्त्यौ, मदनसदनाग्रभागप्रसरद्धूपधूमरेखामिव नाभिनिपानावतरणार्थमिंद्रनीलमणिखचितसोपानपरंपरामिव, अगाधतरनाभिकूपखनन-

---

१ श्रीवृषभेश्वरस्य निजजनकस्य । २ नवनं स्तुतिः । ३ कूपः ।

श्रांतेन वेधसा तन्निकटे क्षिप्तां खननशलाकामिव[1] रोमराजिलतां बिभ्राणे, सद्भूपतिसभासन्निवेशमिव, सुमनोजनवादरणस्थानमिव[2], पद्माकरमिव सद्यस्तनकुड्मलशोभितं[3], सुरेंद्रनंदनवनमिव सुरतरुचिरलीलास्पदं[4] मंजुलकुचोज्ज्वलं[5] च, मुक्तिप्रदेशमिव मुक्ताधिकशोभांचितं[6] वक्षस्थलं दधाने, पूर्वाचलमिवारुणबिंबप्रकाशं, मरुमार्गमिव विद्रुमच्छायं[7], बंधुजीवप्रमोहरमपि अधिकारुण्यं[8] वहंतं, सुरागमप्यधरमुद्वहन्त्यौ[9], कंदर्पजैत्रास्त्र इव नेत्रे पुरो व्यापारयन्त्यौ, लोलालकप्रतिबिंबसंगताभ्यां कपोलाभ्यां सकलंकस्य सुधाकरस्य लक्ष्मीं न्हेपयन्त्यौ, चिकुरनिकर रुचिरेण वदनेन शैवलपटलपरिवृतं पंफुल्यमानपयोजं प्रावृषेण्यपयोवाहव्यूहविराजितं राकासुधाकरं च तुलयन्त्यौ, मालाजालकलितेन कबरीभरेण गंगातरंगसंगतं कालिंदीप्रवाहं स्मारयन्त्यौ ब्रह्मसुंदर्यौ सप्रश्रयं समीपमुपाश्रित्य जगन्नाथं नमश्चक्रतुः ॥

उत्थाप्य वेगात्प्रणते सुते ते स्वांकं समारोप्य च कौतुकेन ॥

---

१ अयःशलाका (पहार इति महाराष्ट्रभाषायां) २ सुमनोजन—वाद—रणस्थानं विद्वज्जनवादयुद्धस्थलं। पक्षे सुमनोज—नवादरण—स्थानं मदनप्रीतिकरस्थानं। ३ तत्कालीनकलिकाशोभितं पक्षे नवोद्भिन्नकुचविराजितं। ४ सुरतरु—चिरलीलास्पदं। पक्षे सुरत—रुचिरलीलास्पदं। कल्पवृक्षलीलास्थानं रतिमनोहरक्रीडास्थानं चेति भावः। ५ मंजुल—कुचोज्ज्वलं, मंजु—लकुचोज्ज्वलं। मनोहरस्तनोज्ज्वलं, मनोज्ञलकुचवृक्षोज्ज्वलं च 'लकुचो लिकुचो डहुः' इत्यमरः॥ ६ मुक्ताफलाधिकशोभायुक्तं सिद्धजीवशोभांचितं च॥ ७ विगतद्रुमच्छायं विद्रुममणिच्छायं च ॥ ८ बंधुजनप्राणनाशनमपि अधिककारुण्यं इति विरोधः। पुष्पविशेषकांतिहरणमपि अधिकं अरुणं। ९ सुरागमप्यधरं इति विरोधः सुष्ठु आरक्तं अधरोष्ठं॥

स्पृष्ट्वा कराभ्यां मुहुरुत्सुकोऽयं लोकेश्वरो मूर्धनि जिघ्राति स्म।२।
तदनु तयोर्विनयशीलादिकं विलोक्य जगद्गुरुर्विद्यास्वीकारणकालोऽयं इति मत्वा ब्राह्मीसुंदरीभ्यां सिद्धमातृकोपदेशपुरःसरं गणितं स्वयंभुवाभिधानानि पदविद्याछंदोविचित्यलंकारशास्त्राणि च अर्थशास्त्रं भरतशास्त्रं भरताय वृषभसेनाय गांधर्वं, अनंतविजयाय चित्रकलाशास्त्रं वास्तुविद्यां च, भुजबलितनयाय कामतंत्रसामुद्रिकायुर्वेदधनुर्वेदहस्त्यश्वतंत्ररत्नपरीक्षादीनि, अन्येभ्यश्च यथोचितं लोकोपकारकशास्त्राण्युपदिदेश ॥

सुतैरधीतानिःशेषविद्यैरद्युतदीशिता ॥
किरणैरिव तिग्मांशुरासादितशरद्युतिः ॥ ३ ॥
पुत्रैःकलत्रैश्च महापवित्रैर्वृतस्य नित्यं वृषभेश्वरस्य ॥
कालो व्यतीयाय महान् क्रमेण मनोहरैर्मंगलदिव्यभोगैः॥४॥

अत्रांतरे कालवैभवकृतेन महौषधिदीप्तौषधिप्रमुखसर्वौषधिशक्तिप्रक्षयेण नरनिकररक्षणविचक्षणानामकृष्टपच्यानां सस्यानां विरलीभावेन लोकोत्तरपादपानां रसवीर्यविपाकप्रहाणेन जीवनशंकातंककलंकितमनोवृत्तयः प्रकृतयो नाभिराजाज्ञया सनातनं पुरुषमासाद्य सविनयमेवं विज्ञापयामासुः ॥

त्रिभुवनपते ! श्रीमन् ! स्वामिन् ! दयागुणशेवधे ! ॥
वयमतिभयाद्युष्मत्पादांबुजं शरणं गताः ॥
तदुचिततमां वृत्तिं व्यावेद्य रक्ष भवत्प्रजाः ॥
तरुततिरियं नष्टा सस्यानि नैव फलन्ति च ॥ ५ ॥
पिपासा क्षुद्बाधा तरलयति चित्तं प्रतिदिनं ॥

निराहाराणां नात्रिभुवनपते ! त्राहि दयया ॥
तथा जाता बाधा घनपवनवर्षातपमुखैः ॥
निराधारानस्मान्निरवधि दुनोत्याकुलयाति ॥६॥
ततोऽस्माकं यथाद्य स्याज्जीविका निरुपद्रवा ॥
तथोपदेष्टुमुद्योगं कुरु देव ! प्रसीद नः ॥ ७ ॥

इति प्रजानां विज्ञापनशैलीं निशम्य विशालतरकरुणात्रिभुवनरमणः पूर्वापराविदेहेष्विव ग्रामारामनगरादीनि च षट्कर्माणि प्रकृतीविताति-जीवनाय व्यवस्थापनीयानि इति निश्चित्य समाश्वास्य च मुहुःप्रजानिकरं मा भैष्टेति गिरा सुराधिपस्य सस्मार। अथ तदनुध्यानमात्रेणागतः सकलसुरानिकरपरिवृतः वृत्राहितस्तत्पादपंकजं निजमुकुटमणिमरीचिमंजर्या पिंजरीकुर्वाणस्तदाज्ञावशेन शुभे मुहूर्ते तस्यायोध्यापुरस्य मध्ये महादिक्षु च रुचिविजितसुरमंदिराणि जिनमंदिराणि निर्माय देवमातृका साधारणानूपजांगलभेदानन्तपालपालितदुर्गपरिवृतान्लुब्धकारण्यचर

पुलिंदशबरादिपरीक्षितांतरालप्रदेशान्, काशीकोसलकालिंगवंग-करहाटककर्नाटचोलकेरलमालवमहाराष्ट्रसौराष्ट्रवनपासिद्राचिरांध्रकांभो-जबाल्हिकतुरुष्ककेदारसौवीरमोरचेरकेकयशूरसेनापरांतिकविदेहासिंधु—गंधारकुरुजांगलविदर्भवत्सावंतीवनभेदपल्लवदशार्णकच्छमहाकच्छ——मगधरम्यकाश्मीरिकुरुसौभद्रकादिविविधविषयान् तज्जनपदमध्यभागेषु परिखावप्रपाकारगोपुराट्टालकालंकृतानि नानाविधनगराणि च ग्रामपुरखेटकर्वटादिकं च परिकल्पयामास ॥

पुराणि परिकल्पयन्नमुचिसूदनः सार्थकं

---

१ वृषबंधुपालितो देशः । २ जलप्रायमनूपं स्यात् ॥३ निर्वारिदेशो जांगलः

पुरंदरसमाव्हयं दधदयं विभोः शासनात् ॥
यथोचितपदेषु ता भुवि निवेश्य सर्वाः प्रजाः ॥
त्रिविष्टपमुपासदन्निखिललेखवर्गैः समं ॥ ८ ॥
सृष्ट्वा क्षत्रियवैश्यशूद्राविदितं वर्णत्रयं स प्रभुः ॥
वृत्तिं चास्य तथा यथार्हमकरोत्षट्कर्मसंपादितां ॥
तामाज्ञां त्रिजगद्गुरोर्हिततमां मूर्ध्ना दधानाः प्रजाः ॥
प्रापुः क्षेमपरंपरामतितरां निर्विघ्नमुर्वीतले ॥ ९ ॥
युगादिब्रह्मणा तेन यदित्थं स कृतो युगः ॥
ततः कृतयुगं नाम्ना तं पुराणविदो विदुः ॥ १० ॥
आदीशस्य विधातुमुत्सुकमना राज्याभिषेकोत्सवं ॥
स्फूर्जत्तूर्यविरावपूरमुखरव्योमावकाशस्ततः ॥
व्यावल्गन्मणिभूषणद्युतिझरीनिर्धूतभानुप्रभैः ॥
देवैः साकमवातरत्रिदिवतो गोत्रार्हितः सोत्सवं ॥११॥

ततः परं नाकराजो[1] नाभिराजादिपरिवृतास्त्रिभुवनगुरुपट्टाभिषेकाय त्वरमाणः, शुभे मुहूर्ते सुरशिल्पिजनकल्पिते, मंजुलसुरभिमृत्स्नाविरचितवेदिकाविराजमाने, चंचत्पंचरत्नचूर्णविरचितरंगवल्लीविराजितसुनाशीरशरासने, व्यामुक्तमुक्ताफलशोभमानाविरचितावितानाचित्रच्छायाछुरितसुंदरपुरंदरमाणिकुट्टिमबंधुरतया विडंबिते, संध्यारागरंजितसौदामिनीसंगीतनीलजलधरपटले, विविधोपकरणसमुद्धरणनियमितानेकनाककामिनीनिरुद्धसंचारमार्गे, संचरत्पौरविलासिनीललितमृदुलपदन्यासमंजुगुंजन्मंजीरमनोहरझंकारप्रवर्धमानकोलाहले, पारावार

१ इंद्रः ।

इव परिशोभितरंगे सर्वतोमुखसमृद्धे कुशालिमकरे च,: पद्माकर इव विकस्वरशोभनतामरसाहिते कमलाकरे च, नंदनवन इव सुरागशोभिते तालमनोहरे मधुराप्सरःकलशोभिते च नृपभवनमध्यलसमानाभिषेकमंडपे सुरवारवनिताकरपल्लवविधूयमानचारुचामरसमीरांदोलितप्रलंबमानमंदारमालांचितं देवं भुवनपतिं हरिविष्टरे प्राङ्मुखं विनिवेशयामास॥

तत्रानंदाद्भिभुवनपतिं विष्टरे तस्थिवांसं ।
गंगासिंधुप्रमुखसलिलैरभ्यषिंचन्सुरेशाः ॥
भूपा नाभिक्षितिपतिमुखाः पौरवर्गाश्च भर्तुः ।
तीर्थोपात्तैः सुरभिसलिलैस्तेऽभिषेकं वितेनुः ॥१२॥

तदनु हैमस्नानजलकुंडे कृतावगाहनस्त्रिभुवनकमनः कुंकुमारुणपयोधरैररुणप्रभाधरपल्लवशोभितमुखभागैः कोमलमधुकरसंगतैः कलधौतरुचिरुचिरैः कामिनीजनैः कनककलशैश्च स्नापितः कृतनीराजनश्चात्मवत्कल्याणगुणं वसनं परिधाय, सरसमुकुरमवलोक्य भद्रश्रीरुच्यातिकलितं चंदनं च धृत्वा, सद्वृत्तरत्नमंडितैःसदाखंडलसमप्रभाविराजितैर्मुक्तामयैर्नवपुष्परागैः त्रिदशजनैर्भूषणगणैश्च भूषितः ।। स्वात्मानमिव सुपर्वांचितं सुरुचिरमणीमनोहरं च नाभिराजार्पितं मौलिं शिरसि निदधानो राज-

१ शोभ—नत—अमरसहिते, शोभन—तामरसहिते सुंदरकमलसहितकरे इति भावः । २ सुरागः कल्पतरुः । शोभनरागोपेतं गायनं । ३ तालवृक्षमनोहरे, तालः कालक्रियामानं । ४ मंगलगुणं, सुवर्णमयतंतुयुक्तं । ५ सच्चरित्ररत्नमंडितैः वर्तुलरत्नमंडितैश्च । ६ इंद्रः अखंड—कमलप्रभा । ७ मुक्ताफलसंपन्नैः, रोगरहितैश्च । ८ न वपुषि अरागैः, नवपुष्परागैः । ९ सुपर्वाभिः शिखरैरंचितं युक्तं पक्षे देवयुक्तं । १० सुरुचि—रमणीमनोहरं, सुरुचिर—मणीमनोहरं ॥

ताभ्युदयाकरेण नाभिराजकरेण पट्टबंधेन च बंधितललाटतटः परं विरराज ॥

तदानीं उदारवचनमकरंदाः सुबंदिन इत्थं पठन्ति स्म ॥

देव! त्वं लोकसेव्यः प्रकृतिविलसने कोविदो मुक्तलोभः ॥
भ्राजत्अंगैः कलार्हैररिलयनियतः कीलसंकाशवीर्यः ॥ १३ ॥
रामालास्यप्रकारप्रकटितहृदयः सत्सभालापयोग्यः
तद्वल्लोकाधिनाथ! स्फुरति तव रिपुर्लेश एवास्ति भेदः ॥१४॥
मंता सत्कार्यभूम्नां शुभकररमितस्त्वं दयोद्दामशीलो ।
मीनांकश्लध्यदेहो मितरहितयशाः मानिभिः सेवितश्रीः ॥
प्रज्ञावद्भिः प्रमेयः प्रतिमतकुशलः प्राप्तसाम्यो न कश्चित् ।
लोकेश! त्वत्सपत्नो न खलु तव समो मोहमाप्नोति विश्वक्॥१५
देव! त्वं काशपुष्पस्तबकनिभयशा गोविशालोत्सवाढ्यः ।
दानैकायत्तचित्तो रिपुजनवितते: शासने धीरधीरः ॥

१ प्रजारंजने । २ विद्वान् । ३ अस्मिन् श्लोके लकाराः शकारीभवन्ति यदा तदा शत्रुवर्णनं जायते । यथा, शोकसेव्यः, प्रकृतिविशसने, मुक्तशोभः, कशार्हैः, अरिशयनियतः, कीशसंकाशवीर्यः—कपिसमानवीर्यः । वृषभजिनपक्षे कीलसंकाशवीर्यः अयःशलाकासदृशवीर्यः, रामाशास्यप्रकारप्रकटितहृदयः ४ अस्मिन् श्लोके मकारस्थाने हकारे कृते सति शत्रुवर्णनं भवति । यथा हंता, शुभकररहितः, दयोद्दाहशीलः, हीनांकश्लाघ्यदेहः, मीनांकश्लध्यदेहः मीनांको मदनः । हितरहितयशाः, हानिभिः, प्रहेयः, प्रतिहतकुशलः, प्राप्तसाह्यो, ५ दर्भपुष्पसदृशकीर्तिः शत्रुपक्षे प्रतिपदमाकारो योज्यः । आकाशपुष्पस्तवकानिभयशाः ६ गो भूमिः शत्रुपक्षे आगोविशालोत्सवाढ्यः ७ आदानैकायत्तचित्तः शत्रुपक्षे, ८ शत्रुपक्षे आशासने ।

भासेद्धर्द्धिर्मयाहो भुवि लयरहितो धीद्धवृत्तिर्धरेण ।
युक्तस्त्वद्वत्कथं स्याद्रिपुरमरनुत! प्राग्भजत्यापदं सः ॥१५॥

किं च देवः खलु करोदितबलविभवः कविगीतयशाः करिमिलितदिः गंतरः कमलविलसितनयनयुगः कोपक्रियाविरहितः कांतोपलालितहर्षः कामाभतनुलतः कार्तस्वरपात्रविचित्रसदनः कर्णसंयोजितमहार्घभूषण- कार्याचिंताधुरीणमानसः कवनयोग्यपवित्रचारित्रः कार्यसमापनतत्परः कामितविभवत्यागी कासारविराजितभवनप्रदेशः करेणुवृंदस्थपुटितमं- दिरद्वारदेशः काननस्थापितपरतृणः कालवालजलदस्तवरिपुस्तु पूर्वकान् रक्षतीति कथं तव कक्षां गाहते इति ॥

ततः सानंदमानंदनाटकं कुलिशायुधः ॥
प्रयुज्यास्थायिकारंगे मत्यर्गोद्गां सुरैः सह ॥ १७ ॥

---

१ मया लक्ष्म्या । शत्रुपक्षे आमयातो रोगेण प्राप्तः । २ शत्रुपक्षे आलयरहितो । ३ आधीद्धवृत्तिः 'आधिर्ना मानसी व्यथेत्यमरः, ४ अस्मिन्गद्ये प्रतिशब्दं ककाराः सन्ति तेषां परित्यागेन शत्रुवर्णनं भवति तद्यथा—रोदितबलाविभवः, विगीतयशः परिमिलितदिगंतरः मलविल- सितनयनयुगः इत्यादिकं । ५निंदितयशाः इति शत्रुपक्षे। ६ उपक्रिया उपकारः। ७ अंतस्य यमस्य उपलालितो हर्षो येन सः ८ अमाभतनुलतः अशोभत- नुवल्लिः ! ९ कार्तस्वरं सुवर्णं शत्रुपक्षे आर्तस्वरयोग्यं चित्रविहीनं सदनं यस्य सः। १० ऋणेन संयोजितामूल्यालंकारः। ११रणेति। १२ कवनं स्तुतिः वनं अरण्यं च । १३ कार्यसमापने आसक्तः शत्रुपक्षे आर्यजननाशे तत्परः । १४ कामितं इष्टं, पक्षे अमितं । १५ कासारोल्पसरः पक्षे आसारः धारा- संपातः । १६ करेणुर्गजः शत्रुपक्षे रेणुर्धूलिः । १७ काननं वनं पक्षे आननं मुखं मुखस्थापितोत्कृष्टतृणो रिपुः । १८ गां स्वर्गं ।

अथ स मुकुटबद्धप्रोल्लसन्मौक्तिमाला-
मसृणितनरवराजीराजितो विश्वस्रष्टा ॥
विधृतसकलभारो नाभिराजोपकंठे ।
प्रकृतिनिचयरक्षायत्नमित्थं चकार ॥ १८ ॥

तदानीं त्रिभुवनपतिः शस्त्रशोभितभुजेन स्वात्मना सृष्टानां क्षतत्रा-णधुरीणानां क्षत्रियाणां प्रजापालनशरणागतरक्षणादिकं, ऊरुभ्यां यात्रां प्रदर्श्य सृष्टानां वैश्यानां जलस्थलयात्राप्रवृत्तिं, पादाभ्यां सृष्टानां शूद्राणां वर्णोत्तमशुश्रूषां च यथार्हमुपदिश्य तद्वृत्तेरनतिक्रमाय दंडमेवोद्दंडसाधनं मन्यमानः, चतुःसहस्रमुकुटबद्धपरिवृत्तान्सोमप्रभहर्यकंपनकाश्यपनामधेयान्महामंडलीकान्नरपालान्मूर्धाभिषिक्तान्दंडधरान्विधाय सोमप्रभस्य कुरुराजाभिधानं कुरुवंशाग्रगण्यतां च, हरेश्च हरिकांतसमाह्वयं हरिवंशातिलकतां च, अकंपनस्य पुनः श्रीधरनामधेयं नाथवंशमुक्तालतां च, काश्यपस्य मघवाह्वयं उग्रवंशललामतां च प्रथयांचकार ॥

प्रभुः कच्छमहाकच्छप्रमुखान्वसुधापतीन् ॥
स्वाधिराजपदे देवः स्थापयामास सत्कृतान् ॥ १९ ॥

तदनु पुत्रानपि विचित्रवस्तुवाहनसंपदा संयोजयन्नयमादिदेवः सकलनराणामिक्षुरससंग्रहणघटनेनेक्ष्वाकुरिति, प्रजाजीवनोपायकल्पनेन प्रजापतिरिति, निजकुलोद्धरणेन कुलधर इति, काश्यपदवाच्यतेजःपरिपालनेन काश्यप इति, कृतयुगप्रारंभस्य आदिभूतत्वेन आदिब्रह्मेत्यादिनामधेयानि निखिलजनकर्णरसायनानि प्रकटयामास ॥

नाकाधीश्वरमौलिमौक्तिकमणीतारावलीसेवित—
मोद्यत्पादनखेंदुबिंबविततिर्लोकत्रयाधीश्वरः ॥
दिव्यस्रग्मणिभूषणांबरधरः साकेतसिंहासना—
रूढः पुत्रकलत्रमित्रसहितः शास्ति स्म विश्वंभरां ॥२०॥
तदा देवे पृथ्वीमवति घनसंपत्तिरभवत्[1] ।
न वारिप्राचुर्यं[2] तदपि भुवनेषु क्वचिदभूत् ॥
भयेभ्यः स्वं त्रातर्यपि महितनीतिज्ञचतुरो—
प्यनीतिः[3] पौरोऽयं समजनि भयाढ्यश्च[4] बत हा ॥२१॥

अथ कदाचन महास्थानमध्ये पूर्वाचलतटमिव पुटकिनीविटं[5] सिंहासनमलंकुर्वन्तं नृपशतपरिवृतं त्रिभुवनपतिमुपासितुमागतेन भर्तुर्विषयेषु विरतिमापादयितुमुद्यतेन पाकाहितेन प्रेरिता प्रक्षीणायुर्दशा नीलांजना नाम सुरनर्तकी सविलासं नटंती सौदामिनीव क्षणाद्दृश्यतामाससाद ॥

तदा सुरेंद्रो रसभंगभीत्या प्रायुंक्त तस्याः सदृशं मनोज्ञं ॥
पात्रांतरं तुल्यविलासवेषं तथापि वेत्ति स्म तदेष देवः॥२२॥
ततोऽस्य चेतसीत्यासीच्चिंता भोगाद्विरज्यतः ।
परां संवेगनिर्वेगभावनां समुपेयुषः ॥ २३ ॥

---

१ विपुलं घनं पक्षे मेघसंपत्तिः ।२ जलप्राचुर्यं पक्षे वा—अरिप्राचुर्यं ।
३ नीतिरहितः पक्षे न ईतयः पीडा यस्य सोऽनीतिः । अतिवृष्टयादिसप्तेतिरहितः । ४ भयाढ्यः भीतियुक्तः पक्षे भया कान्त्या आढ्यः संपन्नः । उपर्युक्तश्लोकाभिप्रायतुल्यो धर्मशर्माभ्युदयेऽपि अष्टादशसर्गस्थः श्लोकोयं अजस्रमासीद्घनसंपदागमो न वारिसंपत्तिरदृश्यत क्वचित् ॥ प्रसह्य रक्षत्यपि नीतिमक्षतामभूदनीतिः सुखभाजनं जनः ॥ भयापहारिण्यपि तत्र सर्वतः को नाम नासीत्प्रभयान्वितः क्षितौ ॥ ५ कमलिनीपातं सूर्यमित्यर्थः ।

वातोद्धूतप्रसरविसरद्दीपतुल्यं शरीरं ।
लक्ष्मीरेषा विकसिततडिद्वल्लरीसंनिकाशा ॥
संध्यारागप्रतिममुदितं यौवनं चातिलोलं ।
एतत्सौख्यं पुनरिह पयोराशिवीचीविलोलम् ॥ २४ ॥
देवी काचिद्विलासवाद्यावशेन नृत्यंती यन्नीरजाक्षी पुरस्तात् ॥
याता देवादीदृशीं चेदवस्थां को वा लोके संसृतौ निर्व्यपायः२५
विषराशिसमुपजातां लक्ष्मीं तु मंदरागेण ॥
पीयूषवाधिजातां मुग्धाः कलयन्त्यनंदरागकरीं ॥ २६ ॥
नीरक्षीरनयेन यः परिणतो जीवस्य देहाश्चिरा—
दाधारः सुखदुःखयोः स विलयं कालेन संयाति चेत् ॥
बाह्ये पुत्रकलत्रमुख्यविभवे का वा मनीषाजुषा—
मास्था किंतु विमोहचेष्टितमिदं बध्नाति सर्वं जनं ॥२७॥
जंतुः पापवशादवाप्तनरको भुक्त्वातिदुःखं ततः ।
च्युत्वा कालवशेन याति विविधं तैरश्चदुःखं ततः॥
एवं दुःखपरंपरामतितरां भुक्त्वा मनुष्यः पुनः ।
जातश्चेत्स्वहिते मतिं न कुरुते तद्दुःखमात्यांतिकं ॥ २८ ॥

एवं चिंतयंतं मुक्तिलक्ष्म्या संदिष्टाभिः समागताभिस्तत्सखीभिरिव विशुद्धिभिः समाश्रितांतरंगं देवं बोधयितुं सारस्वतादित्यप्रमुखलौकांतिकसुरपंक्तिर्मुकुटमणिघृणिभिर्निरभ्रेऽपि गगने पुरंदरचापलक्ष्मी-

---

१ विषराशिः गरलसमूहः पक्षे विषाणां जलानां राशिः समुद्र इत्यर्थः॥ २ मंदर—अगेन मंदरपर्वतेन पक्षे मंदप्रीत्या। ३ विपुलप्रीतिकरीं पक्षे अ. मंदरागपर्वतकरीं ॥

मंकूरयंती मुकुलीकृतहस्तपल्लवा त्रिभुवनवल्लभमासाद्य प्रणम्य नेमां वाचमुवाच ॥

साधु देव ! हृदि साधु चिंतितं संसृतिप्रकटदुःखभंजनं ॥
येन नाथ!भवतो न केवलं किं तु सर्वजगतां हितं कृतम्॥२९॥
परिनिष्क्रमणस्य काललब्धिस्त्रिजगन्नाथ समीपमागता ते ॥
अनुरक्ततया समागमाय प्रियदूती प्रहिता तपःश्रियेव ॥ ३० ॥

स्वयं सम्यग्ज्ञातात्रिविधहितमार्गोऽसि भगवन् !
न बोध्यो मादृक्षैरिति विदितमेव स्फुटतरम् ॥
अथाप्याचारोऽयं चिरपरिचितो बोधमविधौ ॥
तवाभ्यर्णेप्यस्मान्मुखरयति नाथ! त्रिजगतां ॥ ३१ ॥

धीरसस्य महावृष्टिं तन्वतो जलदस्य ते ॥
प्रियंतां धर्मवृष्ट्याद्य भव्यचातकपोतकाः ॥ ३२ ॥

परीषहभटोद्भटां प्रबलकर्मसेनामिमां ।
विमोहपरिपालितां विमलसत्तपोवैभवात् ॥
सुखेन जगतां पते ! जयतु जातरूपो भवान् ।
भजस्व च सुखोत्तरां विशदमोक्षलक्ष्मीं ततः ॥ ३३ ॥

इति बोधयित्वा कृतार्थेषु लौकांतिकसुरसार्थेषु हंसेष्विव गगनांगणमुत्पतितेषु कंपितविष्टराः पुरंदरपुरःसराः सर्वेऽपि सुराः विलोकनलालस निर्निमेषलोचनं प्रासादविलसमानललनाजनं निजवधूविशंकया विलोकमानाः साकेतपुरं प्रविश्य पुरुदेवस्य पयः पारावा-

---

१ रत्नत्रयरूप आत्महितकरो मोक्षमार्गः । २ शुद्धिरसस्य शुद्धिजलस्येत्यर्थः ।

रनीराभिषेकपुरःसरं परिनिष्क्रमणकल्याणारंभं विजृंभयामासुः॥

ततो देवः श्रीमान्महिवलयसाम्राज्यसरणौ ।
तनूजानामाद्यं भरतमभिषिच्य प्रमदतः ॥
युवाधीशं कृत्वा भुजवलिसुतं कीर्तिसहितं ॥
समस्तैर्भूपालैः सह समतनोदुत्सवकलां ॥ ३४ ॥

वितीर्णराज्यभारस्य विभोर्निजतनूजयोः
परिनिष्क्रमणोद्योगस्तदा जज्ञे निराकुलः ॥ ३५ ॥

तत्रोत्सवंद्वंद्वविजृंभमाणकोलाहलोत्तालदिगंतराले ॥
शेषात्मजेभ्यश्च महीं विभज्य विश्राणयामास विभुः प्रहृष्टः ॥३६॥

तदनु त्रिभुवनपतिः प्रसन्नमतिर्नाभिराजदीनापृच्छय नाकेराजदत्तहस्तावलंबो, दीक्षांगनापोरेष्वगंमंगलशयनायमान यान्ययानमारूढः, सप्तपदानि भुवि भूपालैस्तथा सप्तपदानि नभसि नभश्चरैस्तदनु प्रेमबंधुरैः सुरासुरैश्च निरुह्यमानस्तारापथादापतंत्या दीक्षांगनाकटाक्षधारानुकारिण्या सौरभ्यसमाकृष्टभृंगश्रेण्या पुष्पवृष्टया व्याकीर्णः, सुरवंदिसंदोहपापठ्यमानमंगलारावसंगतप्रस्थानभेरीभांकारेण संसूचितमोहारिविजययात्रः, नभस्थलोड्डीनहंससहस्रशंकाकरैः सुरनिकरव्याधूयमानचामरैर्निर्लिंपकरपंकजविधृतधवलातपत्रेण परिनिष्क्रमणाविलोकनकौतुकसमायातपूर्णेन्दुबिंबप्रतिबिंबेन च सेव्यमानः, शोकानिलसमाघ्रातवेपमानतनुलताभिः स्खलत्पदन्यासमनुव्रजंतीभिः मूर्च्छामीलितनयनमधिधरणीपृष्ठं निपत्य कथंचिद्वृद्धधात्रीजनेन समुद्धृताभिरुत्कंपस्तनयुग-

१ दीक्षादानार्थमुद्योगः । २ भरतस्य राज्याभिषेकः तीर्थकर्तृदीक्षाप्रयाणोत्सवश्च । ३ ददौ । ४ इंद्रः । ५ शिबिका । ६ देवाः । ७ शोकपवनस्य । ८ भूतले ।

स्त्रीवस्त्रस्तांशुकाभिर्विगलत्कचनिचयानिष्पतत्पुष्पमालाभिर्देवीभिर्मध्येमार्गं महत्तरैः कंचुकिवरैर्निरुद्धाभिर्दूरादुद्गतग्रीवं निरीक्ष्यमाणः, शुद्धांतमुख्याभिः परिवारिताभ्यां भर्तुरिच्छानुवर्तिनीभ्यां यशस्वतीसुनंदाभ्यां मरुदेव्या चान्वीयमानो, नाभिराजभरतेश्वरबाहुबलिकच्छमहाकच्छ प्रधानपार्थिवैश्च निरीक्ष्यमाणपरिनिष्क्रमणः, साकेतपुरस्य नातिदूरे सिद्धार्थकवनोद्देशे, निरंतरनिचिततरुानिकरानिष्पतत्पुष्पोपहारशोभिते, पुरंदरसुंदरीकरारविंदकल्पितरत्नचूर्णरंगवलिविराजिते, सुरवारांगनारब्धमंगलसंगीतमनोहरे, विशंकटपटपरिकल्पितमंडपमंडिते, पर्यंतनिहितविविधमंगलद्रव्यसंगते, पांडुकशिलातलविलासोपहासिनि, कस्मिंश्चिच्चंद्रकांताशिलातले गीर्वाणैरुर्वीमवतारिताद्यानादवततार ॥

क्षणं तत्र स्थित्वा नरसुरसभां स्निग्धमधुरैः ।
कटाक्षैः संभाव्य स्वजनमयमापृच्छय सहसा ॥
सुरेंद्रे सन्नद्धे परिचरति मध्ये यवनिकं ।
स नैःसंग्यं भेजे वसनमणिमाल्यानि विसृजन् ॥ ३८ ॥
ततः पूर्वमुखं स्थित्वा कृतसिद्धनमस्क्रियः ।
तत्सर्वं विभुरत्याक्षीन्निर्व्यपेक्षं त्रिसाक्षिकम् ॥ ३९ ॥
कर्मक्ष्मारुहमूलजालसदृशान्केशोत्करान्पंचधा ।
देवः कोमलपंचमुष्टिभिरसावुत्खाय सद्भावनः ॥
चैत्रे मेचकपक्षके सुसमये शस्तोत्तराषाढभे ।
सायान्हे नवमीदिने शुभगुणे जग्राह दीक्षां प्रभुः ॥ ४० ॥

---

१ पट्टमहिषीभिः । २ अंतःपुरं । ३ इंद्रसिद्धात्मसाक्षिकं ॥ ४ वृक्ष ५ कृष्णपक्षे ।

तदनु कुलिशायुधः कुतुकितमानसास्त्रिजगद्गुरोर्मूर्ध्नि निवासे न पावनान्विमलदुकूलप्रतिच्छन्ने पृथुलनूत्नसमुद्गके स्थापितान् शशांक बिंबविलसितकलंकलेशसकाशान्विततपुंडरीकसंगतभृंगसंघनिकाशान्श्यामलकोमलकेशानतिविभवेन नीत्वा पयःपारावारे समर्पयामास ॥

तत्र किल सैवालकावलिर्वितततयाहिमालया विलासितमेचकरुचिरुचिरा पूर्वतनसुवर्णवर्णेशसंगात् कलशवाराशिसलिले सैवालकावलिर्बभूवेति न विचित्रमेतत् ॥

तत्रार्पितं कचकुलं कलशांबुराशिर्वीचीकरेण परिगृह्य तदादरेण॥
डिंडीरखंडकपटेन कृताट्टहासो मोदाच्चलल्लहरिबाहुरयं ननर्त ४१

तत्र कौतुकेन विलोकमानानां नाकलोकजनानां मेचकरुचिरुचिरतत्कचनिचयेन शैवालपुंजपिंजरित इव, क्वचिद्वातानीतजलधरखंडमंडित इव, एकत्र समुन्मीलितकुवलयकोरकित इव, परत्र पुरंदरमणि प्रभापरीत इव, अन्यत्रांतःसंचरज्जलदेवताकबरीभरपरीत इव, कुत्रचन श्यामलपन्नगमचाञ्चित इव च कलशतटिनीविटश्चकासामास ॥

ततः समागत्य मुदा मरुत्वान्स्तुत्वा च नत्वा च जिनेंद्रपादौ॥
निर्लिंपवर्गैः सह नाकलोकं जगाम सम्यक्स्मृततद्गुणौघः॥४२॥

तदा किल कच्छमहाकच्छप्रमुखाश्चतुःसहस्रसंख्याता नरपालास्तरांगितकेवलद्रव्यालिंगाः, परिवर्धितस्वामिभक्ति परिष्वंगाः, केवलं स्वामिभक्त्यैव दीक्षामभजंत ॥

अव्यक्तसंयतमहीरमणैः परीतो ।
दीक्षालताविलसितो वृषभेश्वरोऽयं ॥

---

१ पृथुलनवकरंडके । २ सा एव अलकावलिः पक्षे शैवालपंक्तिः । ३ सर्पमालया । ४ अन्यत्र । ५ क्षीरसमुद्रः ।

बालांघ्रिपैः परिवृतस्य सुरद्रुमस्य ।
लक्ष्मीमसौ त्रिभुवनैकगुरुर्बभार ॥ ४३ ॥
अथ भरतनरेंद्रो भक्तिसांद्रो मुनींद्रं ।
सह भुजबलिमुख्यैः सोदरैः पूजयित्वा ॥
तदनु तपनबिंबे पश्चिमाशाप्रलंबे ।
प्रभुरविशदयोध्यां स्वामिवाज्ञामलंघ्यां ॥ ४४ ॥

* इत्यर्हद्दासकृतौ पुरुदेवचंपूप्रबंधे सप्तमः स्तबकः ॥ *

अष्टमः स्तबकः

तदनु कलितकायोत्सर्गः प्रतिज्ञातषण्मासानशनः समग्रैकाग्रता-निरुद्धान्तर्बाह्यकरणव्यापारः साकार इव धैर्यगुणो, मूर्त इव शमः, सुस्थिरनिश्चलांगतयालेख्यालिखित[1] इव विलसमानो, निगूढाक्षरं किंचिद्-न्तर्जल्पाकारतया निगूढनिर्झरमुखरकंदरो धराधर इव, सुगंधिनिर्गतनि-श्वासगंधाहूतपुष्पधंयपरीतलपनसविधप्रदेशतया बहिर्निष्कासिताशुद्धले-श्यांश इव, दीक्षानंतरसमुद्भूतज्ञानचतुष्टययुक्ततया प्रदीपविशिष्टो म-णिमयानिलय इव च लक्ष्यमाणः, संत्यक्तसर्वपरिग्रहोऽपि मुक्ताहारः[2] सर्वदोपत्यकांतासक्तः[3] स्वीकृतानंतवसनो[4] विग्रहोत्थितारातिविग्रहतत्पर-[5]श्चेति राज्यलक्ष्मीपरिष्वक्त इव तपःश्रीवल्लभस्त्रिभुवनवल्लभः प्रचुराश्च-र्यं दुश्चरं तपश्चचार ॥

अयमथ तपःसिद्ध्या दृश्येतरातपवारण[6]।

---

१ चित्रलिखितः। २ मौक्तिकमालया युक्त इति विरोधः, मुक्त-आहारो येन स इति परिहारः। ३ सर्वदः, अपत्यकांतासक्त इति विरोधः सर्वदा उपत्यका-अंत-आसक्तः। उपत्यका अद्रेरासन्ना भूमिस्तान्ध्या-नैः। ४ स्वीकृतानि अनंतानि वस्त्राणि येनेति विरोधः परिहारस्त्वेवं स्वी कृतं अनंतं आकाशमेव वसनं वस्त्रं येन सः। ५ युद्धे सन्नद्धशत्रुनिग्रहः इति विरोधे देहोत्पन्नमोहादिशत्रुनाशनतत्परः॥

मुक्ताहारः सर्वदोपत्यकांतारव्यप्रीतिः स्वीकृतानंतवासाः ॥ देवो धुन्वान्विग्रहस्थानरातीन्कांतारेऽपि प्राप सौराज्यलीलाम् ॥ ३७ ॥

एवं धर्मशर्माभ्युदयेऽपि विंशतितमे सर्गे ॥ ६ अदृश्यं छत्रं।

मकाटितघनच्छायोप्युग्रत्पारिच्छदानिःस्पृहः ॥
वनघनतरुश्रेणीस्पंदत्समीरणचंचल—
न्नवकिसलयै रेजे सच्चामरैरिव वीजितः ॥ १ ॥

एवं द्वित्रिमासेषु किंचिदूनेषु गतेषु परीषहप्रभंजनप्रभंजितधृतयस्ते मुनिमानिनो राजर्षयस्तस्य गुरोर्गरीयसीं पदवीं, सिंहस्येव मृगशावकाः, गरुडस्येवेतरविहंगमाः, गंतुमक्षमाः, नदीजलफलमूलाद्याहाराय प्रवृत्ताः, वनदेवताभिर्निषिद्धादिगंबरवेषाः, केचन वल्कलवसनाः, केचन कौपीनधराः, परे भस्मोध्दूलितांगाः, कतिचन जटाजटिलमस्तकाः एकदंडिनास्त्रिदंडिनश्च भूत्वा, भरतराजभयेन तद्देशान्निवृत्य वनेषु कृतोटजाः, प्रतिदिनं पुष्पादिभिर्विभूषितमेनं पुरुदेवं पूजयामासुः ॥

मरीचिश्च श्रीमद्भरतनृपपुत्रो मुनिनिभः ।
चिकीर्षुर्मिथ्यात्वप्रबलतरवृद्धिं गतमतिः ॥
तदा योगं शास्त्रं कपिलमततंत्रं च विदधे ।
जनोऽयं येनाद्य प्रभजति महामोहसरणीं ॥ २ ॥

एवमेतेषु संवृत्तेषु निर्लिप्तगिरिरिव निष्कंपः, पारावार इवाक्षोभो, वायुरिव निःसंग, आकाश इव निर्लेपस्तपोवैभवजृंभितकांतिनिराकृतनिशाकरदिवाकरः पुरुदेवः प्रकटसंयमकंकटकस्त्रिगुप्तिपरिगुप्तो गुणसैनिकपरीतः कर्मारिविजिगीषुरासामास ॥

जटीभूताः केशा विभुशिरसि संस्कारविरहा—
त्तदानीं ध्यानाग्निप्रतपनविशुद्धस्य बहुधा ॥
स्वजीवस्वर्णस्योद्धृतमलिनदोषा इव तथा

---

१ मेरुपर्वतः । २ वर्म ।

विरेजुर्निर्दग्धप्रसवशरभूमा इव च ते ॥ ३ ॥

तदानीं तद्वनं वृषभेश्वरतपःप्रभावेन प्रशांतपावनं बभूव ॥

कंटकालग्नबालाग्रान् कोमलांश्चमरीमृगान् ॥
कंठीरवाः स्वनखरैः कौतुकेन व्यमोचयन् ॥ ४ ॥
पंचाननसुतं तत्र पिबंतं जननीस्तनं ॥
करेणुपोताः कर्षन्ति क्रीडितुं कुतुकांचिताः ॥ ५ ॥

एवं प्रशांतपावने वने तपस्यतो भगवतः पादमूलमुपाश्रितौ सकलभुवनकमन ! त्वया पुत्रनप्त्रादिभ्यः साम्राज्यसंविभागकाले विस्मृतावावामद्य भोगप्रदानेनानुग्राह्याविति भगवंतमनुबध्नंतौ नमिविनमिनामधेयौ कच्छमहाकच्छनरपातितनयौ स्वासनकंपविदितभगवद्ध्यानांतरायो धरणेंद्रः समागत्य, सोपायमिमौ समाश्वास्य, ताभ्यां सह विमानमारूढस्तापप्रकाशाभ्यां तपन इव व्योममार्गेण प्रस्थितो, भगवत्कीर्तिपुंनमिव मूर्तिमंतं रजतमानुमंतमुपजगाम ॥

जंबूद्वीपमहांबुजस्य लवणांभोराशिमध्यस्थितेः ।
तत्तत्क्षेत्रादलोज्ज्वलस्य सततं यो[३] हंसवद्भासते ॥
तस्यांडा इव गंडशैलनिकरा राजंति तत्राभितः ॥
सानू विद्रुमवल्लिकाविलसितौ तद्वृत्तपादाविव ॥ ६ ॥

तद्भूधरशिखरालंकारं परार्ध्यपुरं प्रविश्य फणीश्वरः सकलविद्याधरभूपालानामनयोर्विद्याधरराज्यलक्ष्मीसमर्पणे भगवदनुमतिरिति प्रकटयित्वा, दक्षिणश्रेणिसाम्राज्ये नमिमुत्तरश्रेणिसाम्राज्ये च विनमिं विद्याधरीकरधृतैः कनककुंभैरभिषिषेच ॥

---

१ पुष्पशरो मदनः । २ विजयार्धपर्वतं । ३ यः पर्वतः ।४ गंडशैलास्तु च्युताः स्थूलोपला गिरेरित्यमरः ॥

एतौ खचरभूमीशमुकुटारूढशासनौ—
शासतः स्मः धरां धीरा विद्यासिद्धिमुपेयुषौ ॥ ७ ॥
ततः श्रीमान्लेखाचल इव परं निश्चलतनू–
रतीतः षण्मासांश्चिराविहितयोगात्तु विरमन् ॥
शरीरस्थित्यर्थं विहितमतिराहारममलं ॥
समाहर्तुं प्रायात्प्रथितयतिचर्यांप्रकटनः ॥ ८ ॥

तदनु देवदेवे निर्दोषैर्षिण्वणान्वेषणाय पुराकरग्राममडंबादिषु-विहरमाणे, भगवत्पादपयोजविन्यासस्थलिं शिरसा प्रणमंतः केचन देव ! प्रसीद किं कृत्यमिति पृच्छां चक्रुः परे च पराध्यरत्नानि समानीय पुरतः परिकल्पयामासुः, अन्ये च वस्तुवाहनादिकं विभोरढौकयंत, परे तु भूषणगणलालितांगलितांगीः परिणाययितुं देवं प्रार्थयामासुः, केचन स्वादुतरमाहारं मज्जन-सामग्र्या सह समानियं सगृहाणेति विज्ञापयामासुः ॥

एवं मोहवशाद्यथामति जनेष्वारंभमाणेष्वयं ॥
तूष्णींभावमुपाश्रितो मुनिवरश्चर्यां परामाश्रितः ॥
विघ्ने तत्र विजृंभितेप्यविकृतप्राज्यप्रसीदन्मनाः
षण्मासानतिवाह्य पूर्णमकरोत्संवत्सरांतं प्रभुः ॥९॥

तदा खलु कुरुजांगलविषयाविशेषकायमानहस्तिनापुरपालककुरुवंश तिलकसोमप्रभानुजः स्वयंप्रभाश्रीमत्यार्यास्वयंप्रभदेवकेशवमहीशाच्युत प्रतींद्रधनदेवचरः सर्वार्थसिद्धितः समागत्यात्र संजातः परमश्रेयोनि-दानतया श्रेयानिति विख्यातः सोयं निशायाः पश्चिमे यामे समुत्तुंग-

---

१ निर्दोषाहारः ।

सुमेरुं, शाखाग्रलंबिभूषणभूषितं कल्पतरुं, विद्रुमपल्लवारुणकेसरं केसरिणं, शृंगाग्रलग्नमृत्सं वृषं, स्फुरत्कांतिमनोहरौ दिवाकरनिशाकरौ, चलाचलवीचिविशालं पारावारं,अष्टमंगलधारीणि भूतरूपाणि च स्वप्ने विलोकयामास ॥

तत: प्रभाते परितुष्टचित्त: श्रेयानयं संसदि वर्तमानं ॥
सोमप्रभं प्राप्य सुरेशतुल्यं स्वप्नान्ययावत्कथयां बभूव॥१०॥

तदनु सोमप्रभेण वीक्षितवदनारविंद: सुरगुरुप्रातिछंद: पुरोधा: सुराद्रिदर्शनेन तद्वत्तुंग: परमपुरुषो भवत्सदनमलंकरिष्यत्यन्ये च स्वप्नास्तद्गुणोन्नतिं सूचयंत्यस्माकं तु महत्तरकीर्तिलाभादिसंपदां निदानभूत: पुण्योदय: कुमारश्चायं तत्वविदिति प्रतिपादयामास ॥

तदानीं योगींद्रे प्रविशति पदा हास्तिनपुरं ॥
तमेनं संद्रष्टुं कुतुकितहृदां संभ्रमवतां ॥
जनानां समर्द्दान्निबिडतररथ्यांगणजुषां
पुपूरे व्योमाध्वा प्रबलतरकोलाहलरवै:॥११॥

तदात्वे किल संवेगवैराग्यसिध्यर्थं बद्धपरिच्छदं, जगत्कायस्वभावादितत्वान्यनुध्यायंतं, सत्वगुणाधिकक्लिश्यमानाविनयेषु मैत्रीप्रमोदकारुण्यमाध्यस्थानि भावयंतं, युगप्रमितदेशे पुर: प्रदेशे दृष्टिं प्रसार्य शनै: पादांबुजं गंधसिंधुरलीलया विन्यस्यंतं, राजमंदिरसमीपमापतंतं भगवंतं सिद्धार्थनामकाद्दौवारिकाच्छ्रुत्वाधिराजयुवराजौ सोमप्रभश्रेयांसौ अंत:पुरामात्यसेनानीप्रमुखैर्निबिडितपार्श्वभागौ ससंभ्रमं प्रत्युद्गम्य प्रणम्य च, ततश्चरणारुणांबुजं निवेश्य चार्घ्यपाद्यादिकं प्रमो-

---

१ व्यंतर देवता: । २ पुरोहित: ३ बद्धपरिकरं । ४ प्रत्युद्गम्य अभिमुखं गत्वा।

दस्य परां काष्ठामुपजग्मतुः ॥

संप्रेक्ष्य भगवद्रूपं श्रेयान् जातिस्मरो भवन् ॥
ततो दाने मतिं चक्रे तत्संस्कारेण संगतः ॥१२॥

तदनु श्री वज्रजंघादिवृत्तांतं चारणयुग्माय दत्तादानं च स्मृत्वा मत्वा च वेलेयं दानयोग्येति, श्रद्धादिगुणसंपन्नो नवपुण्यान्वितः श्रेयान्दानादितीर्थकर्ता, भगवते प्रासुकाहारकल्पितं दानं वितताार ॥

सोमप्रभेण सममुज्ज्वलपुण्यकीर्ति—
लक्ष्मीमतीसहित एष विशुद्धवृत्तिः ॥
पुंड्रेक्षुकांडवरनूत्नरसस्य धारां—
श्रेयान्ददे भगवतः खलु पाणिपात्रे ॥१३॥

तदनु सुरानिकरगलितमणिविसरघणघणरवपरिगतसमनुपतदमरतरुसुरभितमकुसुमकुलसमनुसृतमधुकरनिचयमधुरतरविरुतेन, विबुधजनकरनिहतपटहपटुनिनदेन, त्रिदिवपतिसुभगवनचिरनिवसदतिसुरभिमृदुपवनललितगतिसमनुसरदालिजालकोलाहलेनाहो दानमहो पात्रमहो दातेति गगनतलविलसितदिविजततिहृदयसरसिजमुदयपरिकलितवचनभरेण चाकाशं निरवकाशमासीत् ॥

कृतार्थं स्वात्मानं सममनुत तद्भ्रातृयुगलं ॥
कृतार्थोऽयं यस्मात्स्वगृहमपुनाल्लोकमहितः ॥
परे दानस्यास्य प्रगुणमनुमोदेन बहवः ॥
सुखेनैव प्रापुः प्रचुरतरपुण्यस्य सरणिं ॥१४॥

तदनु कृतपारणं निखिल पौरसंदोहवंदितचरणं गमनविलासबि-

जितवारणं त्रिभुवनरमणं वनाय अजंतं भगवंतं किंचिदंतरमनुव्रज्य प्रत्यावृत्तौ तद्गुणमणीनेव मुहुर्मुहुः प्रस्तुवानौ सकलजनविस्मयनीयप्रज्ञाप्रभावौ विमलयशोविशोभितादिगंतौ कुरुकुमुदिनीकांतौ सानंदं पुरं प्राविक्षतां ॥

तदादि तदुपज्ञं तद्दानं जगति पप्रथे ।
येन विस्मयमासेदुर्भूमिपा भरतादयः ॥१५॥
सुराश्च विस्मयानंदसंभूतनवकौतुकाः ॥
प्रतीताः कुरुराजं तं[2] पूजयामासुरादरात् ॥१६॥

तदनु भरतराजेन सबहुमानं इमं दानोदंतं पृष्टः श्रेयान् श्रीमतीवज्रजंघभवपरिकलितचारणयुग्मदानवैभवकथनपुरःसरं दानशुद्धिमित्यमचीकथत् ॥

दानं स्वस्यातिसर्गो भवति नरवरानुग्रहार्थं त्रिशुद्धि-
प्रोद्भूतं तत्पुनाति प्रचुरतरफलं कीर्तिलक्ष्मीनिदानं ॥
दाता श्रद्धादिसम्यग्गुणमणिनिलयो देयमाहारशास्त्रं
भैषज्यं चाभयं चेत्युदितमथ मतं रागशून्यं तु पात्रं ॥१७॥

पात्रं त्रिधा जघन्यादिभेदैर्भेदमुपेयिवत् ॥
जघन्यं शीलवान्मिथ्यादृष्टिश्च पुरुषो भवेत् ॥ १८ ॥
सद्दृष्टिर्मध्यमं पात्रं निःशीतलव्रतभावनः ॥
सद्दृष्टिः शीलसंपन्नः पात्रमुत्तममुच्यते ॥ १९ ॥
इत्यादिवाचमवकर्ण्य नृपोत्तमोऽयं

---

१ उपज्ञा ज्ञानमाद्यं स्यादित्यमरः , २ श्रेयांसं ३ स्वस्य आहारादिद्रव्यस्य अतिसर्जनं वितरणं । ४ हे नरवर । ५ मनोवाक्कायजातं ।

भर्तुर्भवान्सुविभवांश्च निशम्य धीरः ।
संपूज्य तं कुरुपतिं कुतुकेन भूयो
ध्यायन्गुरोर्गुणगणं स्वपुरं जगाम ॥२०॥

तदनु निखिलगुणसांद्रो वृषभयोगींद्रः सकलसावद्यातिदूरं जिनकल्पिताचारं स्वीकुर्वाणो, योगयोग्यप्रदेशेष्ववहितध्यानाधीनमानसो विहरमाणः क्रमेणातिवाहितसंवत्सरसहस्रः, अतालविदितनगरनिकटविलसितशकटसमाव्हयोपवनविटपिमूलतलविलसमानानिराकुलानिर्जंतुकाविमलाशीलापट्टे निबद्धपल्यंकासनः , पूर्वाभिमुखः प्रहितध्यानोन्मुखमानसः, परां लेश्याशुद्धिं दधानश्चेतसा परं पदमनुसंदधानः, सम्यग्दर्शनज्ञानानंतवीर्यसौख्यसूक्ष्मत्वागुरुलघुत्वावगाहान्याबाधारूपानष्टसिद्धगुणान्प्रथममनुध्यायन्, अध्रुवादिद्वादशानुप्रेक्षाभावनाभावितांतःकरणः, तदनंतरमाज्ञाविचयविपाकविचयापायविचयसंस्थानविचयाविख्यातानि धर्मध्यानानि भजमानो, ज्ञानादिपरिणामेषु निरतिशयशुद्धिं संगृण्हानः क्रमाच्छुक्लध्यानपरिणतो, घातिकर्माणि निःशेषयित्वा, फाल्गुनकृष्णैकादशीदिने संप्राप्तोत्तराषाढनक्षत्रे सकलद्रव्यपर्यायस्वभावोद्भासनप्रवीणं भव्यसरोजतल्लजसमुल्लसननिपुणं केवलज्ञानतरणिमुद्बोधयामास ॥

वृषभजिनपरव्यातप्राच्याचले प्रविजृंभिते ।
सुरपरिषदां संतोषांभोधिवर्धनतत्परे ॥
विहितबलवद्घातिध्वांते[1] च केवलबोधस—
मवसितंकरे[2] चित्रं दोषोद्गमो[3] न हि पप्रथे ॥ २१ ॥

---

१ घातिकर्मतिमिरः । २ चितकरश्चंद्रः । ३ दोषाया रात्र्याः उद्गमः उदयः । पक्षे रागादिदोषोदयः ।

पुष्पैर्देवौघवृष्टैः सुरपटहपटुप्रस्फुरद्ध्वानपूरै—
र्गीर्वाणस्त्रैणलास्यैरमरवरमुखोद्भूतसंस्तोत्रशब्दैः ॥
मंदारोद्यानवाटीमृदुसुरभिमरुन्मंदमंदप्रचारै—
रासीत्कैवल्यबोधोदयमहिममहो विश्वपाश्चर्यभूतः ॥२२॥

तदानीं विमलकेवलज्ञानसंपूर्णचंद्रबिंबोदयोज्जृंभितभुवनत्रयांभोधिनिर्लो-लकल्लोलकोलाहलानुकारिघंटाघणघणात्कारकंठीरवशंखपटहप्रणादशं—खस्वनसमुत्पन्नबोधानेकयानाविमानारूढकल्पजज्योतिष्कव्यंतरभवन——वासिरूपचतुर्णिकायामरपरिवेष्टितः, प्रचुरतरप्रसृतनिजांगकांतिकल्लोलै-र्भूषणरत्नप्रभाभिश्च गगनतलमलंकुर्वाणो, नागदत्तनामधेयाभियोग्येशकल्पितमैरावतमारूढः पुलोमजा परिष्कृतपार्श्वभागः सौधर्मपुरंदरः भगवतः कैवल्यपूजार्थं निश्चक्राम ।

हारांशुस्वच्छनीरे सुरयुवतिमुखांभोजनेत्रोत्पलश्री-
सारे काश्मीररागारुणितकुचरथांगाह्वयैः शोभमाने ॥
स्फारप्रोद्भूतचंचच्चमरजकलहंसास्पदे व्योमवार्द्धौ ।
नाकेशानां विमाना मणिगणरुचिरा नावमेतेऽन्वकुर्वन्॥२३॥
शश्वद्वादितदेवदुंदुभिरवैरापूरिताशांतराः ।
लेखास्तुंगकिरीटरश्मिरचितानेकेंद्रचापभ्रमाः ॥
उन्मीलत्तनुकांतिभिर्विदधतो दिग्भित्तिचित्रभ्रमं ।
देवास्थानमवातरन्धनदसंनिर्माणमिंद्राज्ञया ॥२४॥

यः किल समवसरणस्थानं भूमिभागात्पंचसहस्रदंडादुपरि वर्तमानं, द्वादशयोजनसमवृत्तेन्द्रनीलशिलाघटितमसृणतलविलसिततया निरा-

---

१ कुंकुमं ।

कृतांबरोप्यसौ देवा मया सेवितः सन् अनंतसौख्यानंतसूतीति मत्त्वा समागतेन विनयसंकुचितांगेन व्योमस्थलेनेव विलसमानं, दिक्चतुष्टयव्यवस्थितदेवमानवतिर्यग्विनेयजनसुखारोहणहेतुभूतमणिमयविंशतिसहस्रसोपानविराजमानं, भुवनत्रयलक्ष्मीलपनविलोकनमणिदर्पणायमानं, वलयितबलारिपुचापशंकाकरेण मोक्षलक्ष्मीमणिमयकंकणायमानेन, सभालक्ष्मीमणिघटितकटिसूत्रसदृशेन पंचरत्नपांसुमयेन क्वचिज्जाज्वल्यमानपद्मरागप्रभामेदुरतया देवसद्व्यानाग्निकीलाकलापसंवलितेनेव, परत्र विमलतरमुक्ताकांतिमनोरमतया तन्मुखचंद्रचंद्रिकाविभ्रमं वितन्वता, क्वचन पद्मरागेन्द्रनीलरुचिरुचिरतया देवपरागसात्कृतकामक्रोधांशसंश्रितेनेव परिशोभमानेन, रजःश्रीविराजितेनापि नीरजश्रीविराजितेन, परागशोभितेनापि अपरागशोभितेन, घनाशामलकांतिनाप्यघनाशामलकांतिना धूलिमालेन परीतं, चतुर्दिक्षु शातकुंभमयस्तंभाग्रलंबितमणिमयमकरतोरणरमणीयज्योतिरमरदौवारिकपरिपालितजातरूपमयगोपुराभ्यंतरमहावीथिमध्यपरिशोभमानेन मूर्तिमुपगतेनेव भर्तुरनंतचतुष्टयेन पुरुषार्थचतुष्टयप्रदानाय संसल्लक्ष्म्याः समुदस्तभुजदंडचतुष्टयसंभावनासंपादकेन जातरूपधरेणाप्यंबरस्पर्शनात्रिलोलध्वजविराजितेन मानस्तंभचतुष्टयेन जुष्टं चकासामास ॥

विमलसलिलान्यस्य प्रांते सरांसि विरेजिरे ।

---

१ परिहृतवस्त्रो निराकृतनभाश्च । २ मया--नभसा । ३ ज्वालासमूहः । ४ प्रथमं विरोधः तत्परिहारश्च परागकान्तिविराजितेन । कमलकान्तिविराजितेन च ।५ धूलिः । ६ पापरहितेन। ७ घना आशा दिशस्तासु अमलकांतिना ।८ अघनाशेन पापविनाशेन अमला कान्तिर्यस्य तेन ।

जिनदिनमणेर्भासा यत्रत्यकोकपरंपरा ॥
निशि न विरहं भेजे भेजे च वारिजमंडलं ।
मधुरसपरीवाहैर्मत्तद्विरेफमनोज्ञतां ॥२५॥
त्रिविधगतिषु भ्रान्त्वा खिन्ना सुराधिकतोषिणी ।
बहुतरपरीतापा सा पंकजातसदोदयैः ॥
परिहृतभवासंगा गंगा जिनेंद्रमुपासितुं ॥
कलितकुतुका संसत्प्रांतेऽभवज्जलखातिका ॥२६॥

सुराधिकासक्तिसमात्तपापं । संत्यक्तुकामा द्युनदी जिनस्य सभांतराले जलखातिकाभूदथाप्यपर्णा, न बभूव चित्रं॥२७॥

तदभ्यंतरभूभागे विमलविकचविविधकुसुमनिकरविगलितमधुरसनिरतमधुकरमधुरतररवमुखरितदिगंतरा, मधुमदोपरक्तकामिनिकपोलकोमलच्छविना वनदेवताचरणालक्तकरसरंजितेनेव पल्लवप्रचयेन संछादिता, सुमनःसेविताप्यबोधा, अपरिमितपर्णसंचयापि सप्तपर्णोपशोभिता, पुष्पवत्यपि पवित्रा, पुष्पवाटी चकासामास ॥

सालः स्वर्णमयस्ततः परमभूद्रौप्यैश्चतुर्गोपुरैः ।
प्रत्युप्तः शिखरोल्लसन्मणिगणैर्नक्षत्रशंकाकरः ॥

---

१ नरकतिर्यङ्मनुष्यगतिषु इति ध्वनिः । देवानां तोषिणी । मद्येन आल्हादिनी चेति ध्वनिः । ३ अधिकसंतापा, बहुजला च । ४ कमलं । पापसमूहश्च । ५ निरस्तसंसारसहवासा, निरस्तमहादेवसंगा च । ६ देवाः मद्यं च । ७ गंगा । ८ पापरहिता जलरहिता च । ९पुष्परसः । १० विद्वत्सेविताापि अज्ञेति विरोधः तत्परिहारश्च पुष्पसेविता विकासरहिता च । ११ सप्तपर्ण इति वृक्षविशेषः॥ १२ रजःस्वलाऽपि पवित्रेति विरोधः परिहारः कुसुमयुता पवित्रा च ।

सुस्वच्छैश्चतुरंबुदैरुपगतः सुत्रामचापोत्करो ।
देवं सेवितुमेतमागत इति व्योमाध्वगैः शंकितः ॥२८॥
सत्यं सुरेंद्रचापः सालोऽभूदिति न संशयः कश्चित् ॥
धनचापलताख्यातः सुमनोधर्मत्वमाप सपदि यतः॥२९।
द्वारेषु मंगलद्रव्याण्यष्टोत्तरशतं बभुः ॥
भृंगारादीनि निधयो नव शंखादयस्तथा ॥३०॥

ततः परं दौवारिकयक्षपालिततद्गोपुरप्रांतविलसितेन मृदुमृदंगनिनादग र्जनशोभितेन शंपालतासंकाशनिर्लिंपनटीसंगतेन राजतविराजितनाट्यशालायुगलेन वलितविद्युल्लताकलितस्तनितमुखरितशारदनीरदयुगलेन विराजमाना, ततश्च तदानीमुदारतपसा भगवता निरस्तकर्मश्यामिकाशंकाकरीं सौरभ्यलुब्धमुग्धमधुकरश्रेण्या मंजुलगुंजितव्यंजितभेदां धूपधूमपरंपरां जनयता प्रतिमार्गं परिलसता शातकुंभयुगेन संभाविता, ततःपरं कामिनीजनेनेव तरुणांचितेन, परिशोभितरूपगतेन पयोधरोज्ज्वलसरास्थितिरमणीयेन सद्यस्तनस्तवकभरभरितेन, गगनमध्यजघनक्रीडाशैलविलसितेन कर्णिकारचितोदयेन घनामलकावलिं बिभ्राणेन विभ्रमोज्ज्वलेन च, सरागजनेनेव लतांगीकृतप्रणयेन पल्लवाभिख्यांचितेन च, वनीविख्यातेनाप्यवनीविख्यातेन, सुरसुंद-

---

१ तरुणपुरुषेण च । वृक्षेण च । २ तत्कालोत्पन्नपुष्पस्तबकः । पक्षे स्तनाविव स्तबकौ । ३ गगनमध्ये जातघन एव क्रीडाशैलः । पक्षे गगनमध्यमिवविस्तीर्णं जघनमेव क्रीडाशैलः । ४ कर्णिका-रचितं पक्षे कर्णिकारचितं । ५ घन-आमलकावलिं आमलवृक्षपंक्ति [आवळ्याचें झाड) पक्षे घनां अलकावलिं । ६ वीनां पक्षिणां भ्रमो भ्रमणं । पक्षे विभ्रमो विलासः । ७ रमणी पक्षे लतायाः अंगीकृतस्नेहेन । ८ पल्लवो विटः किसलयं च ।

रीजनसंदोहानंदकरशाले¹शोभितेनापि विशा²लेन, त्रिमेखलापीठाधिष्ठित-गगनचुंबिचैत्यतरुशोभितमध्यभागेन क्रीडोद्यानचतुष्टयेन जुष्टा तस्य सभा विभाति स्म ॥

रत्नस्तंभो³रुलक्ष्मीस्तदनु मणिगणैर्भूषिता स्वर्णवेदी ।
बिभ्राणैषा सदा⁴मंगलगुरुजघनश्रीपरीताभ्रमध्या ॥
लोलाक्षीवद्विरेजे प्रकटितसुमनो⁵जातपुष्यद्विलासा ।
चंचत्स्वर्णांशु⁶कांता सकलजनदृशां तृप्तिहेतुर्मनोज्ञा ॥ ३१ ॥
गजवृषवभस्त्रचक्रांबुजमुख्यैरंचिता ध्वजश्रेणी ॥
वीथ्यंतरालभूमौ स्वर्णस्तंभाग्रलंबिता रेजे ॥ ३२ ॥

ततःपरमष्टमंगलनवनिधिसमेतनाट्यशालाधूपघंटाध्वजाभिरामना-गकुमारद्वारपालकविराजितेन, रजतमयगोपुरचतुष्टयसंगतेन देवेन करिष्यमाणां धर्मव्याख्यां श्रोतुमागत्य वलयाकृतिमुपेतेनेव मानुषोत्तर-पर्वतेन, शुभरुचिर⁷सालेनापि कन⁸काभिख्यांचितेन, अद्वितीयेनापि द्वितीयेन प्राकारेण परिगता, ततश्च सिद्धार्चासनाथसिद्धार्थवृषांकितमध्यभागेन कल्पेश्वरसेवितकल्पद्रुमवनेन विलसमाना, ततश्चतुर्गोपुर-विराजमानया सादरैः सुरैः समानीय निवेशितयेव कैलासाचलाधित्यकया वज्रमयवेदिकया, सुरतरुकुसुमकिसलयानिचयविरचितवंदन-मालासुंदरैर्देशभी रत्नतोरणैः प्रकाशमाना, ततः पद्मरागमयैर्मूर्तैरिव जनानुरागैः सुरनिकरनिरंतरसेव्यमानैस्ताद्रूप्यमुपगताभिरिव भगव-

---

१ सभागृहं । २ विस्तृतेन । ३ रत्नस्तंभ इव ऊरु । ४ सदा मंगलं पक्षे सदामं गलं पक्षे—पुष्पमालासहितं । ५ मदनः, पुष्पसमूहश्च । ६ अंशुकं वस्त्रं । ७ रुचि—रसालेन, रुचिर—सालेन रुचिराभ्रेण, रुचिरतटेन च । ८ कनकं धत्तूरको वृक्षः हेम च ।

तो नवकेवललब्धिभिर्यद्वा जिनपतिसेवाहेवाकभावेन प्रादुर्भूतैरिव नवपदार्थैर्गगनतलचुंबिभिर्र्चासनाथैर्नवभिस्तूपैः परिष्कृता समवसृतिधरा विरराज ॥

आकाशो बहुधातपःस्थितियुतस्त्यक्तुं निराकारतां ।
देवस्यास्य सभांतरे स्फटिकसत्प्राकाररूपोऽभवत् ॥
सत्यं किंतु पुरा सुमेषु विलसत्संसर्गशून्योऽधुना-
प्येवं युक्तमिदं तु चित्रमधिकं सालोप्यवन्युज्ज्वलः ॥३३॥

अथवा विजयार्धमहीधरः किल दुर्वर्णधर इत्यपरख्यातिं परिमार्ष्टुं उत्तमवर्णसेव्यतां प्राप्तुं कृतादरतया, यद्वा महाबलभवप्रभृतिसंजातप्रणयेन, यदि वा सुमेरुर्हि पुरा जन्माभिषेकाधिकरणतया अधुना तु भगवतः पादस्पर्शनक्षमसिंहासनरूपेण च सेवां विधाय, विहाय च सुरासक्तिं, दोषाकरसंसर्गमनुदिनं पंकजातिसहचरतया भ्राम्यतः स्वयं वसुमतोऽपि सद्वदवसुमोषकस्य, भूमौ वर्तमानानां स्वर्णस्थितिं करैरपहरतः, तथा चरमाचलयोगं प्राप्तस्याऽपि पूर्वाशीवशेन महोदयभूभृत्सेवां कुर्वतो जडबंधोः सख्यं च परिहृत्य सकलभूधरश्रेष्ठतां कल्याणसंपदा जातरूपधरत्वेन भगवतः सौरूप्यं च प्राप्तवानिति स्वयमपि भगवान्निकट एव

---

१ जिनप्रतिमाः। २ आतपस्थितिः, तपःस्थितिश्च। ३ सुमेषुर्मदनः पक्षे सुमेषु पुष्पेषु। ४ सालस्तटो वृक्षश्च। ५ हीनवर्णधरः पक्षे रजताचलः। ६ सुरायां आसक्तिः पक्षे देवासक्तिः। ७ दोषसमूहः पक्षे दोषां रात्रिं करोति इति दोषाकरश्चंद्रः। ८ पापसमूहः कमलं च। ९ नक्षत्रसमूहकांतिचोरस्य पक्षे सज्जननिकरधनहारकस्य। १० अस्तपर्वतसंगं पक्षे चरमशुक्लध्यानसंबंधं। ११ पूर्वदिग्वशेन पक्षे पूर्वेच्छावशेन। १२ महाविभवयुतनृपसेवां पक्षे महोदयाचलसेवां। १३ मूर्खबंधोः समुद्रबंधोरित्यर्थः। १४ नृपः पर्वतश्च। १५ पंचकल्याणोत्सवाः सुवर्णं च। १६ नाम्न्यधरत्वं सुवर्णधरत्वं च।

सेवां विधातुमुदितमनीषया नूनमाकाशस्फाटिकघटिततत्सालात्मना सम-
जायत ॥

तन्मध्ये रेजिरे नूत्नरत्ना द्वादशकोष्ठकाः ।
गणैर्द्वादशभिर्जुष्टाश्चंद्रकांतप्रतिष्ठिताः ॥ ३४॥

ततः परं क्रमेण वैडूर्यहेमसर्वरत्नहेममयानां धर्मचक्रधरयक्षाधिष्ठि-
तमहाध्वजमंगलद्रव्यसंगतप्रथमद्वितीयतृतीयपीठानामुपरि विराजमाने
सुरभिसुरकुसुमकालागरुधूपोद्दामसौरभपरिवेष्टिते जिनतनुबंधुरगंधस-
मिद्धे गंधकुटीमध्ये भ्राजमानं माणिक्यदीपसरूपं मणिमयसिंहासनम-
धिष्ठाय चतुरंगुलगगनतले देवश्चकासामास ॥

समवसरणभूमिं सारसौन्दर्यभूमिं ।
बलरिपुमुखदेवा वीक्ष्य सद्भक्तिभावाः ॥
परिगतिमथ कृत्वा तत्सभांतश्च गत्वा ।
सपदि नवमुदारं भेजिरे हर्षपूरं ॥ ३५ ॥

तत्र किल विचित्रमणिगणघृणिरुचिरमसृणतलसुरगिरिशिखरसदृश-
विजितदिनकररुचिरुचिविसरभरभरितगगनतलविलासितविवृतवदनगज-
रिपुविधृतगरिष्ठविष्टरमधितिष्ठतमानंदमंदरवृंदारकसंदोहकरनिकरसमुन्मु-
क्तया, मुक्तयेव स्वच्छकांतिमनोग्मया, मनोरमयेव वियन्मध्यविराजमा-
नलक्ष्म्या, लक्ष्मीवाति चंचलया, चंचलयेव कलितघनपुष्पवृष्ट्या,
वृष्टेयव बहुधा मानसस्य समुल्लाससंपादनप्रवीणया,

१ प्रदक्षिणां । २ मुक्ताफलमिव । ३ वनितया । ४ वियदिव कटि-
विराजमानलक्ष्म्या । ५ विद्युतेव । ६ जलवृष्टया निबिडपुष्पवृष्टया च ।
७ प्रमाणयुक्तसस्योल्लासनं, बहुधा चित्तस्य उल्लासनं ॥

वीणयेव संपादितालिकुलमधुरस्वराश्रिया, मधुरस्वराश्रियेव सुरागोद्भूतिसुंदर्या, सुंदर्येव सकलकलया, कलयेव शीतरुचिविलसमानया, परागरुच्युज्ज्वलयाप्यपरागरुच्युज्ज्वलया, सुरागोद्भूतया-सुराधिकरुचिकरतया सततसंजातमधुपसंसर्गतया मधुरुचिरुचिरतया लतांगीकृतप्रणयतया सदारामानुरक्ततया च मे बंधनास्थितिरासीद्भगवतः सेवोन्मुख्यमात्रेण बंधो मुक्त इति कुतुकेनाहमहमिकया स्वयमनुपतंत्येव पुष्पवृष्टया शोभमानं, देवस्य चित्तान्निष्कासितेन रागेणोपगूढस्य मरकतहरितदलविलसितमदकलमधुरविरुतमधुकरनिचयमुखरितमणिमयकुसुमविततकिसलयकुलविलासितस्य रक्ताशोकतरोर्मूलमुपाश्रितं भुवनत्रयाधिपत्यं प्रकटीकुर्वाणेन, हासेनेव त्रिजगल्लक्ष्म्याः, यशोमंडलेनेव भगवतः, स्मितोल्लासेनेव धर्मनृपस्य, सेवार्थमुपागतेनेव चंद्रबिंबेनायं किल विमुक्तांबरस्त्यक्तचंचलानंदः सदामरालिसंतोषकरो विचित्रबलाहको धीरसस्यवृद्धिं करोतीति कुतुहलेन संद्रष्टुमुपागत्य विस्मयवशात्तत्रैव निश्चलतामुपगतेनेव शारदनीरदत्रयेण, चंद्रे कलंकोत्पादनेन, सूर्ये संतापसंजननेन च संजातापकीर्तिं परिमार्ष्टुं तदुभयमेकीकृत्य वेधसा निर्मितेनेव बिंबत्रयेण रत्नकांतिमनोहरेण धवलातपत्रत्रितयेन विशोभमानं, गांभीर्यविर्जितेन पयःपारावारेण पदरहिततयाधिकतरजरसाश्लिष्टतयातिवृद्धतया च सेवार्थं स्वयमागंतुमक्षमतया

---

१ आलिकुलं सखीसमूहः पक्षे आलिकुलं भ्रमरसमूहः । २ गांधारादिरागाः पक्षे कल्पवृक्षाः। ३ चंद्रः पक्षे शीतकरत्वं । ४ कल्पतरुः पक्षे प्रेम । ५ सुरा मदिरा देवाश्च । ६ मधुपो भृंगः मद्यपायी च । ७ सदारामानुरक्तः अनिशं उपवनानुरक्तः पक्षे सदा ललनानुरक्तः । ८ अंबरं वस्त्रं गगनं च । ९ चंचलानंद विद्युता आनंदः पक्षे अनित्यं सुखं ।

प्रहितैरिव वीचिनिकरैर्यद्वा यशोविजिततया सेवार्थमागतैरिव सुधापूरैरथवा निखिलसुरसेव्यपादोऽयं हिमालय इति मत्वानुपतद्भिरिव गंगातरंगैः, सुरनिकरवदनपयोजपरिष्कृते भगवतो विमलतरदिव्यदेहकांतिपूरे सरोवरशंकया संपतद्भिरिव हंसैः, ईश्वरादुत्तत्पद्भिरिव यशोविसरैर्यक्षकरसरोजवीज्यमानचामरैरुपशोभमानं, जिनचंद्रोदयवर्धमानपयोधिध्वनिमनुकुर्वता सुरदुंदुभिनिध्वानेन प्रकाटितमहिमानं, भव्यजनसप्तभवावलोकनमणिमुकुरायमाणेनांतरारातिचक्रनिराकरणनिपुणचक्रायुधायमानेन ज्ञानश्रीमणिदर्पणायमानेन यद्वा धवलातपत्ररूपेण भगवतः सेवां विधाय कृतकृत्यतामापन्नं चंद्रमवलोक्य स्वयमपि सेवार्थमागतेनेव प्रभाकरेण भामंडलेन बाभास्यमानदिव्यदेहं, मृदुमधुरगंभीरसर्वभाषामयदिव्यध्वनिदिनकरेण भव्यजनमनोदुर्गध्वान्तं विध्वंसयंतं मूर्तेनेव ज्ञानदर्शनचारित्रत्रितयेनान्येन वदनत्रयेण परिशोभमानं तं देवदेवमवलोक्य विस्मयविस्तृताक्षाः सहस्राक्षप्रमुखसुराध्यक्षाः भक्त्या प्रणम्यार्चयित्वा चैवं स्तोतुमारभंत ॥

> गुणश्रेणी देव ! त्रिभुवनपते ते गणधर–
> प्रसिद्ध्यद्वाणीनामपि न विषयाऽस्मत्स्तुतिगिरां ॥
> कथं भूमिः सास्यादिह जलधिमौर्वानलमुखै—
> रपेयं पातुं किं मशकशिशुकाली प्रभवति ॥ ३६ ॥
> क तावकगुणांबुधिः क मितशेमुषीका वयं ।

---

१ सेव्यचरणः पक्षे सेव्यप्रत्यंतपर्वतः । २ हिमाल्यो गिरिः पक्षे हिमालयः मायाः लक्ष्याः आलय इति । ३ चतुष्टयेनेति पाठांतरं । ४ अस्मिन्विषये । ५ स्तोकमतयः ।

क नो [illegible] क्व खलु ते यशोमाधुरी ॥
इति स्तुतिपथाज्जिनाधिप ! निद्रातिभाजः पुनः ।
प्रवर्तयाति देव ! नस्तव पदाब्जभक्तिर्ध्रुवा ॥ ३७ ॥
अनु[illegible]नः सुमनोजातं त्वं देवदेव ! भुवनपते ! ॥
सुम[illegible]नं सहसा नाशयासि स्मेति जिनप ! चित्रमिदं ॥३८॥
देव ! तव वैभवं यो जानाति पुमान् जिनेंद्र ! भुवनपते ॥
भजति त्यजति च वैभवमेष इति श्रीपते ! चित्रम् ॥३९॥
अमलसद्गुणवारिधिरप्यहो जिनप ! नामलसद्गुणवारिधिः ॥
निखिललोकनुतोप्यभवः कथं त्रिदशलोकनुतो [illegible]तापते ॥४०॥
अवदातमूर्तिमहितोप्यधिकारुण्यं वहस्यहो चित्रं ॥
व्याकीर्णकल्पकुसुमो न व्याकीर्णाद्विकल्पकुसुमोऽपि ॥ ४१ ॥

इत्याद्यनेकस्तोत्रपवित्रीकृतमुखारविंदः पुरंदरप्रमुखवृंदारकसंदोहः संततसंगतनिजनयनपरंपराभिर्जिनराजस्य कनकामलदिव्यदेहं चंचच्चंचरीकसंचयकल्पतरुकल्पं कुर्वाणो भगवदभिमुखीकृतमुखो यथोचितं निषसाद ॥

---

१ देवसमूहं विद्वत्समूहं वा ॥ २ मनसिजं मदनमित्यर्थः। ३ इत्यव्ययं भवं संसारं पक्षे वैभवं ऐश्वर्यं। ४ न अमलसद्गुणवारिधिरिति विरोधः तत्परिहारः नाम लसद्गुणवारिधिः । ५ निखिललोकनुतोऽपि त्रिदशनुत इति विरोधः त्रिदशादेवास्तैर्नुत इति परिहारः । ६ अवदातमूर्तिरपि श्वेतमूर्तिरपि अधिकारुण्यं अधिकालोहितत्वं वहसीति विरोधे अधि—कारुण्यं अतिशयेन सदयत्वं इत्यर्थान्तरेण परिहारः । ७ व्याकीर्णद्विकल्पकसुमोऽपि प्रसारितकल्पतरुसुमद्वयोऽपि न व्याकीर्णकल्पकुसुम इति विरोधे तत्परिहार एवं व्याकीर्णप्रसारिता द्विकल्पका द्विभेदा सुमा शोभना लक्ष्मीर्येन सः अनंतज्ञानादिरूपांतरंगलक्ष्मीः अष्टप्रातिहार्यादिरूपा बहिरंगा लक्ष्मीरिति॥

श्रीमान्भरतराजर्षिर्बुबुधे युगपत्त्रयम्।
गुरोः कैवल्यसंभूतिं सूतिं च सुतचक्रयोः ॥४२॥
कैवल्यं वृषभस्य धार्मिकमुखात्सत्कंचुकीयात्सुतो-
त्पत्तिं चक्रसमुद्भवं च कलयन्द्राक् शस्त्रपालाद्विभुः॥
किंचिद्व्याकुलमानसः किमिह मे प्राकार्यमित्यादरात् ।
तीर्थं धर्मफलं तदा भगवतः प्राग्रं मतिं व्यातनोत् ॥४३॥

तदनु गुरुभक्तिभरनिरतो भरतराजः कौतुकितहृदयैरनुजपुरज-नपरिजनांतःपुरपुरःसरैः परिवृतः, पटुपटहमंद्रतमनिध्वानानिरुद्धदशा-दिशावकाशं प्रचलितमिवांभोधिं षडंगतरंगितबलं पुरोधाय पुरतश्चालितः-पुरतः परिशोभमानमेकत्रयुगपदुदितदिनकरबिंबसहस्रसंकाशकरं पुंजीभूतामिव कांतिसारं भगवदास्थानमंडपं प्रवीक्ष्य प्रविश्य चांतः, क्रमेण प्रथमद्वितीयसालावुत्क्रम्य, तत्र संभ्राम्याद्भिर्दौवारिकैः प्रवेशितः, त्रिदशभुवनसौभाग्याजित्वरीं श्रीमंडपशोभावैखरीं विलोक्य विस्मित-मानसः प्रदक्षिणीकृत्य प्रथमपीठे धर्मचक्रचतुष्टयं, द्वितीयपीठे महाध्व-जांश्चार्चयित्वा, गंधकुटीमध्यसमिद्धसिंहासनोपरि विराजमानतया पूर्वा-चलशिखरशोशुभ्यमानं दिनमणिमनुकुर्वाणं, चलच्चामरनिकरवीज्यमान-तया पुष्पवृष्टिपरीतया च प्रपतन्निर्झरं त्रिधाभूतविधुबिंबावलंबितांबुध-रचुंबितं मंदारतरुगलितप्रसूनपरिमेदुरं मंदरगिरिं तुलयन्तं भगवतमव-लोक्य प्रणम्य चातिविभवेन पूजयामास ॥

पूजांते देवदेवं त्रिभुवनतिलकं संप्रणम्यातिभक्त्या ।
स्तुत्वा नत्वा च भूयः सकलगुणनिधिं विश्वयाथात्म्यबोधं ॥
गत्वा श्रीमंडपाग्र्यं भरतनरपतिस्तत्र सभ्यांतराले ।

देवांगे दत्तदृष्टिर्मुकुलितविलसत्पाणिपद्मोऽवतस्थे ॥ ४४ ॥

तदनु भव्यपुंडरीकषंडमार्तंड केवलज्ञानलक्ष्मीमनुभवन्तं भगवंतं धर्मं पृष्टवति भरतराजे, भूतभविष्यद्वर्तमानपदार्थसार्थव्यक्तीकरणसाक्षिणी निर्मुक्ताशेषदोषा मिथ्यात्वजालतूलवातूलैलीला विपक्षगर्वसर्वस्वपर्वतदंभोलिरपारसंसारसागरकर्णधारायमाणा स्याद्वादलक्ष्मीविहरणप्रासादपाली धर्मनृपसाम्राज्यप्रतिष्ठाभूमिस्ताल्वोष्ठस्पंदादिवर्जिता वर्णविन्यासहिताऽपि वस्तुबोधविधानचतुरा स्वयमेकापि पृथक्पृथगभिप्राय वचनानां देहिनां स्पष्टमिष्टार्थसाधनप्रवीणा सुधामयी वृष्टिरिव दिव्यवाणी भगवन्मुखारविंदात्प्रादुर्बभूव ॥

निशम्य भरताधिपो मधुरदिव्यवाणीं विभो—
स्तदाभजत दर्शनव्रतविशुद्धिमुद्यद्रुचिः ॥
सुरासुरमुनीश्वरप्रभृतिभिः परीता सभा—
परां धृतिमवाप सा परमशर्मधर्मामृतैः ॥ ४५ ॥

तदानीं कुरुकुलचूडामणिः सोमप्रभनरमणिर्दानतीर्थप्रवर्तकः श्रेयान् भरतेश्वरानुजो वृषभसेनश्च भगवत्पादमूले दीक्षित्वा गणधरा बभूवुः ।

ब्राह्मीसुंदर्यौ च संसारनिर्वेदानिर्धूतविवाहार्थिते भट्टारकपादमूले दीक्षामासाद्य गणिनीगणप्रधाने बभूवतुः ॥

श्रुतकीर्तिश्च गृहीतोपासकव्रतः श्रावकाग्रणीर्बभूव । प्रियव्रता च गृहीताणुव्रता श्राविकाग्रेसरी बभूव ॥

पुरा भग्नतपस्काः कच्छमहाकच्छप्रमुखाश्च भरतराजपुत्रं मरीचिं विना सर्वेऽपि महाप्राव्राज्यमासेदुः । अनंतवीर्यश्च गुरुपादमूलप्राप्तदीक्षः

१ वायुः । २ नाविकः । ३ संतोषं ।

सुरासुरैः पूजितो मोक्षलक्ष्मीमाससाद ।

वंदित्वा भरताधिपो भगवतः पादांबुजं सानुज-
स्तच्चक्रायुधपूजने कृतमतिः संपूज्य लोकेश्वरं ॥
आस्थानाद्बहिरागतः पृतनया जुष्टश्च सौधोल्लसत्-
केतुव्रातनिरस्तभास्करकरं नैजं पुरं प्राविशत् ॥४६॥

तदनु देवदेव! त्रिभुवनरक्षणविचक्षण! पापावग्रहविशेषविशोषितभव्यसस्यसमुल्लासक! धर्मामृतसेकाय दयाध्वजविराजमानां भव्यवर्गार्थिनीं जयोद्योगसाधनं सज्जधर्मचक्रं च पुरस्कृत्य मुक्तिमार्गावस्कंदननिपुणाया मोहपृतनाया निःशेषनिर्मूलनाय च कालोऽयमुपस्थित इति सविनयं पुरुहूतेन विज्ञापितस्तीर्थंकरपुण्यसारथिबोधितः, समीरकुमारसंमार्जितयोजनांतररम्यभूमागः स्तनितसुरविरचितविमलसुरभिसलिलसंसेकविरहितरजःप्रसरमहीतलः, सकलर्तुकुसुमपल्लवितसमुल्लसितवल्लिकामतल्लिकाफलविलसिततरुनिकरनिरंतरितमणिदर्पणप्रतिमावनीतलविलासः समनुसृतशिशिरसुरभिमंदानिलः परस्पराव्हानानिरतदिविजजननिनदपूरितगगनतलः, पुरस्कृताष्टमंगलसंगतध्वजमालावितानावीचिलितांबर सहस्रदिनकरस्पर्द्धिसहस्रारधर्मचक्रपुरःसरः, पृष्ठतश्च व्योमतलविन्यस्त सप्तसप्तहेमांबुजरुचिरंजितचरणयुगलतया विजितेन रागमल्लेन भयादुपाश्रितपद इव नभःस्थले कलितयानः, सकलजगदानंदनः जिनराजः सर्वदेशेषु विहरमाणः क्रमेणानुकृतनिजयशोलीलं कैलासशैलमुपजगाम ।

॥ इति श्रीमदर्हद्दासकृतौ पुरुदेवचंपूप्रबंधेऽष्टमःस्तवकः ॥

---

१ अवग्रहो वृष्टिप्रतिबंधः । २ आक्रमणं । ३ मेघकुमारः । ४ मल्लयुद्धं कुर्वाणेन ।

अथ नवमः स्तबकः

चक्रे चक्रस्य पूजां तदनु निधिपतिर्जातकर्मापि सूनोः ।
पुंजीभूतानि रत्नान्युरुतरकुतुकादर्थिनां संददानः ॥
यत्र स्वःपारिजातावलिरधिकमदोन्मत्तभूपारिजात— ।
श्रेणी च व्रीडशोकाविभजत युगपद्गीतवेलोत्सवाग्रे ॥ १ ॥

ततश्चक्रधरस्यास्य दिग्जयारंभसंभ्रमे ॥
उपतस्थे शरल्लक्ष्मीर्जयश्रीरिव सादरा ॥ २ ॥

विशालविमलांबरस्फुटपयोधरोद्यन्मरु— ।
च्छरासननखक्षता मधुकरालिनीलालका ॥
वियत्तलपतत्सिच्छदपरंपराकंठिका ।
शशांकविलसन्मुखी शरदराजतांभोजदृक् ॥ ३ ॥

तदानीं विकचकर्णपुंजकिंजल्कपिंजरया कनककलितमणिबद्धश-रल्लक्ष्मीकंठिकयेव, मदमत्तमदनगजसंत्रुटितसुवर्णशृंखलयेव, मधुकरप-रंपरया विराजमाने, मनसिजमदगजमदवारिसौरभशंकाकरसप्तच्छदप-रिमलपरिमिलितदिगंतरे, गगनतललक्ष्मीवक्षःस्थलविलसितहारिन्माणिकं-ठिकानुकारिणीभिर्निरावरणं प्रकाशमानं विकर्तनं निजापितरमुपसेवितु-

---

१ स्वर्गीयानां पारिजातनामधारिणां कल्पतरूणां पंक्तिः। 'पंचैते देवतरवो मंदारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनं॥ इत्यमरः । २ भूप—अरिजातश्रेणी । भूपारिजातश्रेणी शत्रुराजश्रेणी भूम्युत्पन्नकल्पवृक्षश्रेणी च । ३–४ स्वर्गकल्पतरवो लज्जां । शत्रुभूपाश्च शोकमभजत । ५ अंबरं वस्त्रं नभश्च । ६ पयोधरः मेघः कुचश्च ।७ हंसः । ८ कंबं कमलं ।९ सूर्यः।

मागतायाः कलिंदगिरिनंदिन्याः परितः प्रसृताभिरिव वीचिपरंपराभिः सुरगजोन्मूलितनिर्गलदाकाशगंगाकमलिनीमिव, दर्शयंतीभिर्दिनकररथ तुरगतनुप्रभानुलिप्तश्यामामिव गगनतलमुत्पादयंतीभिः संचारिणीमिव मरकतस्थलीं विडंबयंतीभिरंतरीक्षाकुपारशैवालावालिमिव स्मारयंतीभिर्ग-गननतलविततैः पक्षपुटैः कदलीदलैरिव दिवसकरखरकिरणपरिखेदिता न्याशामुखानि वीजयंतीभिर्वियति संचारिणीं शाद्वलमालामिवाचरंतीभिः शुकराजिभिर्दंतुरिततारापथे पंफुल्यमानमल्लिकामतल्लिकाजाले तस्मिन् शरत्काले रचितदिग्जयोद्योगो भरतराजः पुरस्कृतचक्रायुधः प्रस्थान-भेरीभांकारैर्घनस्तनितशंकया कलापिकलापमुतग्रीवं विदधानैर्दिगंत-राणि पूरयामास ॥

दृप्तारातिमदेभकेसरिरवस्तत्सैन्यवीरावली ।
केकिव्रातघनारवस्त्रिभुवनाभोगे नटन्त्याश्चिरं ॥
उद्यच्चक्रधरस्य कीर्तिसुदृशो मंजीरशिंजारवो ॥
व्योमाध्वन्युदियाय मंदविजयप्रस्थानभेरीरवः ॥ ४ ॥
उद्यन्मंद्रजयानकध्वानिभरः संत्रस्तदिक्कुंभिराट् ।
फित्कारैः कुलभूधराग्रिमगुहासंसुप्तपञ्चीद्विषां ॥
कोपोद्बुद्धवतां च गर्जितरवैर्जुष्टो दिशो जेष्यत-
श्चक्रेशात्प्रथमं दिगंतवलयान्याक्रांतवांस्तत्क्षणम् ॥५ ॥

तदानीमुदारपराक्रमश्चक्रवरः शत्रुबलजलधिशोषणवडवाग्नि-कल्पेन मूर्तेनेव प्रतापपुंजेन सुदर्शननाम्ना चक्ररत्नेन, विचित्रमणि-मयूखचित्रितेन सूर्यप्रभनाम्ना छत्ररत्नेन, समुत्खातमात्रवित्रस्तसमस्त-

---

१ यमुनानदी । २ नभोम्बुधिः

रिपुमंडलेन वीरलक्ष्मीकर्णपूरनीलेंदीवरश्यामलेन सौनंदकनाम्ना खड्ग-रत्नेन, विजयार्धगिरिगुहागव्हरवज्रकवाटपुटविघटनपटुना चंडवेगनाम्ना दंडरत्नेन, अतिविषमजलदुर्गसमुत्तारणनिरतसकलशिबिरसंधारण धुरीणवज्रमयचर्मरत्नेन, चक्रवर्तिमणिमुकुटशिखरायमाणचूडामणिनाम-मणिरत्नेन, महागुहागव्हरांतरसूचिभेद्यतमस्ततिनिरसनप्रभाप्रभूतगुणोपेतेन चिंताजननीनामधेयेन काकिणीरत्नेन, नामग्रहणमात्रेणान्तार्निहितसमस्तवस्तुसमर्पणप्रवीणकामवृष्टिनामगृहपतिरत्नेन, अतिपराक्रमशालिना षड्विधसेनापालनपरायणेन अयोध्यनाम्ना सेनापतिरत्नेन, अनुस्मरणमात्रानिर्वर्तितसप्ततलादिप्रासादप्रकरेण, भद्रमुखनाम्ना तक्षकरत्नेन, शांतिपौष्टिकादिक्रियाकुशलधर्मकार्याभिकृतेन बुद्धिसागरनामधेयेन पुरोहितरत्नेन, कामरूपिणा कामचारिणा विजयार्धपर्वताभिधानेन यागहस्तिरत्नेन, विजितपवनवेगेन द्वादशयोजनोल्लंघनरंहोनिवासभूतेन पवनंजयविख्याततुरंगरत्नेन मनोहरस्त्रीरत्नेन च प्रत्येकं सहस्त्रयक्षयक्षीरक्षितेन यथोचितमनुगम्यमानः शारदनीरदानुकारिविमलदुकूलः चंद्रातपपांडुरहरिचंदनानुलिप्तशरीरः स्फुरन्मल्लिकामालापरिष्कृतमुकुटतटस्तारातरलमुक्ताफलकलिताजानुविलंबिब्रह्मसूत्रो जयलक्ष्मीपरिणयमंगलमणिमयदीपायमानकौस्तुभमणिघृणिभासुरवक्षःस्थलः समुद्दंडभुजदंडधास्तव्यचंचलराज्यलक्ष्मीकनकनिगलशंकाकरांगदशोभितः सुरचापविलासोपहासिरुंद्रेंद्रछंदहाराभिरामो निजस्थपतिरत्ननिर्मितं मनःपवनपत्रित्रिपतिचतुष्टयविजयसंजातकीर्तिपुंजैरिव चतुर्भिः शशिधवलैर्वाजिभिर्योजितं स्यंदनमधिरूढः सांद्रमंद्रजयदुंदुभिध्वानपुरःसरजयघोषैः पुरंध्रिकाजनमंगलगीतसंगतगुरुजनाशिर्वचनैश्च पूरितनभःस्थलो वारना-

रीकरचलितचामरनिकरदंभसंभूतजयलक्ष्मीकटाक्षक्षीरार्णवः परितो रथा-रूढैर्महामुकुटबद्धैः परिवृतश्चलितेनेवापरसागरेण बलेन शबलितपुरोभागो दूरादेव प्रणतमस्तकैः सेनाध्यक्षैः प्रतिपाल्यमानवीक्षणावसरः शनै राजमंदिरान्निर्याय चंचत्पंचतोरणालंकृतासु रथ्यासु प्रविशमानो मनुवंशगगनतलोदितभरतचंद्रकांतिचंद्रिकाक्षुंभितनगरक्षीरवाराशिवीचिपरंपरानुकारि-सौधावलंबिपुरनितंबिनीजनपरिमुक्तापांगशीकरनिकरमेदुरसाक्षतलाजमौक्तिकदंतुरितसार्वप्रदेशः पुरान्निश्चक्राम ॥

क्ष्माभृत्प्रोत्तुंगसिंदूरितकरटिघंटाडंबरैः कुंकुमाभ—
त्वंगत्प्रोद्यत्तुरंगै रथिकवरचयैश्चारुचित्रांबरेद्धैः ॥
भानुमस्पर्द्धिचक्रप्रतिफलनलसद्धेतिहस्तैः पदाति—
व्रातैश्चाक्रिप्रतापांबुधिरिव चलितस्तद्बलौघो बभासे ॥६॥

बलाघातोद्गीर्णक्षितितलगलद्धूलिनिकरे ।
नभोभागे तन्वत्यविरलपयोदालितुलनाम् ॥
पदातिव्रातानां करतलचलत्खड्गलतिकाः ।
वितेनुः प्रागल्भ्यं प्रतिदिशिचलानेकतडितां ॥ ७ ॥

दिशायुवतिकीर्णसत्सुपटवासचूर्णोऽथवा ।
जगत्कमलवासिनीप्रमदमुष्टिपिष्टातकः ॥
अमानि बहुधा सुरैः सदनसंगिपौरांगना—
वशीकरणचूर्ण इत्यमितसैन्यरेणूत्करः ॥ ८ ॥

तदा किल प्रचालितप्रलयजलधिशंकाकारे चक्रधरसैन्ये पुरःसरसेनापति-

---

१ गजसमूहः २ जगद्रूपे कमले निवासशीला लक्ष्मीः ३ सुगंधिचूर्णविशेषः । ४ मन्यते स्म ।

पुरस्कृतदंडरत्नसमीकृततया राजपथायमाने मार्गे प्रभास्वरपुरःसरचक्र-रत्नानुसारेण प्राङ्मुखंप्रचलिते सकलमपि महीतलं चतुरंगमयं, अशेष-दिङ्मंडलं रजोमयं, नभःस्थलं च दिविजविद्याधरमयं अंतरीक्षं चातपत्र-मयं, समीरकुलं च मदगंधमयं, भुवनोदरं च जयजीवेत्यादिघोषमयं-चाविरास ॥

ततः सैन्यैः साकं विततपथमुल्लघ्य भरत—॥
क्षितीशः सोऽद्राक्षीत्पुलिनजघनां पद्मनयनां ॥
मुदा गंगां सद्यस्तनकमलकोशां घनरसं—
स्फुरद्रूपां वेणीकलितघनपुष्पां सुरुचिरां ॥ ८ ॥
व्यापारितदृशं तत्र विलोक्य पृथिवीपतिं ॥
स्फारधीर्वाचामित्यूचे सारथिश्चित्तरंजनम् ॥ ९ ॥
अप्रदानैकशीलापि स्वर्णस्तोमप्रदायिनी ॥
सवेगगमनाप्येषा चित्रं हंसस्फुरद्गतिः ॥ १० ॥
इयं सुकमला पद्मराजीलोपाश्रितापि च ॥
सरसत्वं गताप्येषा नीरसत्वमुपैत्यहो ॥ ११ ॥

---

१ पुलिनमेव जघनं यस्याः २ पद्मान्येव नयनस्थानीयानि यस्याः। ३ नूतनकमलकोशः पक्षे सद्यः स्तनौ कमलकोशाविव यस्याः । ४ जलं पक्षे निबिडः शृंगारादिरसः ।५वेणी प्रवाहः ।६ आर्द्रकुसुमा । पक्षे कबरी, जलं च । ७ अत्यागशीला पक्षे जलप्रदानशीला । ८ सुअर्णप्रदायिनी जलप्रदानशीला पक्षे स्वर्णस्तोमप्रदायिनी हेमसमूहदानशीला । ९–१० वेगयुक्तगमनापि हंसगतिरिति चित्रं। परिहारः—हंसैः स्फुरन्ती शोभमाना गतिर्यस्याः। ११–१२ सुकमलापि पद्मसमूहलोपयुतेति विरोधः । परिहारः—राजीको जलसर्पः तेन आश्रिता इति । १३–१४ सरसापि नीरसेति विरोधः । परिहारः—मधुररसोपेता जलसत्वोपयुक्ता च ।

इति सारथिवचनं श्रवणदेशे विदधानः प्रकृष्टतररथवेगापरिज्ञातबहु-दूराध्वलंघनश्चक्रधरश्चिरविरहमसहमानतया स्वयमनुयातामिव साकेत-पुरीं पटमंदिरपालिं प्रविश्य तत्र दिनमतिवाह्यान्येद्युरपरमिव विज-यार्धाचलं तन्नामधेयं सिंधुरमधिरूढः प्रचलितपरमकरवालयातिशायित-सिंधुरयोज्ज्वलया बहुलहरिजालकोलाहलमुखरितदिगंतरया षडंगवाहि-न्या गंगावाहिन्या चानुगम्यमानः प्रतिदेशमुपनीतप्राभृतजालान्नरपाः लान्प्रतिवनं चमरीवालकस्तूरिकांडहस्तिमस्तकोद्भूतमुक्ताफलादिकमुपः दीकुर्वाणान् शबराधरारमणांश्च यथार्हं संभावयन्गंगाद्वारमुपजगाम ॥

बहिः पारावारं भरतनृपतिर्द्वैप्यसलिलं ।
मुदा पश्यँस्तत्र स्थलपथगतः सैन्यसहितः ॥
विशन्वेदीद्वारं ततसुरताटन्यास्तटवने ॥
निवेशं सेनायाः समतनुत सन्मंदपवने ॥ १२ ॥

तदनु लवणजलधिजयोद्युक्तस्त्रिरात्रपोषितः सादरमधिवसितजैत्रास्त्र-संततमंत्रानुचिंतनपरतंत्रः पावने दर्भशयनमधिशयानः पुरोधसं पुरस्कृत्य विहितपरमेष्ठिपूजः सेनारक्षणाय सेनान्यं नियोज्य जलस्थलविलंघनजं-घालैर्वाजिभिर्योजितमजितंजयनामधेयं दिव्यास्त्रसंभृतरथमधिरूढ-पुरोहिताविहितपुण्याशीर्वचनं शिरसा प्रतिगृह्णानो गंगाद्वारेण प्रस्थाय मनोजवैर्वाहैरुह्यमानेनाधिजलं यानपात्रायमानेन द्वादशयोजनमवगाह्य रथांगपाणिः कोपेन कुंडलीकृतवज्रकांडकोदंडो निजप्रशस्तिपरिकलित-ममोघं शरमारोपयामास ॥

किमेषः पाथोधिः क्षुभित इह कल्पांतपवने—

१ डेरा इति महाराष्ट्र भाषायां । २ उपायनसमूहान् । ३ द्वीपसंबंधि ।

रहो निर्घातः किं स्फुटविकटघोराट्टहासितः॥
इति त्रासात्सभ्यैरनधिगतरूपोऽथ स शरः।
सभामध्येऽपप्तद्विभवविलसन्मागधपतेः ॥ १३ ॥

तदनु तत्पराभवासहिष्णुतया क्रोधांधः स मागधः क्रोधाग्नेरिंधनायमानमेनं सायकं विचूर्णयेत्याज्ञप्तभटनिकरस्ततः प्रथितमतिकौशलैरभ्यर्णगतसुरैरयं चक्रधरशरो गंधाक्षतादिभिरभ्यर्चनीयः स चक्रभृतामाद्यस्त्रिभुवनगुरुतनयो भरतराजः शरार्पणदानादिना पूजनीय इति प्रतिबोधितः प्रशांतक्रोधः प्रसन्नचित्तवृत्तिः सुरैःसह प्रस्थितो मणिकिरीटमरीचिवीचिचित्रितगगनतलः शरं रत्नपटलनिवेशितं पुरोधायासाद्य च चक्रपाणिमिमां वाणीं सविनयमभाणीत् ॥

पुरा लब्धं पुण्यं परिणतमयं मे सुदिवसः ।
भवान्यस्मादस्मन्नयनपथपांथः समभवत् ॥
इदानीमस्माकं मिलित इव सर्वोत्सवगुणो ।
भवत्संगानंदो विवशयति पापं च नुदते ॥ १४ ॥
त्रिभुवनगुरुर्यस्य श्रीमान्पिता सकलेष्टदः
सुरनरमुखाः सर्वे यस्यानुशास्तिमुपासते ॥
नव च निधयो रत्नानि यस्य च तस्य ते ॥
सुलभमुपदीकर्तुं लज्जां तनोति मनो मम ॥ १५ ॥
अथापि रत्नान्येतानि स्वर्गेऽप्यसुलभानि च ॥
अधो निधीनामाधातुं सोपयोगानि संतु ते ॥ १६ ॥

इति शुक्तिवेणुवराहवारणादिष्वनुद्भूतैरक्षरमौक्तिकैर्घटितां वचनमालां

---

१ मेघध्वनिः।

रत्नमालां च कर्णदेशे कंठदेशे च समर्प्य, मणिकुंडलमहार्घरत्नादिभिः चक्रधरमभ्यर्च्य तेन कलितसत्कारो मागधसुरो निजास्पदमाससाद ॥

तुरंगैर्धौतांगैर्जलधिजलसंक्षालनवशा—
न्मनोवेगैर्जुष्टं रथमुपगतोऽयं निधिपतिः ॥
महीशानां पाथोनिधितटजुषां विस्मयकरो ।
विजेता स मागाधिजशिबिरमुद्वेलमहिमा ॥१७॥

तदनु चक्रधरो दक्षिणाशाविजयपरायणः कलितभगवत्सपर्यो निखिलदिग्विजृंभमाणप्रयाणमंगलानकरवभरकंपितपरचक्रः, समुच्चलितबहलबलधूलिपटलापिहितरिपुनृपतिनगरः सागरोपसागरयोर्मध्ये प्रचलता तृतीयेनेव सागरेण षडंगशबलेन सह प्रस्थितो विविधान्देशानतीत्य, विलसदेलालतामनोहरे वेलावने सेनां निवेश्य, प्रविश्य च पूर्ववद्वैजयंतमहाद्वारेण लवणोदधिव्यंतराधीश्वरं वरतनुं निर्जित्य, पुनः समुद्रोपसमुद्रयोर्मध्ये सेनया सह प्रस्थितः, चंदननालिकेरतांबूलवल्लीप्रचुरप्रदेशान्विविधान्देशानतीत्य, सिंधुद्वारोपांतविराजमाने कल्लोलिनीविटानिलोलकल्लोलांदोलितवनदेवतालीलाडोलानुकारितांबूललतापेशले मनसिजविजयप्रशस्तिलेखनोचितपत्राविचित्रितश्रीताले वने ध्वजिनीं विनिवेश्य, प्रविश्य च सिंधुमंधुमिव मन्यमानः पूर्ववद्व्यंतरपतिं प्रभासं च निर्जिगाय ॥

निधीशे कौबेरीं दिशमथ विजेतुं प्रचालिते ।
प्रविष्टाः पश्चार्द्धैरतिजवपुरोगानि सहसा ॥
रजोराज्या भूम्नामनुमितखुराघट्टनकलाः ।

---

१ महालवणोदधिः। २ क्षुल्लकलवणोदधिः । ३ सागरः । ४ वनं । ५ कूपमिव । ६ उत्तरं ।

हयाश्वेलुर्हेषारवदलितदिग्भित्तिपटलाः ॥ १८ ॥

तदानीं कर्णतालविगलितपटुपवनसमाकृष्टस्वर्गगणतरंगिणीतरंगजलकणैः शुंडादंडसंभूतफूत्कारशीकरैश्च व्योमलक्ष्म्या वसुधायाश्चान्योन्यमंजातन्यात्पुष्पिकाविभ्रमं विदधानया, प्लावयंत्येव मदधाराभिर्भुवमाकंपयंत्येव दिक्चक्रवालं, संक्षोभयन्त्येव भुवनोदरमुद्विग्नयंत्येव दिग्गजानुपरूंधयंत्येव पद्मबंधुगतं जंगमयेव धराधरपरंपरया भूतलमवतीर्णयेव कादंबिन्या गजघटया सहेलमस्पंदत ॥

एवं प्रस्थाय सैन्ये निजचरणनतोदीच्यभूपालवृंदं ।
संप्राप्ते रौप्यभूमीधरनिकटतटे क्लृप्तसेनानिवेशे ॥
श्रीमंतं चक्रपाणिं नियमयुतमथो राजताद्रेरधीशो
देवः संद्रष्टुमागान्मणिमुकुटरुचिद्योतिताशांतरालः॥१९॥
नतः सुरः ससत्कारं चक्रिणा धुरि कल्पितं
भद्रासनमलंकुर्वन्नुवाच वदतांवरः ॥ २० ॥
विजयार्धगिरेरहं नियंता विजयार्धोऽस्मि वनामरः प्रभो ! ।
परवान् भवतो नृप ! त्वदाज्ञा मम मौलेः शिखरे महीयते॥२१॥
वक्त्रे दोषाकरश्रीर्दृशि जडजरुचिः सूनलक्ष्मीश्च हासे ।
शक्तिर्निस्त्रिंशजेयं भुजभुवि कुटिला चापयष्टिः करे ते ॥
आज्ञेयं सर्वदा श्रीभरतनरपते हृद्यया किं मयात्र ।
त्येवं प्रोच्य प्रकोपात्सुरपतिनगरं प्राप कीर्तिस्त्वदीया।२२।

१सूर्यगतं ।२ चंद्रश्रीः। ३ कमलकांतिः डलयोरभेदः । ४ सुमनस्यक् ऊन-लक्ष्मीः पुष्पलक्ष्मीश्च । ५ निस्त्रिंशो घातकः क्रूरः । ६ अतिशयेन वैधुर्यं प्राप्तया पक्षे अतिजरया ।

इत्यभिधायोत्थाय च चक्रधरं सुरैः सह तीर्थांबुभिरतिविभवेन-अभिषिच्य, स व्यंतरपतिस्तस्मै दिव्यानि रत्नभृंगारश्वेतातपत्रप्रकीर्णकैयुगहरिविष्टराणि प्रतिपाद्यासाद्य च तदनुज्ञां निजसदनमाससाद ॥

विजयार्धगिरौ जिते समस्ते विजितं दक्षिणभारतं स जानन् ॥
निधिराड्वितताान चक्रपूजां जलगंधाक्षतपुष्पधूपदीपैः ॥ २३ ॥

तदनु उत्तरार्धविजयाशंसया प्रतीपमागत्य रजतगिरिपश्चिमगुहाभ्यर्णविलसमाने वने कलितसेनानिवेशं निधीशं नानादेशसमागतनरपालनिकायनिचितसविधप्रदेशं परिवृतामरजालः कृतमालो नाम सुरः सप्रणाममागत्य प्रभुणा सबहुमानमर्पितासनः सादरमिमां गिरमुदाजहार ॥

देव ! त्वद्वीक्षणाद्भूतं वाचाटयति कौतुकं ॥
मतिश्च मुद्रयत्यद्य वाचमेनां करोमि किं ॥ २४ ॥

तथाहि—अपि कुशलमिति सकलभुवनकुशलवितरणधुरीणे त्वयि लज्जाकरं। जयेति कलितजयश्रीपाणिग्रहणे सिद्धसाधनं। दयस्वेति करुणावरुणालये न चमत्कारि । प्रसीदेति प्रसन्नस्वभावे न विधेयं । स्वागतमित्यभ्यागतं विषयं परिपालयेति प्रभुमात्रगोचरं । तव किं करोऽहमिति सुरनरविनुतचरणनलिने नातिशयावहमिति श्रीमदुचितवचनचातुरी च न मे बुद्धिमधिरोहति ।

विद्धि मां विजयार्धस्य मर्यत्रममृताशनं ॥
कृतमालं गिरेरस्य कूटेऽमुष्मिन्कृतालयं ॥ २५ ॥

इत्यादि वदंतमुपदीकृतचतुर्दशभूषणं प्रतिपादिततद्गिरिगुहाद्वारप्रवेशोपायमादितेयं सबहुमानं विसर्ज्य प्रसन्नेन चक्रधरेण गुहाद्वारमु-

---

१ चामरयुग्मं २ अभिप्रायेण ।

त्पाद्य यावत्तदुपशमनं तावत्पाश्चात्यखंडं विजयस्वेति आज्ञप्तश्चमूपतिराधिरूढवाजिरत्नः पुरस्कृतदंडरत्नः तद्गुहाद्वारमासाद्य निर्भिद्य च दंडरत्नेन तन्मुखनिसृतोष्मज्वालाकलापादश्वरत्नरयेण सुरनिकरेण च रक्षितो बभूव ॥

निपेतुरमरस्त्रीणां कटाक्षैः सममंबरात् ॥

सुमनःप्रकरास्तस्मिन् हारा इव जयश्रियः ॥ २६ ॥

तदनु चमूपतिः सकलबलपरिवृतो विजयार्धगिरितटवेदिकामतीत्य सिंधुनदीपश्चिमदिग्भागवेदिकातोरणद्वारेण निर्गत्य म्लेच्छखंडमंडनायमानविविधाकरपुरग्रामसीमारामादिषु विगाह्य प्रतिष्ठापितचक्रवर्तिशासनः समागतम्लेच्छभूपालान् पुरस्कृत्य त्रिःपरीत्य च म्लेच्छखंडं म्लेच्छराजसेनया निर्याय पर्याणातीतसिंधुवनवेदिकाद्वारः षण्मासैः प्रशांतोष्मदुःखं तद्गुहामुखं पुनरासाद्य संशोध्य च कृतरक्षाविधिश्च चक्रधरदर्शनलालसः प्रविश्य विजयाशिबिरं तत्र विचित्रचक्रवल्लभास्थानमंडपे दूरानतमणिमुकुटः कारिहारिकन्यारत्नप्रमुखवस्तुवाहनपुरःसरं कोटीरकोटिचुंबितधरणीतलं म्लेच्छराजकदंबकं तत्तद्देशनामगोत्रादिनिर्देशेन प्रभवे निवेदयामास ॥

ततो भरतभूपतिः सबहुमानमेतान्नृपान् ।

विसर्ज्य नरपालकार्चितमुदारवीर्याकरं ॥

षडंगबलवल्लभं विजयचिन्हितैर्मानयन् ।

जयाय पुनरादिशन्निखिलवीरचूडामणिं ॥ २७ ॥

तदा जयानकध्वाना आचांतांभोधिघोषणाः ॥

---

१ तिरस्कृतसागररवाः ।

अनुचक्रुर्महाघोरकल्पांताभोदगर्जितम् ॥ २८ ॥
जयकुंजरमारूढः परितो नृपकुंजरैः ॥
रेजे निर्यन्प्रयाणाय सम्राट् शक्र इवामरैः ॥ २९ ॥

तदनु भरतमहीपतिर्विजयरामापरिणयमहसमयहरित्पातिकरविकीर्ण—पिष्टातकचूर्णायमानरजःपटलेन, दिगंगनाहस्तविक्षिप्तलाजांजलिपुंजप्रतिपंक्तिकरमदकरिकरशीकरनिकरेण, रयविजितपवनपुरःसमर्पितमौक्तिकस्तबकोपहारशंकाकरतुरगमुखगलितफेनपल्लवनिचयेन च भरितगगनतलं षडंगबलं विजयार्धाचलकटकाभिमुखं निर्याय पर्यायेण प्रविश्य च गुहाद्वारं, चक्रधरनिदेशपरवशचमूपतिपुरोहितपरिकल्पिताभ्यां भित्तिद्वयसंक्रांतसोमसूर्यमंडलसकाशाभ्यां काकिणीमणिरत्नाभ्यां निराकृतसूचीभेद्यांधतमसे तमिस्रनामगुहामध्ये सिंधुनदीतटयोर्द्विधाविगाहमानं कैश्चित्प्रयाणैर्गुहार्धसमितां भूमीमतीत्य व्यतीत्य चाधःपतनशक्तियुक्तया निमग्नजलयानिमग्नया समं तिर्यक्प्रविष्टामुत्प्लावनशक्तिजुष्टामुन्मग्नजलां तटिनीं स्थपतिरत्नपरिकल्पित सारदारुरचितसेतुना कौतुकहेतुना ततः कतिपयप्रयाणैर्गिरिदुर्गं विलंघ्य व्यतीत्य च पुरःसरमदर्सिपुरानिरर्गलीकृतमदगुहाद्वारं सुरभितमंदमंदवलमानपवमानसेवनव्यपगत चिरपरिचितगुहोष्मखेदं तस्य सानुमतस्तटवनमध्युवास ॥

तुरंगमखुराहतिक्षितिरजःपरीतांबरं ॥
करेणुयुतवारणैस्त्रुटितसल्लकीपल्लवं ॥
इदं वनमुदारधीरथ विलोक्य चक्रेश्वरो ॥
विचित्रितहृदंतरः शिबिरमध्युवासामलं ॥ ३० ॥

---

१ कल्पांत मेघरवं । २ बुद्धिं । ३ नद्या ।

पूर्ववत्पश्चिमे खंडे बलाग्रण्या प्रसाधिते ॥
विजेतुं मध्यमं खंडं साधनैः मम्लच्छयो ॥ ३१ ॥

तदानीं परचक्रकलितं स्वचक्रपराभवमसहमानो प्रस्थानभेरीभांकारपूरितदिगंतरो कुंडलीकृतकोदंडमंडलमध्यविराजमानकोपारुणवदनतया परिवेषमध्यविलसितपद्मबंधुबिंबं तुलयंतौ धनुर्धरहास्तिकाश्वीयमेदुरां ध्वजिनीं पुरस्कृत्य युद्धाय प्रचलितौ चलितावर्तविख्यातौ म्लेच्छभूपालौ धीमतामग्रेसरैः माचिववरैर्बोधितारातिविजयोपाय तया निषिद्धाभिषेणं नौशात्रवपराजयाय मेघमुखविख्यातान्नागकुमारान्संस्कृत्य पूजां प्रकटीचक्रतुः ॥

नागास्ते सहसांबुदाकृतिजुषः स्फूर्जन्महागार्जितो—
द्धाटीपाटितपुष्करैः पटुनटच्चंडानिलैर्ढौकिताः ॥
दृष्टिं विष्टपविप्लवस्तुतिनिभां कल्पांतमेघच्छटां ।
मुष्टिं मुष्टिसमीककल्पनकला दृष्टास्तदा चक्रिरे ॥३२॥
तज्जलं जलदोद्गीर्णं बलमावेष्ट्य जैष्णवं ॥
अधस्तिर्यगथोर्ध्वं च समंतादभ्यदुद्रवत् ॥ ३३ ॥

तदानीं उपर्यधः परिकलितयोश्छत्ररत्नचर्मरत्नयोर्मध्ये सप्त दिनावधिनिरुपद्रवमासीने चक्रधरसैन्ये निधीश्वरादिष्टगणबद्धामरैर्हुंकारेणोत्सारितेषु नागेषु कुरुराजोऽपि मुक्तसिंहगर्जितप्रतिध्वनितहिमाचलकंदरः करकलितदिव्यास्त्रः समधिरूढदिव्यरथो नागानभ्यभिषेणनं विधाय शरधाराभिर्गगनतलं पूरयामास ॥

---

१ हस्त्यारोहाः । २ अश्वारोहाः । ३ शत्रोर्नयाभिगमनमरौ तदभिषेणनं । ४ पुष्करं आकाशं । ५ मुष्टियुद्धं । ६ जयनशीलस्य भरतेश्वरस्य ।

तन्मुक्ता विशिखा दीप्ता रेजिरे समराजिरे ॥
द्रष्टुं तिरोहितास्मागान्दीपिका इव बोधिताः ॥ ३४ ॥

तदनु तद्विजयलक्ष्मीसनाथं संमुखागतं प्राप्तमन्त्रेश्वरश्रुतिं कुरुराजं सन्मानयन् चक्रधरो नाकौनीकविध्वंसनसंजातसाध्वसाभ्यां म्लेच्छनायकाभ्यां सोपायनमागत्य वंदितचरणारविंदः पृतनया सह हिमाद्रिं प्रस्थितो मध्ये मार्गे सिंधुदेव्या सहर्षं सिंधुजलैरभिषिक्तः परिलब्धदिव्यभद्रासनः कैश्चित्प्रयाणैर्हिमवत्कूटोपकंठमासाद्य, पुरस्कृतपुरोहितः कृतोपवासः शुचिः शय्यामधिशय्य नो दिव्यास्त्राण्यधिवास्य करकलितवज्रकांडकोदंडो हिमवत्कूटं प्रति दिव्यममोघं शरमारोपयामास ॥

तत्रत्यदेवस्त्वरितं समागाद्द्रष्टुं तदा मागधवद्विनीतः ॥
चक्री च तं देवमुदारवाचं संमान्य हर्षाद्विससर्ज भूयः॥३५॥

तदनु प्रत्यावृत्य सेनया सह समासाद्य वृषभाद्रिं पुंजीभूत इव स्वयशोमंडले तस्मिन् गिरौ स्वनामाक्षराणि प्रकटयितुकामस्तत्रत्यानि राजसहस्रनामाक्षराणि विलोक्य गर्वक्षतिविलक्षतां चापन्नः, कस्यचिद्राज्ञो नामाक्षराणि निरस्य विलिखितनिस्तुलनिजप्रशस्तिः ' सर्वः स्वार्थपरो लोकः ' इति लोकप्रवादं सार्थक्यमापादयामास ॥

भूयः प्रोत्साहितो देवैर्जयोद्योगमनूनयन् ॥
गंगापातमभीयाय व्याहूत इव तत्स्वनैः ॥३६॥

तत्र किल गंगाजलावर्तनविलोकनाविविधकौतुकेन वीक्षमाणो गंगादेव्या पूजितश्चक्रधरः पृतनया समं निवृत्य प्राप्तविजयार्धाचलकटकनिकटः, पूर्ववद्गुहाद्वारपाटनाय प्राच्यखंडविजयाय च सेना-

१ देवसैन्यं । १ आश्चर्यं । २ अनुपमां ।

न्यमादिश्य तत्र षण्मासान्सुखेन रममाणः, तदा समागताभ्यां पुरस्कृतविचित्रोपायनाभ्यां नमिविनमिभ्यां विद्याधरपतिभ्यां प्रार्थितो मदनमोहनमंत्रदेवतामिमां मूर्तिमतीं सुभद्रानाम सुदतीं नमेः स्वसारमुद्वाह्य परमानंदनिर्भरस्तावदागतेन कृतकृत्येन सेनाधिपेन सह खंडप्रपाताख्यां गुहां पूर्ववदुव्यतीत्य नाट्यमालनामधेयेन सुरवरेण पूजितो भरतराजः क्रमेण कैलासधराधरोपांते सेनां निवेशयामास ।।

तत्रास्थानं विगाह्य त्रिभुवनरमणं शुद्धधीरर्चयित्वा ।
नुत्वा नत्वा च भूयस्तटीनकटगतैः सैनिकैः संपरीतः॥
षट्खंडानां विजेता भरतनरपतिः किन्नरैर्गीयमानः।
स्फारप्रागल्भ्यकीर्तिर्निजपुरगमने संमुखः संप्रतस्थे ॥३७॥

ततः कतिपयैरेव प्रयाणैश्चक्रिणो बलं ॥
अयोध्यां प्रापदाबद्धतोरणां चित्रकेतनां ॥ ३८ ॥

इत्यर्हद्दासकृतौ पुरुदेवचंपूप्रबंधो नाम नवमस्तबकः ॥

अथ दशमः स्तबकः

तदनु नातिदूरसंनिविष्टस्य चक्रधरस्य पुरप्रवेशसमये विजितारातिचक्रे चक्ररत्ने पुरगोपुरं नाक्रमति, तद्रक्षणदक्षेषु यक्षेषु क्रोधविस्मयाभ्यां परवशेषु, तदुदंतमाकर्ण्य विस्मितेन प्रभुणा पृष्टे पुरोहिते भ्रातृविजयावशेषं चक्रानाक्रमणनिमित्तं ब्रुवाणे, तत्क्षणं सोपायनवाचकं प्रहितैः कार्यज्ञैर्दूतैर्विज्ञातवृत्तांतेषु भरतेशानुजेषु जगद्गुरुसभामासाद्य तपोलक्ष्मीमेव बहुमन्यमानेषु, समागतदूतत्रातविदिततदुदंतो मनुकुलजलधिकुमुदिनीकांतो भरतमहीकांतः किंचिच्चिन्ताक्रांतो भुजबलशालिनं भुजबलिनं युवानमनुनेतुं व्याकुलमानसः कार्यज्ञं मंत्रविशारदं दूतं तत्प्रांतं प्रति प्रेषयामास ॥

सोयं दूतो विविधविषयान्द्रागतीत्यातिचितान् ।
गत्वा स्वर्गादभिमदवतीं राजधानीं क्रमेण ॥
ज्ञातोदंतं भुजबलिनृपं द्वारपालैर्महीभृत्—
पीठासीनं दिनकरनिभं तेजसा संददर्श ॥ १ ॥

अनंगः सांगः किं मधुरुत मनोज्ञाकृतियुतः ।
प्रतापः किं मूर्तः प्रकटितशरीरं किमु बलं ॥
समूहः किं धाम्नां हरितमणिनद्धः किमु गिरिः ॥
क्षितीशं दृष्ट्वासाविति विविधसंदेहमभजत् ॥ २ ॥

ततश्च दूरादवनतशिराः ससत्कारं यथोचितमासनमुपागतः शासनहरो भरतराजस्य निखिलदिग्विजयादिकुशलप्रश्नपूर्वकं तस्य कर्तव्यशेषमस्ति न वेति नरपालेन पृष्टः सादरमिदमभाषिष्ट ॥

मातंगोपरि संपतंत्यनुदिनं श्यामा कृपाणीलता ।
सद्धारांचितया तया परवशो नान्यां समालोकते ॥
मां भृत्येषु नियुक्तवानधिपतिस्तात श्रुतं तेऽस्त्विति—
श्रीवार्तां गदितुं ध्रुवं जलनिधिं यत्कीर्तिराटीकत ॥ ३ ॥

किंच ॥ यः किल वीर्यलक्ष्मीनिलयो निःस्वोपकारसमासक्तो निखिलसंपद्विराजमानो निष्यादरविरहितो निजाया मतेरधीनः समापततामरातीनां रणे सान्निध्यमात्रेण निधनदः सख्यानां नियमप्रकारगोचरः सरसमैत्रीनिघ्नगुणाकरः परनियातिधिःकारधुरीणः संमानना-विषयीकृतनियोगिजनः चक्रधरस्तद्रिपुश्च किं तु तद्रिपुर्न्यून इति विशेषः॥

स राजराजो भरतः समादिशति मन्मुखात् ॥
भवंतमनुजं धीरं चक्रविख्यातवैभवः ॥ ५ ॥
न शोभते राज्यमिदं त्वया विना ।
हितैषिणा दोर्बलिनानुजन्मना ॥
तदेव राज्यं समुदाहरंति ।
स्वबांधवानां परिभागकारणं ॥ ६ ॥

किंच

यत्पादांबुजमानमत्सुरशिरोमंदारमालारजो—

---

१ गजोपरि चांडालोपरि च । २ कृष्णखड्गलता पक्षे श्यामा यौवनवती स्त्री । ३ सद्धारांचितया खड्गधारायुतया पक्षे सत्—हारांचितया । ४ प्राप । ५ भरतराजस्य शत्रुः 'नि' अक्षरेणशून्यः यथा वीर्यलक्ष्मीकयः, स्वोपकारसमासक्तः, खिलसंपद्विराजमानः इत्यादिः । ६ निधौ द्रव्यादिषु आदररहितश्चक्री, निष्यादरविरहितः—बुद्धिशून्यः शत्रुः । ७ आत्मबुद्धेरधीनश्चक्री, जायायाः पत्न्याः बुद्धेरधीनः शत्रुः ॥

जुष्टं लेखकिरीटकांतिलहरीपुंजेन किंजल्कितं ॥
युष्मद्वज्रकिरीटमल विमलं नो चेन्मरालायते—
तच्छोभां न दधाति देव विलसद्रक्तांगुलीसद्दलं ॥७॥
अवंध्यशासनस्यास्य शासनं ये विमन्वते ॥
शाक्तं द्विषतां तेषां चक्रमप्रतिशासनं ॥ ८ ॥

इत्यादि सामभेददंडप्रदर्शनं प्रभुशासनमुदाहृत्य विरतवत्यसि वचोहरे मंदस्मितमकरंदोद्गारेवदनारविंदो भुजबलिकुमारः सरसमधुरगंभीर्यमित्थं वचनमाचचक्षे ॥

सामि दर्शयता सामं भेददंडौ विशेषतः ॥
अस्मत्सु भवतो भर्त्रा स्वप्रज्ञा प्रकटीकृता ॥ ९ ॥
खलतां खलतामिवाफलां सुमनोभी रहितां दधात्ययं ॥
भरतः स यतो दिदृक्षते सहसास्मान्वलतश्च मायया॥१०॥
दिशां जेता चक्री यदि सुरसमूहं विजितवान् ।
तदा दर्भैः शय्यां किमलभत दारिद्र्यवशतः ॥
तथा स्यात्ते भर्तुः प्रतिहतिविदूरं यदि बलं ।
जले म्लेच्छैः क्रमेऽप्लवत खलु किं कौतुकवशात्॥११॥
राजोक्तिर्मयि तस्मिंश्च संविभक्तादिवेधसा ॥
राजराजः स इत्यद्य स्फोटो गंडस्य मूर्ध्नि कः ॥१२॥
चक्रैर्भ्रांतिमदारदैः कलितान्संसाधयन्पार्थिवान् ।

---

१ सार्थक । २ आज्ञां । ३ विनाशकं । ४ अप्रतिकूलं शासनं आज्ञा यस्य । ५ स्वस्य । ६ दुष्टतां । ७ आकाशलतां । ८ पुष्पे रहितां सज्जने रहितां । ९ पिटकः [illegible] । [illegible] ॥
१० कुंभकारस्य [illegible] [illegible] । ११ [illegible] रत्नं च । १२ घटाद् नृपांश्च।

साटोपं घटयन्परीतविभवः सत्कुंभभाग्भिः पुरः ॥
संपुष्यत्परमार्तिकः स भरतो नूनं कुलालायते ।
सोऽयं प्रत्यरिचक्रकलोपकुतुकी स्याज्जीवनस्य क्षितिः ।१३।

स किल मार्गधकलितरागः सरसमधुरकलयान्वितः पटुगंधर्वानुगतः प्रवीणो भरतः समररंगतले मया सह तांडवमारचय्य भरततां सफलयतु॥

ततः समरसंघट्टे यद्वा तद्वास्तु नौ द्वयोः ॥
नीरेकमिदमेकं नो वचो हर वचोहर ॥ १४ ॥
इत्यादिश्य क्षितिपतिरयं दूतमेनं विसर्ज्य ।
क्षोणीपालप्रकरमुकुटीकोटिसंघट्टितांघ्रिः ॥
चंचत्सेनां समरकुतुकः प्रोल्लसद्रोमहर्षो ।
प्रस्थानाय प्रकटितमदामायतामादिदेश ॥ १५ ॥
मदकरिघटाबंधे रंगत्तुरंगमसंगतैः
प्रचलितबलैर्भेरीरावैर्विदारितदिङ्मुखैः ॥
क्षितितलगलद्धूलीपालीविशोषितवारिधि-
र्भुजबलिमहीपालो भेजे भुवं समरोचिताम् ॥१६॥

अथ दूतवचननिशमनकुपितभरवराजसमादिष्टा समुन्नतजयेक-तनकाञ्चिततया संततसंपतन्मदधाराविराजिततया सिंदूरपरागशृंगारिता-

---

१ प्रशस्तघाटधारकैः पक्षे प्रशस्तगंडस्थल धारकैः गजैः । २ परमार्तिक उत्तमो घटो मृत्तिकाया भवः मार्तिकः पक्षे परमा आर्तिः धनुष्कोटिर्यस्य सः । ३ कुंभकारायते । ४ अरि चक्रं शत्रुसमूहः । ५ मागधो मागधदेशस्तु श्रेष्ठस्वरैः । पक्षे मागधो बंदी । ६ रागः प्रीतिः गांधारादि ग्रामरागश्च । ७ गंधर्वोऽश्वः गायकश्च । ८ भरतश्चक्रवर्ती नाट्याचार्यश्च । ९ निःसंशयं ।

गतया रत्नमयखेटकघटितकुंभस्थलतया च महामहीरुहमहितान् कटक-निकटशंकटनिर्भरान् संध्यांबुदचुंबितान् अवलंबितरविबान् असंख्याता-ञ्जंगमधराधराँस्तुल्यद्भिर्गंधसिंधुरैर्जवविजितपवनैर्निजरयनिरीक्षणक्षण--हीणान् हरिदश्वहरिताश्वान् खुरपटघट्टितकुट्टिमप्रसृताभ्रंलिहरजोभरे विलीनान्विदधानैः क्रामद्भिरिव गगनतलं, कवलीकुर्वद्भिरिव मार्गा-यासं, अतिक्रमद्भिरिवोत्मोत्थितानि रजांसि, तर्जयद्भिरिव हेषारवेण साक्थिजवसंजातसहचरप्रजवपवनम् आपिबद्भिरिव मुखलग्नफेनपुंजक-पटेन शात्रवयशोमंडलं, तरंगैरिव बलजलनिधेः, मूर्तैरिव वेगैर्वाजिभि-र्विजयलक्ष्मीवेणीदंडायमानकृपाणलताकलितकरैः पदातिभिः, संग्राम संतरणनाविकायमानैः सदेहबंधैरिव वीररसैः, साकारैरिवोत्साहैः, रथकट्यासु विराजमानै रथिकैर्गगनतलविलसितैः सुरखचरैश्च परीता-षडंगपताकिनी रणांगणावतरणाय प्रचचाल ॥

तदनु विनदद्वाजिव्राते प्रतापवशोत्थिते
रजसिजगतामांध्यं व्यातन्वतीव विजृंभिते ॥
दिनकरसदृक्चक्रोद्योतेन मार्गमबूबुधत
निधिपतिमहानीकं व्याक्रांतसर्वदिगंतरं ॥ १७ ॥

ततश्च यावच्चक्रधरानीकं भुजबलिबलेन महप्रालयसमये पूर्णपारा-वारः पश्चिमपारावारेणेव पटुगर्जनतर्जितदिशावशावल्लभं संगम्य युद्धाय सन्नद्धं तावदग्रेसरैः प्रज्ञावतां, अधीनैर्जनानुरागस्य, आवासैर्मंत्रलक्ष्म्या आकरैः, कार्यचातुर्यस्य महत्तमैः सचिवैर्मुधा जन-विनाशकारणं प्रविदारणं न युज्यते, युज्यते च युवयोर्जयलक्ष्मीतुलारोहणं

१ ग्रासीकुर्वद्भिः २ रथानां समूहः रथकट्या. ३ युद्धं ' युद्धमा-योधनं जन्यं प्रधनं प्रविदारणं ' इत्यमरः ।

जलदृष्टिमुष्टिरणामिति बोधितौ परितः पश्यत्सु सुरगगनचरेषु रणांगणमवतीर्णौ तौ नरकुंजरौ जंगमाविव निषधनीलाचलौ चकासामासतुः॥

तदा जयश्रीरुभयोः सकाशगतागतायासमनुव्रजंती ॥
तद्द्वयोर्द्धासितशालद्वाशागतागतायाः सितगोरिवाभूत्॥ १८॥

दृष्टिं धीरतरां निमेषरहितां व्यातन्वता दोर्बलि—
क्षोणीशेन जितेऽत्र दृष्टिसमरे पत्यौ निधीनां क्षणात् ॥
उद्वेलस्य बलार्णवस्य विपुलं कोलाहलं वारयन् ।
पृथ्वीपालगणः कनीयसि जयश्रीभावमाघोषयत् ॥ १९ ॥

सरसि जलमागाढौ जलयुद्धमदोद्धतौ ।
दिग्गजाविव तौ दीर्घैर्व्यात्युक्षामासतुर्भुजैः ॥२०॥

तदा किल भुजबलियुवा जयश्रीदृढालिंगितनिजभुजवंशयुगलनिर्गलितमौक्तिकनिकरैरथवा निजभुजनिर्दयालिंगितजयलक्ष्मीवक्षःस्थलत्रुटितोत्क्षिप्तहारमणिभिर्यद्वा बलोत्कृष्टप्रवेष्टप्रासादमधिरूढायाः पराक्रमलक्ष्म्याः अट्टाहासकांतिलवैराहोस्विन्नखचंद्रानिर्गलितसुधाशीकरैरिव विराजमानैः, सरभसमुदस्तभुजयुगरयजनितपटुपवनास्फालननिर्लोलस्वर्लोकतरंगिणीकल्लोलशीकरनिकरद्विगुणितैर्निलिंपकरमुक्तकल्पतरुकुसुमनिचयेन मधुकरविसरानुरोधविरहव्यंजितभेदैर्जलच्छाटाशीकरैश्चक्रधरमवाकिरत् ॥

बहवः सलिलासारा भरतेश्वरवक्षसि ।
निषधाचलसंगिन्यो निम्नगा इव रेजिरे ॥ २१ ॥
भरतेशकरोन्मुक्तांभोधारा दोर्बलीशिनः ।

---

१ बाहुः भुजबाहू प्रवेष्टो दोरित्यमरः, ।

प्रांशोरप्राप्य दूरेण प्रापन्मुखसंनिधौ ॥ २२ ॥
नभःस्थलमुपेयुषां दिविषदां तथा कौतुकात् ।
करैः कुसुमसंचयं जयिनि वर्षतां हर्षतः ॥
करोद्धृतजलच्छटाविमलशीकराडंबरैः ।
प्रतिप्रसववर्षाविभ्रममवाप नो दोर्बली ॥२३॥
भुजरयपवनाहतप्रसिंधुप्रचुरजलामलशीकरास्तथा ताः ॥
भुजबलिभुजचोदितांबुधारा युधि रणयोरनुचक्रुरंबुकोलिं॥२४॥

तदनु पुनर्भुजबलिकुमारजयोद्घोषणमुखरितादिगंतरे तत्र समराजिरे नियुद्धाय सन्नद्धौ पंचाननवंचनाचंचुपराक्रमी तौ वीराग्रेसरौ गमवतेरतुः ॥

भुजयंत्रनियंत्रणावशेन क्षणसंरुद्धपरस्परप्रयत्नौ ॥
सुरवारमनोहरं व्यधत्तां नरवीरौ निपुणं नियुद्धशिल्पं॥२५॥

ततश्च जगदेकवीरेण भुजबलिकुमारेण दिवि भ्राम्यमाणो मणिमुकुटकांतिकल्लोलवोल्लितगगनतलः क्षणमालातचक्रलीलां भजमानो नीलाचलशिखरसंगिनं गांगेयगिरिं तुलयन्भरतराजः बलकोलाहलमसहमानतया क्रोधांधस्तस्मिन्कनीयसि चक्रं प्रयोजयामास ॥

अभ्यर्णमेत्य तच्चक्रमथ कृत्वा प्रदक्षिणं ॥
अवध्यस्यास्य पर्यासं तस्थौ मंदीकृतातपम् ॥२६॥

तदानीमहो धिक् साहसं कृतमिति भरतंनिंदामुखरे तस्मिन् रणाजिरे वीराग्रेसरः करेण चक्रधरंतुलयत्नवतार्य, नरपालकुलकालितस्तुतिमालः सकलनृपवरिष्ठेन ज्येष्ठेन राज्यानुरागवशेन विहितं गर्हितमनुसंधाय

---

१ दीर्घकायस्य । २ आकाशभूम्योः।

परिकल्पितविषयवैराग्यस्तत्कालोचितमंगुरकश्रीरिव वनेऽप्यायसाश्चित्ताल्हादं चिरं कुर्वाणो महाबाहुनिनिनंदनो भरतराज्यश्रीरस्त्रिभुवनगुरुं निकषा दीक्षामासाद्य अन्तर्गतनशनाविमाने भगवताश्रिमिश्रितैः केवलाख्यपरंज्योतिरगममांद ॥

जेता समस्तनरारिनो पत्नी सन्नरमीरिनो ॥
पुरे साकेतमुल्केतु प्राविशद्भरतेश्वरः ॥२७॥
नृपास्तथा मागधमुख्यलेखा गंगादितीर्थाम्बुनिरुद्धकुंभैः॥
तमभ्यषिंचन्भरताधिराजमानंदभेरीरवपूरिताशाः ॥२८॥

यस्याज्ञा नृपकेशवर्गमुकुटेपु स्रगमालायते।
यत्कीर्तिर्विमला दिशांबुजदृशां हस्तादुकूलायते ॥
यत्तेजश्च दिशावधूकुचतटे काश्मीरपत्रायते।
सोऽयं श्रीभरताधिपो निधिपतिः शास्ति स्म विश्वंभरा॥२९॥

सुभद्रां भद्रांगीं नयनाजितनीलोत्पलरुचिं ।
समालिंगन्मोदाद्यतिशयितमानंदमभजत् ॥
मुखं यस्याश्चंद्रो वचनमपि पीयूषमधरं।
कचालिर्भृंगालिर्घनकुचयुगं चक्रमिथुनं ॥३०॥

अथ कदाचिदनगाराणां निःस्पृहतया सागारानणुव्रतधरान्धनधान्यादिभिस्तर्पयितुमना राजराजो हरितांकुरपुष्पफलादिभिः कृतोपहारे नृमंदिराजिरे प्रवेशाप्रवेशाभ्यां पौरजानपदानां व्रताव्रते विविच्य निश्चित्य च तन्निमित्तमापृष्टानां तत्र प्रविष्टानां प्रतिवचनेन सादरं तानिमान्दृढव्रतानभिनंद्य संयोज्य च पद्मनिधिगृहीतैर्ब्रह्मसूत्रैः, संपूज्य च दानमानादिभिरुपासकसूत्रप्रतिपादितानि इज्यावार्तादत्तिस्वाध्यायसंयमतपोरू-

पाणि षट्कर्माण्याधानप्रीतिसुप्रीतिधृतिमोदप्रियोद्भवनामकर्मबहिर्यान-
निषद्यान्नप्राशनव्युष्टिकेशवापालिपिसंख्यानसंग्रहोपनयनब्रह्मचर्यव्रतावतर-
णाववाहवर्णलाभकुलचर्यागृहीशित्वप्रशांतिगृहत्यागदीक्षाद्यजिनरूपमो-
नाध्ययनवृत्तितीर्थकरत्वभावनागुरुस्थानाभ्युपगमनोपग्रहणस्वगुरुस्थानसं-
क्रातिनिःसंगत्वात्मभावनायोगनिर्वाणसाधनेंद्रोपपादाभिषेकविधिदान—
सुखोदयेंद्रत्यागावताराहिरण्योत्कृष्टजन्ममंदराभिषेकगुरुपूजोपलंभनयौवरा
ज्यस्वराज्यचक्रलाभदिग्जयचक्राभिषेकसामाज्यपरिनिष्क्रमणयोगसंन्ना्हा
र्हंत्यश्रीमिवहारयोगत्यागानिर्वृतिरूपास्त्रिपंचाशद्‌गर्भान्वयक्रियास्तथा —
अवतारवृत्तिलाभस्थानलाभगणग्रहणपूजाराध्यपुण्ययज्ञदृढचर्योपयोगित्व-
पूर्वोक्तोपनयनादिरूपा अष्टचत्वारिंशद्दीक्षान्वयक्रियाः सज्जातिसद्गृहीत्व-
पारिव्राज्यसुरेन्द्रत्वसाम्राज्यपरमार्हन्त्यपरमनिर्वाणरूपाः सप्तकर्त्रन्वय-
क्रियास्तथातिबालविद्याकुलावधिवर्णोत्तमत्वपात्रत्वसृष्ट्यधिकारव्यवहारे-
शित्वावध्यत्वमानार्हत्वा दंड्यत्व प्रजासंबंधांतरस्वरूपान्दशाधिकारान्
श्रुतिस्मृतिपुरावृत्तमंत्रक्रियादेवतालिंगकामान्नविषयशुद्धिदशकं पक्षशु-
द्धि चर्याशुद्धिसाधनशुद्धिरूपशुद्धित्रयं च साविस्तरमुपदिश्यैवमुवाच

पूर्वोक्तकर्मनिर्माणकर्मठा ये समाहृताः ॥
ते वर्णोत्तमभूदेवदेवब्राह्मणशब्दितैः ॥ ३१ ॥
निस्तारको ग्रामपतिर्मानार्होऽहो लोकपूजितः ॥
इत्यन्वर्थैर्नामाभिश्च जोघुष्यंते महीतले ॥ ३२ ॥
इति भरतनरेंद्रप्राप्तसंस्कारयोगा ।
व्रतनियमगरिष्ठाः श्रीश्रुतांभोधिनिष्ठाः ॥
जिनपदचिरपांभोजातभ्रोढंपलीला ।

जगति बहुमतास्ते ब्राह्मणाः ख्यातिमीयुः ॥॥३३॥

अथ कदाचन चक्रधरः कांश्चिदद्भुतदर्शनान्स्वप्नानवलोक्य किंचिदुद्विग्नः स्वांतेन कामपि चिंतां गाहमानः कथंचित्फलानि जानानोऽपि दृढतरं तेषां निश्चयाय भगवदास्थानं प्रति प्रस्थितसेनानुयातैर्मुकुटबद्धैः परिष्कृतपार्श्वभागो दूरादेव भगवदास्थानभूमिं दृष्ट्वा नत्वा च गंधकुटीमध्ये विलसंतं देवदानवादिसेवितं भगवदर्हन्तमवंदत ॥

जिनेंद्रोरुन्मीलत्पदकमलसत्कांतिलहरी ।
स्फुरत्संध्यारागोल्लासितमणिकोटीरशिखरे ॥
तदा चक्री प्राप क्षितिभृति चिरादाविरभवत् ।
घनध्वांतध्वंसी विलसदवधिज्ञानतरणिः ॥ ३४ ॥
स्तुत्वा स्तुतिभिरीशानमभ्यर्च्य च यथाविधि ॥
निषसाद यथास्थानं धर्मामृतापिपासितः ॥ ३५ ॥

तदनु राजराजास्त्रिभुवनगुरो धर्मसर्गविधातरि त्वयि विलसमाने बालिश्यविलसितमिदं मम ब्राह्मणसर्जनं किं दोषाय किमु गुणायेत्यापृच्छ्य अवधिज्ञानविज्ञातान्यपि स्वप्नफलानि तत्रत्यानां प्रकटयितुं सादरं गुरुदेवमपृच्छत् ॥

श्रीमद्दिव्यवचोनवामृतझरीपानेच्छया निश्चलं ।
चित्तस्थापितशंकितं गगनगैर्ध्यानावबंधायितं ॥
सभ्यानां वलयं समात्तकुतुकं प्रोल्लासयन् श्रीपते—
र्वक्त्रादाविरभून्मरंदमधुरो दिव्यध्वनिस्तत्क्षणं ॥ ३६ ॥
पूजा द्विजानां शृणु वत्स! साध्वी कालांतरे प्रत्युत दोषहेतुः ॥
काले कलौ जातिमदादिमेते वैरं करिष्यंति यतः सुमार्गे ॥३७॥

वत्से ! कालान्तरे दोषमूलमप्येतद्‌जसा ।
नाधुना परिहर्तव्यं धर्मसृष्ट्यनतिक्रमात् ॥
इति त्रिभुवनाधीशो गिरा कोमलया सभां ।
उल्लास्य मधुरं स्वप्नफलान्येवमवोचत ॥ ३८ ॥

अये वत्स महीं विहृत्य महीभृत्कूटमास्थितानां त्रयोविंशतिपंचाननानां विलोकनेन त्रयोविंशतितीर्थकरादय दुर्णयानुद्भवनं । पुनरेकाकिनः कंठीरवपोतस्योपकंठे कुंजरानिरीक्षणेन सन्मतेस्तीर्थे सानुषंगकुलिंगि प्रकटनं । कुभींद्रभरमग्नपृष्ठस्य सैंधवस्यावलोकनेन दुःषमसाधुसंदोहस्य मुनिपरिवृढोपवोढानिखिलतपोगुणवहनासामर्थ्यं । शुष्कपत्रोपयोगिनां अजानां निध्यानेन त्यक्तसदाचाराणां नराणामसद्वृत्तिताख्यापनं । मंदमंथरसिंधुरकंधरारूढशाखामृगानिवर्णनेन आदिक्षत्रान्वयविच्छेदि भूपालकस्वमकुलीनानां, काकंकलितोलूकसंबाधदर्शनेन कालांतरे जनानां जैनधर्मपरिहारेण मतांतराश्रयणं, नृत्यद्भूतानिरीक्षणेन प्रजानां देवतात्वेन व्यंतरभजनं, शुष्कमध्यतटाकपर्यंतजलावलोकनेन धर्मस्यार्यनिवासपरित्यागेन प्रत्यंतवासिष्ववस्थानं, पांसुधूसरमणिगणदर्शनेन पंचमयुगे योगिनामृद्ध्यप्रादुर्भवनं, सत्कारसत्कृतसारमेयनिध्यानेन व्रतरहितानां द्विजानां पूजनं, तरुणवृषभविहारावलोकनेन तारुण्ये एव श्रामण्येऽवस्थानं, परिवेषोपरक्तदोषाकरविलोकनेन कालांतरीणानां मुनीनां समनःपर्ययावधिरजननं, अन्योन्यं सह संभूय वृषयुगलगमनेक्षणेन मुनीनां साहचर्येण वर्तनं, जलधरावरणरुद्धदिवाकरानिरीक्षणेन पंचमयुगे प्रायः केवलज्ञानाजननं, शुष्कद्रुमेक्षणेन पुंसां स्त्रीणां च चारित्रच्यवनं । जीर्णपर्णावलोकनेन महौषधिरसक्षमापन्न च सूचितमिति ॥

इतीरितस्वप्नफलानि श्रुत्वा विश्वस्य विघ्नोपशमाय धर्मे ॥
मतिं समाधेहि मनोज्ञबुद्धे ! धर्मो हि सर्वेष्टदकामधेनुः ॥३९॥
इति भगवतो भाषां श्रुत्वा प्रणम्य पुनः पुनः ॥
भरतनृपतिः भक्त्याकृत्य प्रविश्य निजं पुरं ॥
विविधदुष्करोत्सुकः शांतिक्रियां जिनपूजनं ।
निधिपतिरयं पात्रे दानानि चैष महामतिः ॥ ४० ॥
कदाचिद्वैराग्यादेष स किल मेघेश्वरनृपः ॥
सभां भर्तुर्गत्वा प्रणतमणिकम्राद्दृजलजः॥
कृतग्रंथत्यागाज्जिनविहितसत्संयमधरः ।
क्रमात्समृद्धिद्धः पुनरजनि भर्तुर्गणधरः ॥ ४१ ॥

तदानीमुदारबोधे जगत्त्रयनाथे च धर्मक्षेत्रेषु धर्मबीजान्युप्त्वा सेचयित्वा च धर्मामृतवृष्टिभिर्भव्यसंदोहस्य तत्फलसंपत्तये चिरं विहृत्य पौषपौर्णमासि दिने कैलासशैलविलसितश्रीसिद्धशिखरं निरभिलाष-मध्यासीने भरतपतिरास्तंभोरमा लोकांतमतिदीर्घं मंदराभूधरं, युवराजश्च स्वर्गादागत्य भवरोगनिरसनपूर्वकं सुरलोकप्रासये कृतोद्यमं महौषधि द्रुमं, गृहपतिश्च निरंतरं जनानिकरायामीष्टार्थं दत्वा नाकाक्रमणाय सत्वरं कल्पतरुं, सचिवाग्रेसरः पुनर्जिनकुजनेभ्यो नानारत्नानि प्रदाय प्रकटिताग्रगामनाटोपं रत्नद्वीपं, सेनापतिरपि कैलासोल्लंघनसन्नद्धं विघ-घटितवज्रपंजरं कुंजररिपुं, सुभद्रादेवी च यशस्वतीसुनंदाभ्यां सह शोचंती पुरंदरसुंदरीं स्वप्ने निशामयामास ॥

निधिपतिर्मुखैर्दृष्टस्वप्नमाकर्ण्य पुरोहितः ।
पुराजिनपतेर्हत्वा कर्माणि सर्वजगत्पतेः ॥

बहुमुनिजनैः सार्कं लोकांतभागमुगामितां ।
वदाति निखिलस्वमाल्येषेति धीरमवोचत ॥ ४२ ॥

तदानीमेवागतादानंदनाम्नः शासनवरात् मुकुलीकृतकरसरोरुहतया सभासरस्या समुपास्यमानं भगवतो दिव्यध्वनिदिवाकरास्तमयं श्रुत्वा गत्वा च सत्वरं भगवत्सन्निधिं चक्रधरश्चतुर्दशदिनानि महापूजया भगवंतमसेवत ॥

माघे मासि चतुर्दशीदिनवरे सूर्योदये श्रीपति—
र्लग्ने चाभिजिति प्रतीतसुगुणे पक्षे वलक्षेतरे ॥
पल्यंकासनमास्थितः स भगवान् प्राग्दिङ्मुखःसर्ववित् ।
मुक्तिश्रीकरपीडनाय सहसा सन्नद्ध एष स्थितः॥४३॥

अयं खलु भगवाँस्तृतीयशुक्लध्यानाविध्वस्ताघातिकर्मचतुष्टयः समधिष्ठितायोगिकेवलिगुणस्थानो व्यपगतशरीरत्रयः सिद्धत्वपर्यायं गुणाष्टजुष्टमश्नुवानः क्षणास्तनुवातः परमौदारिकदिव्यदेहात्किंचिदूनपरिमाणो नित्यनिरंजनरूपः सर्वदा विश्वं पश्यन्सुखमासामास ॥

अथ झटिति चिकीर्षुर्मोक्षकल्याणपूजां ।
परमपुरुजिनेंद्रोर्देवतानां निकायः ॥
इदममलशरीरं भर्तुरस्येति तोषात् ।
मणिमयशिबिकायामर्पयामास साधु ॥ ४४ ॥
स्फीताग्नींद्रतिरीटकोटिमणिसंजाताग्निना चंदन—
श्रीकर्पूरलवंगकुंकुमघृतक्षीरैः स्फुरद्वृद्धिना ॥
गंधाद्यर्चितकुंडजेन जगतः सौगंध्यसंदायिना ॥
भर्तुर्देहमदीपयत्कुतुकतः सोऽयं दिवौकोगणः॥४५॥

एवं सुरभिकुसुमगंधाक्षतादिभिरभ्यर्चितभगवद्दिव्यदेहहोमकुंडद-क्षिणभागे गणधरशरीरसंस्कारहुतवहकुंडं तदपरदिग्भागे चानगारके-वलिहुताशकुंडं परिकल्प्य गार्हपत्यदक्षिणाग्न्याहवनीयाभिधानात्कुंडत्र-यादुद्धृतभस्मना ललाटकंठभुजशिखरयुगलहृदयप्रदेशेषु वयमपि पंच-कल्याणभागिनो भवामेति विरचितरेखाः सकललेखाः सहर्षमानंदनाटकं संभूय संपाद्य स्वभवनमभजंत ॥

संध्यात्रये पावनरूपमेतदग्नित्रयं सादरमर्चयंतः ।
गृहस्थपूजातिथयो भवेतेत्युपासकान्धीरमुवाच चक्री ॥ ४६ ॥
गुरुवियोगहुताशनदीपितं भरतराजमुदारगिरां वरः ॥
वृषभसेनगणी वचनामृतैरुपशमं नयति स्म महागुणः ॥ ४७ ॥
विपास्य चिंतां गुरुशोकजातां गणेशमानम्य विनम्रमौलिः ॥
निंदन्नपारां निजभोगतृष्णां चक्री विभूत्या स्वपुरं विवेश ॥ ४८ ॥

अथ कदाचन चक्रधरकरकलितमणिदर्पणाबिंबितं शरच्चंद्राडंबर-विडंबकं पलितनिजवदनाबिंबं पुरुपरमेश्वरसन्निधानादागतमिव दूतमव-लोक्य विगलितमोहरसः साम्राज्यं जरत्तृणमिव मन्यमानो निजात्मजम-र्ककीर्तिं राज्यलक्ष्म्या संयोज्य महितापवर्गद्वारप्रतिमं संयमं स्वीकुर्वाणः सद्यःसमुत्पन्नेन मनःपर्ययबोधेन केवलज्ञानेन च विदितसर्वपदार्थसार्थः पुरंदरादिवृंदारकसंदोहवंद्यमानपादारविंदस्तत्र तत्र भव्यसस्येषु धर्मामृ-तवृष्टिं व्यातन्वानश्चिरं विहृत्य परमं पदमाससाद ॥

वृषभसेनमुखा गणिनस्तथा सकलजंतुषु सख्यमुपागताः ॥
विमलशीलविशोभितमानसाः परमनिर्वृतिमापुरिमे क्रमात् ॥ ४९ ॥

जयतात् मृदुगंभीरैर्वचनैः पारिनिर्वृतेर्हेतुः ॥
सुरसार्थसेवितपदः पुरुदेवस्तत्प्रबंधश्च ॥ ५० ॥

* इत्यर्हद्दासकृतौ पुरुदेवचंपूप्रबंधे दशमः स्तबकः *

कवेः प्रशस्तिपद्यं

मिथ्यात्वपंककलुषे मम मानसेऽस्मिन् ।
आशाधरोक्तिकतकप्रसरैः प्रसन्ने ॥
उल्लासितेन शरदा पुरुदेवभक्त्या ।
तच्चंपुदंभजलजेन समुज्जजृंभे ॥ १ ॥

* ॥ अयं पुरुदेवचंपुग्रंथः समाप्तः ॥ *

---

१ कोमलगंभीरार्थप्रतिपादकैर्वचनैर्भव्यानां मुक्तिसुखप्राप्तिहेतुः देवसमूहसेवितचरणयुगलः पुरुदेवः श्रीप्रथमतीर्थंकरभट्टारकः जयतु । तथा मृदुवर्णैः गंभीरार्थप्रतिपादकैर्वचनैः हर्षजनकः शृंगारादिरससमूहसेवितशब्दरचनोपेतोऽयं चम्पूग्रंथश्च आचंद्रार्कं जीयात् ॥